Shiva rahasya-Pt 10-Purvardha
शिव रहस्य - दशमांश - पूर्वार्द्ध
Samskrit
Paper
Handwritten
132 years old
47 Folio
14.2"x7.3"

अथशिवरहस्यदशमांशपूर्वार्द्धप्रारम्भः श्री

द०पूर्वा०

शिवरहस्य श्रीगणेशायनमः श्रीशिवरहस्यदशमांशपूर्वार्द्धप्रारंभः वेतंडतुंडमवतंसितचंद्रखंडसत्कुंडलीशपरिवेष्टितहस्तिचंडं शुंडावली
अ०१ कलितदंतहृतार्थकांडं विघ्नाद्रिषंडभिदुरंप्रणमाम्यखंडं १ सूतउवाच जैगीषव्यस्तदाप्राहाज्ञानषड्वैरिविक्रमः क्रौंचदारणमानम्यतनयंईश्वर
णंययो २ अर्धेंदुमौलिपाहालभोदानंदाब्धिचंद्रमाः तरंगरंगिनहृत्सारशांभसंगाघभंगकः ३ तेनैवपृष्टोमुनिनाशिपिविष्टकथानकं समुल्ल
१ सत्तुमनसाफालानलपदांबुजे ४ सेनानिपुत्रः सेनानिर्भक्तिशक्तिधरस्तदा मुक्तिमार्गमशक्तानांभक्तानांप्राहषण्मुखः ५ मुनयऊचुः स्कंदेना
पृष्ठिकिंतेनमुनिनाशंकरेयाहि वीरः शक्तिधरः स्कंदः सूदिताराति मंडलः ६ तस्मैविस्मयदं किंवास्मराराति कथानकं उक्तवान्सूतसर्वसंभ
क्रहृत्तापहारकं ७ तन्नोवदविशेषेणपूषलोचनसत्कथां सूतउवाच धन्यापूयंसदामान्याः महामनुकथादराः शैलकन्यापतेर्नान्याः कथाभ
वविनाशकाः ८ भवतांभवतांभूलेभूयोभूयोवदाम्यहं स्कंदंसेवितमंदारमिंदिरारमणार्चितं ९ गणेंद्रष्ट्रंदवंद्यांघ्रिभावभावविशेषवित् जैगीषव्य
उवाच अपर्णावक्त्रपाथोजविकासनदिवाकर भूरितारकसंहारस्मरमारप्रियार्चक १० विशिष्टशिष्टभक्तेष्टसिद्ध्यष्टकवरप्रद विशिष्टंच
मीनाचक्ष्वचक्षुश्रोत्रप्रियस्यहि ११ किंवाप्रसादजनकंशंभोर्भोदवाहिनः केषुस्थानेषुवसतांतुष्यत्येचमहेश्वरः १२ कस्यार्चनेनमुक्तिस्याद्देहिनांके
भोज्ञनैर्हिकः घृतेनकेनभगवान्भक्तमुक्तिंप्रयच्छति १३ त्र्यंबकोंबिकानाथः कथंनाथयतिप्रजाः एतन्मेकौतुकंहृज्ज्वलदुक्तासाधयाम्यहं
१४ महांसहापगाजानिसमुद्भवगराशिनः कथाःकथयसानंदंपृच्छतेछिन्नचेतसे १५ सूतउवाच स्कंदस्तत्सूक्तिमाधुर्यवचोवीचो
प्रहर्षितः उद्यद्धिमांशुवदनोमदनारातिसुप्रजाः १६ शांतंमुनिमालिंग्यभुजंगाभरणप्रियाः कथाश्चकथयत्तस्मैदेवैर्देवनकीर्तिताः १७
ताएववोवदाम्यद्यस्कंदेनानंददायिना जैगीषव्यायमुनयेयाः प्रोक्ताः श्रुतिदर्शिनाः १८ श्रीस्कंदउवाच शृणुत्वंसावधानेननिधानकलशंमम देवे
पुरामहेशेनकैलासस्थेनशंकर १९ रहस्यहास्यसुहृदानत्वाशिवरहस्यगाः मन्मथांतकरंदेवीनत्वाप्रणयगर्भिता २० कैलासशैलप्रासादे प्र
सादाभिमुखंस्थितं नवरत्नपरिष्कारिदिव्यमंचोत्तरच्छदे २१ मंदारपुष्पगर्भोत्थमरंदासारसौरभे कासारमध्यसरसफुल्लतामरसाश्रये २२ रण
ड्डंससुखारावसमीरणगणाहृते चंडतांडवसन्नादशिखंडिकलकूजिते २३ कोकिलाकाकलरवपिकसारसनादिते वनावनीगलत्पुष्परजसा
आर्द्रमारुते घ्राणसर्पिविसर्पिद्योभूमिगंधाद्भुतादिशि पश्यंतंसागरोपांतेनिनांतंसांतकाननं २५ अपृच्छत्पार्वतीकांतंशांतस्वांतेनदासुदा ॥
पार्वतीउवाच देवदेवमहादेवहरगंगाधरप्रभो अंतकांतककामारे अंधकासुरसूदन २६ महाकैलासनिलयविश्वनाथहराव्यय किंतत्वसु शिवम्
न्नुपायंकिंसाधनंतद्वदस्वमे २७ असत्यजननास्वांतपापतापनिवारकं महाविद्याधिकंब्रूहिनिस्सारंविस्तराच्छिव २८ इत्युक्तोभगवान्रुद्रोगि १

रिजाज्ञायया नदा सुराहृदि चिरं ध्यात्वा मुक्त्युपायं हरो वरत् २९ सदाशिव उवाच धन्ये मान्ये द्रिकन्ये त्वयि च रकरुणापूर्णदृष्ट्याभिवक्ष्ये संपूर्णेक रु
कर्णे सुरसामोहास्पदं ते मनः सुगुह्यं त्वज्ञोपि गुह्यप्रकथनमहिमा सह्य पापौघनाशं प्राप्य स्मत्कृपयैव लोकमभितो व्यूह्यं त्वया शैलजे ३० यानायानप
रंपरासु भवजेद्दुःखाभिघातैः शिवे मा मुह्यत्यपि पातकाननन निमेषैर्न्ये भवमेषोन्निमेषैः हुर्दुर्निदुहिणेन ह्याहतधियो भक्तिपरां मुक्तिदामित्येवं श्रुतिसूक्ति
गर्भितवचो मुंचंति मे पामराः ३१ वारंवारं सुमा सहायचरणं पारं भवाब्धेः परं ह्यास्मुक्तिनिकायमार्गमवरं ज्ञानं निहाराः परं घोरं पातकपंजरं प्रविज
हास्येवाद्भुतं तं तु धेबोधायैव भविष्यलिंगियतत्रमाज्ञानमेकं शिवे ३२ कलौ खलु रसायनं हर महाजने पावनं सदैव सुखसाधनं गिरिशलिंगार्चनं
महाघगिरिभेदनं प्रबलदुःखसंदीपनं जनेषु जनिनाशनं हृदयमोहसंभेदनं ३३ शृणुष्व शशिशेखरे त्रिनयनेंदुबिंबानने सदैव सुकृती भवति भस्म
भूषोज्ज्वलः सरुद्रसदृशो भवेत्सकलदेह रुद्राक्षधृक् सदेशिममसंमतो भवति भाग्यपूर्णो जनः ३४ मत्पंचाक्षरपावनोत्तमभति यो संस्तुनेत्तागनिसं
सारे सुविरज्य निर्ममहृदात्यक्तेषणो वा यतिः नेनामेति गतागतिप्रचालिनो ब्रह्मांतलोकोर्ध्वगः सत्यं रुद्रपरायणोपि गिरिजे नारायणस्याघहृत् ३५ हर
हरशिवशंकर त्रिशूलिनिति नाम्नेव विमुक्तपापसंघः यदि हृदि मम पादध्यानधारानुरक्तो भवति कलिजमर्त्यो मुक्तिसक्तो विशिष्टः ममाविमुक्तेश
नरुद्रजापी परां वरां वरां मुक्तिमुपैति शश्वत् निश्विस पंचाक्षरमंत्रजापी क्षेत्रे स वान् स्यकृतो जनुर्हि ३७ भुवि भारतवर्षमेत्यद्रिरिजे रजति पुण्यमा
गेहाने इर्द्मासाद्य नरोत्तमो वरावानहि तिष्ठति विषये सुदुःखभावः ३८ त्रिलोचनविलोकने मतिरुदेति भाग्योदये रक्षाज्ञ्पनिघनक्षमाक्षयगाशदि
नाशप्रदाक्षपापतिकलाधरं क्षापितपापविक्षेपहृत्क्षणं हृदि समर्चयन् सकलपुष्पनिक्षेपकृत् शर्वस्पर्शेन सर्वो भवति विमलतरो ऽखर्वपापा
द्दिह्हीनो हीनोपि स्यादहीनाध्वरचरफलभृच्चोर्वरादानकृत्सः ३९ यो वा को वापि लोके प्रथितजनिजरानाशदोषे ततो दोषदेवि श्रीमत्प्रदोषे अप्रवि
तिपस्मानो विचितो दुःखभोगेयः श्रागसंगजनितोत्तमपापभंगो लिंगार्चनेन निरयं विलयं प्रजेत ४० यो मत्कथास्तुतिविधो सकलाघधूतोधा
तुः प्रमार्ष्टि फलके लिपिजातरेखां मदालयकरो बिकेभवति पूर्वपुण्योदये सुदीपवरदानकृद्विमलधूपमोदप्रदः भवेत्तविभवे पियः प्रति
भवेपि भावादरो भवायजगतां शिवे स भवते गणेषूत्तमः प्रातः संगवपुंगवो रुवहन श्रीदिव्यलिंगार्चको सायं वापि उमासहायमगजे बीक्षेन
ताहृष्टधीः ४२ तेनैवाध्वरकोट्यो विधिहुता तेनैव दत्तो वराणेनाष्यादिगजाश्वकांचनवरं दत्तं द्विजेभ्यः शिवे एवं दश शैव विहिता मम तोषधर्माः सु
क्तिप्रदा भुवि नरेषु शिवे सदैव ४३ अस्येतिहासमधुना मधुसारभूतं धार्यं त्वया शिवरहस्यसमुद्रमध्ये नाम्नाश्मानेश्वरो यं जनिमृति विदश
त्रश्रांकोयं भवानि अंशोयं दशमः सदाशशिकलाचूडांघ्रिभक्तिप्रदः अध्यायाध्ययनेन संसृत्तिभवं दुःखं न सध्यापयति ध्वांतध्वंसनमेत देवगि

२ पूर्वा

शिवरहस्य

अ० २

२

रिजेप्रपंयश्रान्ताध्यायकं ४४ स्कंद उवाच इत्युक्तं शशिशेखरोत्तमवचः पीयूषमाध्वीझरीभाराणंदहृदागिरींद्रवरजाजानातृहर्षीतरां तेनैवोक्त
मपारसुंदरमहासारानुधारारसस्फारामोदमदायते पुनरहं विस्तृत्य वक्ष्ये मुने ४५ अथो यं शशिशेखरेण कथितः पूर्वापरार्धात्मकः अध्याया
धिशते नतहृद्रमतोप्युण्यतिहासो महान् नानार्थानुरसैकधीरसरसप्रेमास्पदो वै मुदे शृण्वन्त्वेष नतं महाघगिरिभिद्वज्रं सुखायास्तु ते ४६ ॥
इति श्रीशिवरहस्ये ईश्वरांशे दशमांशे शिवगौरीसंवादे प्रथमोऽध्यायः १ ॥ श्रीस्कंद उवाच शिवसंस्पर्शजालोकभस्मरुद्राक्षधारिणां
रुद्रपंचाक्षरमनो नाम्नामीशस्य कीर्त्यतां १ क्षेत्रे निवसतां विप्र भक्तानां येन रत्तात्मना प्रदोषसोमवारेषु भक्तानां सोमदेहशिनुः २ नक्तपूजनमाहात्म्यसे
तिहासं वदाम्यहं प्राकारसंरपारामगोपुरोत्सवकारिणां ३ पुष्पजातिविशेषेण कालेकालेर्चनस्य हि शिवेन कथितं विप्र शैलजायै विशेषतः ४
हंसेनकथयिष्यामि महिमानं विशेषतः मुनिरुवाच किमुक्तं देवदेवेन शिवेन परमात्मना कैलासमंदने देव्यै मरणान्तकरेण हि ५ तस्मै कौं
चारिपो ब्रूहि निस्तारं विस्तराद्धिमे सूत उवाच जैगीषव्यवचः श्रुत्वा स्कंदः सुदितनारकः वभाषे तं जगादेमाः तच्छृणुष्व विशेषतः स्कंद उवाच
प्रणम्य भक्तान्प्रस्तौमि पूर्वं भस्मानुलेपनात् ७ त्याज्योऽस्य कल्पसंग्रामस्तूर्पकल्पाः शिवोदिता निधालापितभस्मश्रीकथनं मोहनाशनं ८
कल्पानुकल्पोपकल्पाद्युतिभस्मसमुद्भवाः पुरारिणा पराप्रोक्ताः क्रमेण कथयामि तान् ९ पंचाननाभिषेकार्हं पंचगव्यप्रसूतयः त्रिरप्रसूता
गावो या भवंतीति त्वरो मया १० करस्यांगुष्ठिना तासां आदेयं गोमयं नवं शिवानले विधेयं तच्छिवमंत्रेण गोमयं ११ शिवमंत्रेण तद्भस्म जायते
बोधदायकं इदं हि कल्पसंभूतं भस्म धार्यं शिवानले विधेयं तच्छिवमंत्रेण गोमयं ११ शिवमंत्रेण तद्भस्म जायते बोधदायकं इदं हि कल्पसंभू
तं भस्म धार्यं शिवार्चकैः शुष्कं गोमयमारण्यं चूर्णयित्वा यथाविधि गोमूत्रेण समूहस्य विशोध्य शेन मंत्रतः १३ पिंडीकृत्य च तान्दिक्षा ज्वलिते हि
मपावके तद्भस्म जायते धार्यं अनुकल्पसमुद्भवं १४ एतन्पृथकृपृथक् भस्म गोमूत्रेणाभिमंत्र्य तत् पिंडीकृत्यादि मंत्रेणा क्षेपेद्भस्म शिवानले १५
तद्दग्धभस्मितं प्राहुरुपकल्पोपकल्पितं तत्धार्यमेव तद्भक्तैरिति शंकरशासनं १६ वामे करतले भस्म न्यस्य केम्बनपांसुभिः शिवार्चकस्तदीये
श्वादिशो दश विरोचयेत् १७ अनलो हि महान्रुद्रः तद्रूपं भस्म कथ्यते इतन्सह चन्द्रयः सुर्वस्पर्शी गुरो ईशा १८ मेधावी धारयेद्भस्म सर्वेषवय
वेषु तत्र मुद्रितं प्रणवेनैव जपन्पंचाक्षरं मनुं १९ विनियोगास्त्रयः प्रोक्तास्तानिन्मूलनधारणैः तीर्थस्नायात्रिराचम्य प्राङ्मुखो वाप्युदङ्मुखः २०
प्राणान्पोच्छिन्न घोरेण षडंगन्यासमाचरेत् अघोरमनुमंत्रेणु प्राणानभ्रमसुच्चरन् उच्चार्योंकारमध्यग्रः पाणिनाद्राय भस्म तत् अग्निरित्यादिमनु
भिः प्रक्षिपेत्सव्यतः करे २२ विकीर्य किंचित्तन्नैत्र्यां भूतादित्यइतिब्रुवन् विधायपाणिनाभस्मान्तस्य सव्यकर स्थितं २३ तन्मंत्रेराग्नेरित्यादिप्रोक्ता

शिवः

२

रोंकारकौ तथा मूलमंत्रं जपेद्विद्वान् अष्टवारं स्वसिद्धये २४ निदधे नत्तदात्मजः परेशायात्तरात्मने अम्बुक्ष्येशानमंत्रेण मूर्ध्नी संप्रोक्ष्य भस्मना
२५ मुखं तत्पुरुषेणैव हृदयं तदघोरतः पूरकं वामदेवेन सद्योजातेन पादकौ ॐकारेणांगमखिलं एवं स्नातो भवेद्गृही पादमारभ्य मूर्धान्तं सद्यो
जातादिभिः क्रमः २७ यतीनां तु मुमुक्षूणां पंचब्रह्मभिरुच्यते वसितां थपरं वह्निर्हि वामेद्विधानतः २८ नयतीनां कालनि शासदेनि शिवशासनः
अभाप्य भापणे चैव मलिरोक्ष्यति रोक्षणे २९ अश्राव्य श्रवणा स्पर्श स्पर्शं जं भा क्षुते षु च दुःस्वप्नेषु च मूलेन सर्वांगे भस्मितो क्षणं ३० मूर्धादिपाद
पर्यन्तं सर्वांगं प्रणवं वदन् भस्मनोद्धूलयेद्देहं तद्धूलनमुदीर्यते ३१ भस्मनो धारणं वक्ष्ये प्रणवेन प्रगृह्य तत् कृत्वा संपूर्वं वत्सालं लेपयेद्धि
शदा भस्म ३२ त्रिमूर्तिरूपं मूलेन त्रिपुंड्रं धारयेत्सुधीः गुणाग्निशक्ति त्रितयं प्रणवं भस्मधारणं ३३ त्रिपुंड्र स्पर्शनात् ... किं पुनस्तस्य धा
रणात् शिवशक्तिमनुस्तु स्मृतं न्यफालग्रीवयोर्धृतं ३४ कांते स्थानद्वये चास्मिन्धारयेच्च त्रिपुंड्रकं भसितं च स सामीशः परमात्मा चतुर्ष्वपि
३५ ब्रह्मविष्णुहरप्रीत्ये न स्फोत गलयोर्धृतं त्रिमूर्ति स्कंद तुष्ट्येतन्नाभौ चास्मिन् स्वयोष्टतं ३६ शिवविष्णौ ... तंजनं कर्णयो
स्तेषु च ष्टनं शिवभक्त्या प्रियं भवेत् ३७ तत्तेषु मूर्ध्नि च धृतं परब्रह्मप्रियं भवेत् ललाटफलहृन्नाभिबाहुकर्णद्वयेषु च ३८ एवं च भस्मभरणात् ब्रह्मावि
ष्णुशिवा मही पितृशक्राग्निविघ्नेश स्कंदास्तुष्यंति ते क्रमात् ३९ बाह्वोरसद्वयी चानुपरेषु श्रवसोरपि मूर्ध्नि भाले प्रतुष्यंति स्कंदाद्या भस्मधारणे
४० स्कंदविघ्नेश्वरेशानप्रजापतिजनार्दनाः नारायणाश्विभूम्यग्निब्रह्माणः शिवमूलयः ४१ ललाटकर्णहृदयनाभिदक्षिणबाहुषु तदन्यदक्षिण
श्रोत्रवामश्रोत्रेषु च क्रमात् ४२ एष्वेव च कराग्रे मूर्ध्नि तु ष्टास्तु भस्मधारिणः महेश्वरः पशुपतिः शंभुः शंकर ईश्वरः ४३ वामदेवो महारुद्रः श्रीकं
ठो वृषभध्वजः परमात्मा शिवश्चेति रुद्रा एकादशात्मकाः ४४ फालहृन्नाभिकंठेषु बाह्वोस्तत्स्व ध्ययोरपि मंत्रकोष्ठद्वयं ष्टेषु मूर्ध्नियो भस्मधार
येत् ४५ ब्रह्मा जनार्दनो हरः स्कंदपुरुषाः रुद्र भास्करौ शशिप्रभा वामनश्च अनभस्वान्वासवा हरः ४६ वामदेवश्चतेसर्वे तत्संप्रीता भवंति हि ये षु कुक्षौ
चपो भस्मधारयेत् स शिवप्रियः ४७ फालग्रीवाहृदुदरनाभिबाहुद्वयेषु पि प्रकोष्ठ मणिबंधांस पादयुग्मपृष्ठ स्तनः ४८ विभूतिं बिभृत स्तस्य शिवा
दिब्रह्मपंचकं वामाऽपि श्यानथा रौद्री काली कलविकारिणी ४९ बलवीकरणी चैव तथा बलप्रमाथिनी सर्वभूतदमनी तथा चामा मनोन्मनी ५०
अष्टिमलोक्रमात्सिद्ध्यं ... निस्थान देवताः ललाटकर्णयोर्नेत्रद्वये नासद्ध्या स्मयोः ५१ ग्रीवायामंसयोर्बाह्वोः कूर्परयोर्मणिबंधयोः हृन्नाभिगु
ह्यदेशोरुद्वयजानुद्वयेषु च ५२ स्फिक्द्वये जंघयोर्ह्याह्वयं संपृष्ठ समीपिनः यो भस्म संधारयेद् ... ज्ञात्वा क्रमात् स्याष्ट मूर्तयः ५३ विद्येश्वरादिगतेशांश्च स

द॰पूर्वार्द्धे

शिवरहस्य॰ वोष्ठोचसिद्धिदा अंगुष्ठानामिकाभ्यां तु ललाटे भस्मधारणे ५४ सर्वेदां तर्जनीतन्नवडेर्य्यागमशासनं मध्यमानामिकाभ्यां तु हृदये गमूर्धनि ५५
अ॰२ अंगुष्ठानामिकाभ्यां तु कर्णयोस्तस्य धारणं सांगुलीभिश्च उक्तेषु स्थानेषु गोप्य धारयेत् ५६ इत्थं विधाय विधिवद्भक्त्या श्रीभस्मधारणं शिष्टमूलेन त
ज्जिघ्रेदंतःकरणशुद्धये ५७ ज्ञानार्थी चंदनोन्मीलश्रीकामः कुंकुमान्वितं वश्यार्थी वश्यचूर्णेन जयार्थी रक्तचंदनात् ५८ नारीणां तिलकं यद्वा पयसा कृतसंधे
३ चंद्रके नपुंसकानां तन्मात्तं दीपशस्तं शिलोपमं ५९ यत्त्रिपुरदाहार्थं भस्मदिव्यास्त्रमुच्यते विभूतिश्चोच्यते ऐश्वर्यभूतिर्भसितमित्यपि ६० शिवभस्म प
वित्रं च क्षारमाग्नेयमित्यपि रक्षेति चास्य नामानि प्राहुरेकादशास्तिकाः ६१ नामत्रयं विभूत्यादि सद्योजं संपदावहं भूत्यादि नामद्वितयं वामार्थाभासनार्थि
यः ६२ यच्छिवादिद्वयं नाम्नां तत्पुरुषसंभवं नामद्वयं पवित्रादि तदीशानमुखोद्गतं ६३ संयत्कर विधिं नाम आयदुत्थारणं च तत् आग्नेयादि त्रयं नाम
मद्वयमेतदघोरजं ६४ अपस्मारभयोन्माद भूतादीनां निवारणं स्मरणाद्दर्तिशमनं दर्शनाद्भयनाशनं ६५ स्पर्शनाच्छुद्धिकरणं धारणात्सर्वकाम
दं सर्वमंत्रमयं साक्षाज्ज्वरशांतिमहौषधं ६६ सर्वाघभंजनं सर्वशत्रुगर्वनिवारणं ज्ञानप्रदं स्फाटिककरं आयुष्करमभीष्टदं ६७ विप्राणां ज्ञानतलानां
भस्मत्रेताग्निजं भवेत् व्याघ्रचर्मांबरं देवं स्तुवंतं निर्मलं द्विरः ६८ भस्मोद्धूलितसर्वांगाः प्रभवंति शिवार्चकः इत्युक्तसंस्कारविलिप्तभूतिः शिवार्चकाये
शिवसक्तभावाः ते स्वाभिलाषामृतभावमोक्षानंदंति लोके शिवसाधनेन ये जातिसंस्कारविभूतिभाजो शिवार्चकानां पदभक्तिभाजः ७० तदर्चकास्ते
धरणीतलेस्मिन्भजंति भोगान्सहपुत्रपौत्रैः इति श्रीशिवरहस्ये ईश्वरांशे दशमांशे भस्ममहिमाचर्णनो नाम द्वितीयोऽध्यायः २ श्रीस्कंद उवाच
भस्मोत्पत्तिं प्रवक्ष्यामि वहज्जाबालदर्शितां आदर्शे इव देवेन देवि प्रोक्तां त्वयि प्रभो १ दर्शेषु धारयन्भस्म कृत्वा होमं यथाविधि स्वसूत्रोक्तविधानेन
वह्निमन्हि विधारये २ बैल्वखादिरसंभूतसमिद्भिश्च तृणात्तथा आज्येन मधुमिश्रेण जुहुयादुद्रसूक्तकैः ब्रह्माणं ब्राह्मणं तत्र कल्पयेद्भस्मभूषितं स
यं वाचार्यमुख्यो वा जुहुयाज्जातवेदसि ४ अन्वाधानादि पूर्वार्धं कृत्वा इध्मादिपातनं आघारावथवा धार्य चक्षुषी जुहुयात्ततः प्रणीतां तत्र निक्षिप्य
पुष्पालंकृतिमाचरेत् बर्हिरास्तीर्य पश्चात्तु कृतनित्यक्रियः स्वयं ६ अजरेवाससी तत्र वसानः शिववासनः पुण्याहं वाचयित्वाथ नांदीश्राद्धं विधाय च ७
विलाप्याज्यं प्रयत्नेन हविस्तापयेच्चाग्नौ बैल्वखादिरपालाशैः स्रुवं स्रुचोपरि कल्प्य च ८ पूर्वापरार्धमाज्येन हविः प्रत्यभिघारयेत् देवमावाह्य वन्हौ च
शिवहोमं समाचरेत् ९ शांतिपूर्वोत्तरां चैव जपित्वाचम्य वाग्यतः शं च मेत्यादि जुहोत्यशान्तरुद्रेण वै तदा १० नमस्तेत्यादि मन्त्रेण चतुर्थ्यंतेन होमयेत् शिव॰
शान्तरुद्राहुतीस्तत्र शतनाष्टोत्तरमेव च ११ जुहुयादनले मंत्रैः चतुर्थ्यंतैः पृथक्पृथक् पुनराज्येन सोऽधारं हुत्वा रुद्रेण मंत्रवित् १२ रुद्रं च विधिवत्पूज्यः ३

कलशे मंत्रविन्नमः अब्रणोमृन्मयेवापिताम्रस्वर्णविनिर्मिते १३ राजतेवातथाराजासरोजाच्छादनैर्युते पंचाम्रपल्लवैर्युक्ते धूपदीपनिवेदनैः १४ त
तस्विष्टकृतंदत्वारौद्रंबलिमुपाहरेत् दिक्स्वष्टसुविशेषेणचबीज्येनहितमाः १५ धूपदीपैस्तथागंधैःवासोभिःपूजयेद्गुरुं एवंत्रिरात्रंकृत्वैवहोमंतत्रैवपा
वके १६ पावकोदनवर्तीस्याद्गुरुस्त्वाचार्यश्चवाग्यतः नक्तभुक्तेनवर्तीस्याद्भूशय्यानिरतोमुने १७ रुद्रत्रिषवणंकुर्यैःस्नानमौनेनतेनदा शतंदशवरान्
वापिद्विजान्संभोजयेत्क्रमात् १८ भक्ष्यभोज्यैःसुविहितैस्तांबूलैर्गंधपुष्पकैः दुकूलैर्दक्षिणादानैःरात्राबभ्यर्च्यशंकरं १९ ग्रामाद्बहिर्गृहेवापिशाला
यांवानदीतटे वटोदुम्बरविटपस्याधोबिल्वाश्वत्थादिमूलके २० शुभमासेवसंतादौशुभर्क्षेचोत्तरायणे यथाविभवसारेणब्राह्मणान्पूजयेत्क्रमात् २१ आ
चार्यंवायथाशक्त्याप्रादक्षिण्यक्रमेणहि प्रदक्षिणविधिंकृत्वासंरक्ष्याथप्रयत्नतः २२ तुषैःकरीषैश्चपृथक्सप्तरात्रंशिवालयं ब्राह्मणांस्तांमतासि
ध्येभोजयेच्छंभवान्यतीन् २३ शिवयोगीतथेशानंलिंगेसंपूजयेद्द्विजः ब्राह्मणःक्षत्रियोवैश्योराजावापियथाविधि २४ यथाशक्त्यानुसारेणशिव
भक्त्याप्रयत्नतः साधयेद्भसितंप्राज्ञोगोमयंतद्विधिंश्रृणु २५ एवंशिवानलप्रोक्तंभस्मधारणहेतवे महाशांभववीराणामेषएवविधिःस्मृतः २६ वि
रजानलजंभस्मधारयेत्समिदुद्भवं अग्निरित्यादिभिर्मंत्रैर्दग्धपापस्त्रिपुंड्रधृक् २७ वर्णीपर्णमयंदंडंधारयन्स्वर्णवर्जितः वेदमेकंत्रयंवापिअभ्यसे
च्छिवभावनः गृहस्थोपिसदाविद्वान्स्वकीयोपासनोद्भवं धारयेदेकएकैकंनयंभस्मयथोत्तमं २९ सर्वेषांसर्वदाधार्यंत्रिपुंड्रोद्धूलनात्मना वनस्थो
दावजंभस्मधारयन्धूलनात्मना ३० त्रियायुषैस्त्रिपुंड्रांके ग्राम्याहारादिवर्जितः सन्यासीप्रणवेनैवधारयेद्धूलितात्मना ३१ त्रिपुंड्रवर्त्मनाभस्मसि
तेनाथयथारुचिः वैप्रानसंभवंवापिधारयन्त्वानमुक्तिभाक् ३२ शिवानलोत्थभसितंशांभवैःशिवयोगिभिः धार्यमत्याश्रमीनांतुश्मशानाग्निसमुद्भवं ३३
स्त्रिभिःशिवालयोत्थंतुधार्यंसर्वजनैरपि ब्रह्मसत्रविशांईशप्रोदितोह्येषवैविधिः ३४ स्कंद उवाच शिवानलसमुद्भवंभसितमेवकल्पोद्धृतंल
भेत्तयदिभाग्यतोमूढदृढार्चनास्य्त्वतः तदप्यदपिकथ्यतेशिवमहेशसद्भासनं त्रिपुंड्रपरिधारणंभवतिशर्वतोषप्रदं ३५ येनिंदंतिमहेश्वरंत्रिजग
तामाधारभूतंहरंतेनिंदंतित्रिपुंड्रधारणविधिंदृष्ट्यंतुतद्दर्शने तेवैसंकरसूकरीखरखरीयोन्युत्थकीटोपमाजाराएवभवंतिपापपरमास्तेनारकाः केव
लं ३६ तान्दृष्ट्वाशशिभास्करौनिशिदिवास्वप्नेपिवाकेवलंपश्यंत्वश्रुतिसद्रसक्तजपतोमुच्येततेनाघ्नतः तत्संभाषणतोभवेत्तनरकंनिस्तारवात्तो
भित्तंयैर्भस्मादिविधारिणांतनुरुमेनिंदंतिमंदाहिते ३७ श्वानाम्बासनहीनमैथुनभवास्तेएसभाभाननाः दीनाएवबनाबनीषुनितरांकीशोपमा
शास्ताः कीनाशस्यवशंप्रयांतिकुनराजारोपजारोद्भवायेनिंदंत्यपिभस्मधारणरतंमंदाहिकर्मंदिनः ३८ असाराचारदेधैः दृढतरविमूढात्ममति
भिर्बिनत्यैकंशास्त्रंखलुकुलजमार्गैकशरणाः कुलालोत्पन्नास्तेश्रुतिगदितभस्माभिन्नमुखाल्लुलायप्रायास्तेयमगतिगतानारकवराः ३९ इतिश्री

शिवरहस्ये ईशानाख्ये दशमांशे भस्ममहिमानामवर्णनो तृतीयोऽध्यायः ३॥ श्रीस्कंद उवाच ॥ धेनुं लक्षणसंपन्नां परीक्षेत विचक्षणः सर्वा
वयवसंपन्नां हृष्टां दोषादिवर्जितां १ बहुक्षीरदुघां शस्तां सवत्सां सुघसो वरां श्वेतां रक्तां तथा कृष्णां कपिलां वा विशेषतः २ शबलां वाथ पिंगाक्षीं अरो
गामप्रपलायिनीं हुंभारवकृतोत्साहां दर्शनीयां च शृंगिणीं ह्रस्वांगीं विकटां चैव मनुष्मत्तां पलायिनीं चोरश्रवां तथा हृष्टां दीर्घशृंगामसृष्टकां ४
रोगिणीं नवसूतां च दग्धांगां चक्रचिन्हितां मलपंकवसामांसकेशशैवलभक्षिणीं ५ त्रस्तां पवत्सलां दृष्टत्वी मल्पक्षीरां ल्पमूत्रिणीं गानदोग्ध्रीं मंद
रोगिणीं नवसूतां च दग्धांगां चक्रचिन्हितां मलपंकवसामांसकेशशैवलभक्षिणीं ५ त्रस्तां पवत्सलां दृष्टत्वी मल्पक्षीरां ल्पमूत्रिणीं गानदोग्ध्रीं मंद
गमां अन्नहीनां कृशां तथा ६ अतिस्थूलां च मुंडां च एकगर्भामगर्भिणीं दाहगर्भां च बहुनीं गर्भिणीं त्रस्तगर्भिणीं ७ स्तनवत्साम वत्सां च वर्जयेत्ता
प्रयत्नतः काकस्वरां कोकरवां घंयभीतां सुधातुरां ८ वत्साहन्नीमल्पभक्षां स्वोधस्तः क्षीरयायिनीं स्रवन्नेत्रां क्रमियुतां लालाजालमुखां तथा ९
सर्ववर्णामकलकृदां विरूपां मामगर्भिणीं वृषाहां सां च भीतां च वर्जयेद्गोमयाहृतौ १० पूर्वलक्षणसंपन्नां अलक्षणविवर्जितां नैचिकीं मुखितां तां गां
सर्वांगैर्लक्षणैर्युतां ११ परीक्ष्य प्रक्षहृदयो विषमाक्षादिदेवतां गवामंगेषु तिष्ठंति भुवनानि चतुर्दश १२ तस्माद्गावः सदा पूज्याः सदा शिवमयाः सदा
अप्रियाणां पतिशंभुस्तासु तिष्ठति सर्वदा १३ गावो यस्य गृहे तुष्टा न स्युस्तु ष्यंति देवताः घासदानेन पितरस्तृप्तास्युः प्रपितामहाः १४ अलक्ष्मीपरि
हाराय गावः पूज्याः प्रयत्नतः कुलमेकं द्विधा भिन्नं ब्राह्मणानां गवां तथा १५ एकत्र वेदास्तिष्ठंति हविरन्यत्र तिष्ठति घृतयोन्यासीर भारा गावः पू
ज्याः सदैव हि १६ गवां पूज्या प्रभावेन प्रीतः पशुपतिः सदा गावो हि धात्री भूतानां मातरो लोकपावना १७ आ गावद्द्वति मंत्रेण उपस्थेया सदैव हि
ज्याः सदैव हि १६ गवां पूज्या प्रभावेन प्रीतः पशुपतिः सदा गावो हि धात्री भूतानां मातरो लोकपावना १७ आ गावद्द्वति मंत्रेण उपस्थेया सदैव हि
गावो यज्ञस्य सदनं मंदलानकरप्रियाः १८ गोभिश्चामृतनिष्पत्तिः पंचामृतवहाः सदा गवां क्षीराद्दधि भवेद्दध्ना च नवनीतकं १९ तस्मात्स्य
तस्य चोत्पत्तिस्तेनाज्येन दिवौकसः तृप्यंति किलवेतानेस त्यमाज्यमिति श्रुतिः २० ऋतं सत्यं परं ब्रह्म महेशं कृष्णपिंगलं शिवोभिप्रियते येन
शिवलिंगस्नानानंतः २१ क्षीरेणाज्येन दध्ना च तासां तासर्वपावनाः तद्गोमयं मंगलस्यात्स्वहालेपनकर्मणि २२ प्रातः प्रातः सदा सुद्धं भूमिम्
तं गोमयांभसा गृहं पवित्रतां यांति यासां मंगोद्भवं हितं २३ पावनं गोमयं प्रोक्तं यस्माद्भस्म प्रजायते ताः पूज्याः सर्वयत्नेन शिवः प्रीतो भवि
ष्यति २४ पशूनामधिपो यस्मान्महादेवो महेश्वरः शृंगांतरे सदा भाति लिंगरूपेण शंकरः २५ शृंगाभ्यामश्विनौ देवौ च सुधा चंद्र भास्करौ
प्राणे च निर्ऋतिश्चैव मुखे नैपूर्वदेवताः २६ कर्णयोर्वसवश्चाष्टौ गले सास्तासु भास्कराः ब्रह्मा तत्कवदिस्थो पिपृष्ठवंशौ पुरंदरः २७
पूर्वपादे विश्वदेवाः वरुणो पादसंधिषु वायुरग्निश्च जठरे मृत्युर्नाभौ च संस्थितः २८ खुरेषु रुद्रास्तिष्ठंति हृदये च जनार्दनः कमलावि
मला नित्यं गोपृष्ठे संस्थिता मुने २९ गोपुच्छे मार्जनं कुर्यादलक्ष्मीनाशनाय दि रोमकूपेषु मुनयो मनवोथ चतुर्दश ३० नक्षत्राणि च सर्वाणि

पृथिवी द्यौर्दिशस्तथा मातरः पितरश्चैव गंधर्वाश्चाप्सरोगणाः उरगा गरुडाः सिद्धाः साध्याः किंपुरुषास्तथा यक्षा रक्षांसि भूतानि गवामंगेषु सं
स्थिताः ३२ तासां गवानामधिपो महादेव उमासखः तत्पूजया पूजितः स्यात् श्रियानां पतिः प्रभुः ३३ नंदा सुनंदा सुरभिः कामधेनुश्च भद्रका
पंचैव गोगणाः पूर्वं सृष्टा वै ब्रह्मणा पुरा ३४ शिपिविष्टप्रसादार्थं तत्सुतो वाहिनीकृतः देवदेवेन धर्मोपि युगपादो महाबलः ३५ सर्वतीर्थक्षेत्रम
यो सर्वधर्ममयो महान् तपसा वाहनत्वं संप्राप्तो देवस्य शूलिनः ३६ कदाचिन्मेरुनिलये सुखासीनं महेश्वरं महादेव्या समासीनं मानसाख्यस
रस्तटे ऊर्ध्वं चरंत्यस्ता गावो पंचैवासन्मदोद्धताः वत्सैरुत्साहयुक्तास्ताः चरंत्यो विपिने तृणं ३७ नंदने नंदिता गावः कपिलास्वर्णसन्निभाः
बालभास्करवर्णाभा वक्त्रपृष्ठतनूभराः ३९ मेरुमूले स्थितः शंभुः अजानंतोयथेच्छया रोमंथस्रावसलिलैरभ्यषिंचुस्तदा मुने ४० गवां मुखो
द्गतं वारिशिंगस्यांगे निपातितं किंचित्क्रुद्धेक्षणो सोऽपश्यद् गावस्ता लोकमातरः ४१ शिवक्रोधाग्निनिर्दग्धा नानावर्णा निभेजिरे ब्राह्मणा सांत्विता
गावो मेरुमौलिं समागताः ४२ शिवेन शप्ता गावस्ता मुखे यूयं भविष्यथ अपवित्रतराः सर्वे जिघ्रंत्यो यच्च किंचन ४३ अपवित्रतरं भूयादिश
प्ता गवां गणाः स्वाधोभरक्षरक्षीरा अभ्यषिंचन्महेश्वरं प्रानवर्षीणि ता गावो रुद्रसूक्तेन शंकरं क्षीराभिषेकतुष्टोसौ वरेणाछंदयच्च ताः ४५
श्रीईश्वर उवाच हे गावः परमा तुष्टिः क्षीरवृष्ट्या निशम्य मयि वरं यं तु वरं ह्यद्य सद्यो वा दद्मि वांछितं ४६ इत्युक्ताः शंकरेणैव गावः संतुष्टुवुर्हरं
गाव ऊचुः शंभो चारुशशांककशेखरलसद्गंगातरंगोज्वलन्मौलेलालितशर्वराभिककरध्वस्तोरुनागाजिन पाहीशान दयानिधान भगवन्नेनो
महन्नो कृतं वारंवारमपाकुरुष्व दययाशीघ्रं पशूनां पते ४७ भो भर्गत्रिपुरांधकांतक महादेवाद्य गंगाधर भूतेशाखिलपावनामितबलान्लोलत्रिशू
लीकर रक्षास्मान् शरणागतान् करुणया गावो वयं गोपते सर्वोक्षाद्य दृशा दशांशाकरुणाकोटिकटाक्षेण च ४८ पुत्रो नोस्तु भव भवो द्भवमहाधर्मोक्ष
तिर्वाहनं देवस्त्वं पशुपोसि पाहि सुदृशा कारुण्यवासंनिधे नोदद्यावरमीदृशं नवदृशा चाशावसान प्रभो हे स्वादपि सुप्रियोस्तु भवतेधर्मः सुगोनोद्य
हि ४९ श्रीस्कंद उवाच गावस्ताः प्रति नंद्यनंदित दृशा हृद्दार वृद्दैन्यतः सानंदं शशिकुंदसुंदरजयाभारांकमौलिः शिवः धर्मं चापि सवाहने च कलयन्ने
वं च गावोपिताः प्रीतेशेन नदामुदा त्वभिमता वस्ता गमिष्यत्विति ५० यूयं यात निजालयं प्रति सदा नैवाद्य मंतुर्हदिवः क्षीरोत्तमसेचनेन सुहृदामो दामि
तुष्यामि च समासमीनस्तुतितोषितो हरः तदा समीचीनदृशा विलोकयता ५१ त्रिलोचनः प्रीतियुतो बभूव स्मेराननः पुंगवराजवाहनः श्रीईश उवाच
यः क्षीरोत्तमसेचनं प्रतिदिनं कुर्यात्स्विलिंगोत्तमे तस्याहं वितरामि भाग्यमहिमं कैवल्यवल्लीमपि ५२ तस्यापारमहापराधशमनं कुर्वेहमेवादरात्

यूयंगच्छतनंदनोत्तमवनेतुष्टाश्चरंतुद्रुतं इत्युक्ताशशिशेखरेणपशुपेनामंत्रितायंश्रिताः नत्वाशंभुपदांबुजंप्रतियमुर्गावोहिहृष्टामुने ५३ तस्मा
द्गोपतिरेवशंकरइतिश्रुत्यापरंगीयतेतंनत्वाशरणायमुक्तिपरमानंदैकधाम्निस्थितः ५४ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्धेगोमहिमाना
मचतुर्थोध्यायः ४ स्कंदउवाच श्रीफाललोचनेनैवब्रह्मज्ञाबालसंभवं भस्मचोक्तंविमुक्तैहिजनानांजन्मवतामुने १ शृणुष्वसावधानेनत्वमेकाग्र
णचेतसा सद्योजातोद्भवात्वक्त्रात्पृथिवीसमजायत २ महेशस्यादिसृष्टेहिजाबालश्रुतिचोदिता पृथिवीरूपिणीयासागोजसैककपिलाख्यया ३
नंदासानामतोविप्रतस्याभूतिर्बभूवह वामदेवमुखाच्छंभोर्वार्यग्रेसमजायत ४ कृष्णवर्णाततोभद्रातस्यावैभसितंसितं आख्यातंमुनिशार्दूलशू
लपाणिप्रसादतः ५ अघोरवक्त्रादभवल्लेलिहानोज्वलत्प्रभुः वन्हिस्तस्मायजंगतामध्यान्हार्कशतोपमाः ६ रक्ताचरक्तवर्णाचसुरभिःसमजाय
त तस्याहिभस्मसंजातंभासनंपावनंपरं ७ तत्पुरुषमुखाद्वायुःसर्वायुःकारणोमहान् तस्माच्छ्वेताभवद्धेनुःसुशीलागोःपयस्विनी ८ तस्मात्क्षारंस
मुत्पन्नंक्षरत्पापकलंमुने ईशानवक्त्रादाकाशोव्योमकेशाद्बभूवह ९ तस्माच्चचित्रवर्णाभूत्सुमनानासापयस्विनी तद्गोमयोत्थारक्षाभूत्साक्षात्त्र्य
क्षप्रसादतः १० विद्याशांतिप्रतिष्ठाचशांत्यतीतामनोन्मनी कलापंचसमुत्पन्नाक्रमोपंशंकराज्ञया ११ विभूतिर्भसितंभस्मक्षारंरक्षेति
वैमुने भवंतिपंचनामानिपंचवक्त्रोद्भवानिहि १२ ऐश्वर्यकारणाभूतिर्भस्मसर्वाघभक्षणात् भासनाद्भसितंप्रोक्तंक्षरणात्क्षारमापदां १३ संसारभ
यभीतानांरक्षासंरक्षणान्मुने अग्नीषोमात्मकंभस्मसंप्रोक्तंमुनिसत्तम एकोवन्हिर्यथायज्ञेसमिंधेनाध्वरेतदा बहुरूपोमुनिश्रेष्ठतथेदंभ
स्मपावनं १५ अतनूदेवदेवस्यअष्टमूर्तेःपिनाकिनः अग्निरित्युच्यतेरौद्रीघोरायातैजसीतनुः १६ सोमःशक्त्यामृतमयःशांताकानतरीतनुः
अमृतंयत्प्रतिष्ठासातेजोविद्याकलःस्वयं १७ स्थूलसूक्ष्मेषुभूतेषुत्तएवरसतेजसी द्विविधोतेजसोवृत्तिःसूर्यात्माचानलात्मिका १८ वेद्युतादि
मयंतेजोमधुरादिमयोरसः तेजोरसविभेदेनजगद्व्याप्तंचराचरं अग्नेरमृतनिष्पत्तिरमृतेनाग्निरिध्यते अतएवहविःक्लृप्तंमुनेसर्वमखेषुच २०
हविषारसस्यसंपत्तिःवृष्टिरसस्याभिवृद्धये हविस्तृप्तासुराःसर्वेअग्नीषोमात्मकंजगत् २१ ऊर्ध्वशक्तिमयःसोमोह्यधःशिवमयोनलः आभ्यां
संपुटितंयस्मात्स्म्यद्विश्वमिदंजगत् २२ अग्निरूर्ध्वंज्वलत्येषोयावत्सौम्यंपरामृतं यावदग्न्यास्पदंसौम्यममृतंविसृजत्यधः २३ अतएवहि
कालाग्निरधस्ताच्छक्तिरूर्ध्वगा यावतादहनश्चोर्ध्वमधश्चाप्लावनंभवेत् २४ आधारशक्त्यवधृतःकालाग्निरथऊर्ध्वगः तथैवनिम्नगः
सोमःशिवःशक्तिपदास्पदः २५ शिवश्चोर्ध्वमयःशक्तिरूर्ध्वशक्तिरधःशिवः तदित्थंशिवशक्तिभ्यांनाव्याप्तमिहकंचन २६ असकृच्चाग्निनादग्धं

जगत्तद्भस्मसात्कृतं अग्नेर्वीर्यमिदंप्राहुस्तद्वीर्यंभस्मयत्ततः २७ यश्चेत्थंभस्मसद्भावंज्ञात्वाभिस्नातिभस्मना अग्निरित्यादिभिर्मंत्रैर्दग्धपाशःसउच्य
ते २८ अग्नेर्वीर्यंतुतद्भस्मसोमेनाप्लावितंपुनः अयोगयुक्ताप्रकृतिरधिकारायकल्पते २९ योगयुक्तांतुतद्भस्मप्लाव्यमानंसमंततः शाक्तेनामृतव
र्षेणाह्यधिकारान्निवर्तयेत् ३० अतोमृत्युंजयायेत्थममृतप्लावनंसतां शिवशक्त्यमृतस्पर्शेलब्धएवकुतोमृतिः योवेदगहनंगुह्यंप्लावनंचत
थोदितं अग्नीषोमपुरंकृत्वानसभूयोभिजायते ३२ शिवाग्निवातनुंदग्ध्वाशक्तिःसोमामृतेनयः प्लावयेद्योगमार्गेणसोमृतत्वायकल्पते ३३
अग्नीषोममयंजगत्स्थिरचरंसंभावितंशंकरस्तत्सारासारविचारसागरमहापारीणधुर्यामुने जानंत्येवगतागतौपुनिनरामुक्तस्वभावाभवेभा
वाएवभवेपिभावपरमाभस्मैकभावाःसदा ३४ अग्नीषोमपुरोद्भवेनभसितालोकाविभूषांगकाःशांताएवभवंतिभागपरमापापौघभंगाशयाः
दुग्धानंगमहागसंगभुजगाभोगांगलिंगार्चकाःपुण्यापारपतंगभानभवनास्तेपावनाभूतले ३५ योवाकोवाविभूत्याभवतिहिकलितोदिव्य
दिव्यत्रिपुंड्रैःसर्वेषामपिपावनोहिसभवेस्वालोकसंगेनहि तत्संगेनहिभंगिताघनिचयोभूयोभवेद्वैजनः जानातिश्रुतियुक्तिसूक्तिवचनैः
संभस्मनोवैप्रभुः ३६ आर्यावर्तस्थितायोश्रुतिगदितमहानर्थभस्मादिभिर्यैपुंड्रंफालनलेनिधायविमलंसर्वांघसंघोज्झिताः शर्वस्यैवस
मर्चनप्रियतरागर्वादिवर्गोज्झितास्तेवीर्यौन्नतपरास्तरंतिभुवनेतेचार्यवृत्तिस्थिताः ३७ भस्मेदंस्मरहंतृफालफलकालंकारभूतंसदापा
पौघापतुलघस्मरंस्मृतिकृतंबुध्यादिबोधप्रदं ज्ञानंचापिदिशेदुमेविधिधृतंतिर्यक्फालेष्वपिसर्वेषामविशेषतोहिजगणेषूक्तंविशेषेणहि
समाम्नातान्मायप्रबलवचनेनालमितरप्रमाणानांमानंश्रुतिगदितसीमानुसरणंप्रमादोनोभूस्येभवतिसुखकीर्त्यादिविनशच्छिवोत्कर्ष
ज्ञानंभवतिचविमुक्तःपरतरं ३८ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्द्धेपंचमोध्यायः ५ ॥ स्कंदउवाच भस्मस्नानविविधिंव
क्ष्येत्र्यस्मस्याभिमतंमुने कैलासशिखरासीनंमहादेवंगिरींद्रजा १ प्रणम्यप्रणयेनाहप्रणतार्तिहरंहरं पार्वत्युवाच देवत्रिशूलविलसत्क
रपल्लवशंकर प्रसीदप्रमथाधीशमन्मथांतकराव्यय २ शंभोविश्वात्मविश्वेशविश्वतोमुखशंकर भस्मस्नानविधिंशंभोवदेवकरुणाकर ३
स्कंदउवाच इतिदेव्यातदापृष्टोईशानोदेवनायकः विनायकगुरुर्देवोबभाषेतांगिरींद्रजां ४ श्रीईश्वरउवाच साधुपृष्टंत्वयाभद्रेग
ह्यमेवत्वयाविके भस्मस्नानविधिंतेद्यप्रवक्ष्येपापनाशनं ५ भस्मस्नानेष्वधिकृतःशांभवःशिवपादधीः नेतरोदेविनत्पात्रंत्रिनेत्रप्रियम
द्विजे ६ नान्यपुंड्रधरःपात्रंभस्मस्नानेसदैवहि वैदिकोवेदनिरतोविरतस्त्वन्यकर्मणि ७ नतांत्रिकस्त्वधिकृतोनोर्ध्वपुंड्रधरःशिवे
संतप्तचक्रचिन्हात्रश्ववद्यस्तेबहिष्कृतः ८ तद्वदेवात्रगिरिजेभस्मस्नानविधौमुदा नैत्रैनेबहवःश्लोकाबृहज्जाबालचोदिताः स्प

गुप्त्वसावधानेन भस्मस्नानविधौ शिवे भस्म चोक्तं समादाय संसिक्तं मंत्रमंत्रितं १० मस्तकात्पादपर्यंतं मलस्नानं प्रोदितं हृन्मंत्रेण च क
त्रैव विधिस्नानं समाचरेत् ११ ईशेन पंचधा भस्म विकिरेन्मूर्ध्नि यत्नतः चतुर्थां पुरुषेणैव वक्त्रे हृदि तथाष्टधा १२ अघोरेणाथ वामेन दश घा
गुह्ये करौ अथावर्तेन सद्येन पादावुद्धूलयत्नतः १३ सर्वांगोद्धूलनं कार्यं राजन्यस्य यथाविधि मुखं विना च तत्सर्वं उद्धूल्य क्रमयोगतः
१४ संध्यात्रये निशीथे वा तथा पूर्वापराह्णयोः सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकं १५ स्त्रीं षंढं पुंसकं गृध्रं बिडालं वकमूषकं स्पृ
ष्ट्वा तथाविधान्यान्भस्मस्नानं समाचरेत् १६ देवाग्निगुरुविद्वानां समीपे त्वाङ्गदर्शने अथ हस्ततले मार्गे कर्यान्नोद्धूलनं व्रती १७
शंखतोयेन मूलेन भस्मच्चा मिश्रणं भवेत् एषितं चंदनेनापि वारिणा संयुतं तु वा १८ चंदनेन समालिंपेत् ज्ञानार्थी चूर्णमेव तु मध्यान्हा
त्प्राक् जलैर्युक्तं तोयं तदत्तु वर्जयेत् १९ त्रिपुंड्रं कामयेत्पश्चाद्ब्रह्मविष्णुशिवात्मकं मध्यांगुलिभिरादाय तिसृभिर्मूलमंत्रितं २० अनामामध्य
मांगुष्ठे रथवा सत्रिपुंड्रकं उद्धूलयेन्मुखं विप्रः क्षत्रियस्तच्छिरोधिकं २१ द्वात्रिंशत्स्थानके वार्धषोडशस्थानकेपि वा अष्टस्थाने तथा चैव पंचस्था
नेपि योजयेत् २२ उत्तमांगे ललाटे च कर्णयोर्नेत्रयोस्तथा नासावक्त्रे गलेष्वेवमंसद्वयमतः परं २३ कूर्परे मणिबंधे च हृदये पार्श्वयोर्द्वयोः
नाभौ गुह्यद्वये चैवमूर्वोर्गुल्फौ च जानुनी जंघाद्वये च पादौ द्वौ द्वात्रिंशत्स्थानमुत्तमं अष्टमूर्त्यष्ट दिग्देशादि क्पालान्वसुभिः सह २५ ध
राध्रुवश्च सोमश्च आपश्चैवानिलोनलः प्रत्यूषश्च प्रभासश्च वसवोष्टा विनोदिताः २६ एतेषां नाममंत्रेण त्रिपुंड्रं धारयेद्बुधः विदध्या
त्षोडशस्थाने त्रिपुंड्रं तु समाहितः २७ शीर्षके च ललाटे च कंठे चांसद्वयोरिति कूर्परे मणिबंधे च हृदये नाभिपार्श्वके २८ पृष्ठे चैकं प्रति
ष्ठायजपे तत्राधिदैवतं शिवं भक्तिं तु नादाख्यमीशं नादाख्यमेव च २९ वामादिनवशक्तिश्च एता षोडशदेवताः नासत्यो दस्रकश्चैव मश्वि
नौ द्वौ समीरितौ ३० अथवा मूर्ध्नि केशे च कर्णयोश्च सनेन तथा बाहुद्वये च हृदये नाभ्यामूर्वोर्युगे तथा ३१ जानुद्वये च पदयोः पृष्ठभागे च षोड
श शिवश्चंद्रश्च रुद्राकौ विघ्नेशो विष्णुरेव च ३२ श्रीश्चैव हृदये शश्च तथा नाभौ प्रजापतिः नागाश्च नागकन्याश्च उभयोऋषिकन्यकाः ३३
पादयोश्च समुद्राश्च तीर्थाः पृष्ठेपि शास्त्रतः एवं च षोडशं ध्यायेदष्टस्थानमथोच्यते ३४ गुरुस्थानं ललाटं च कर्णद्वयमनुत्तमं अंसयुग्मं
च हृदयं नाभिरित्यष्टमं भवेत् ३५ ब्रह्मा ऋषयः सप्त देवताश्च प्रकीर्त्तिताः अथवा मस्तकं बाहू हृदयं नाभिरेव च ३६ पंचस्थानान्यमून्या
हुर्भस्मतत्त्वविदो जनाः यथासंभवनं कुर्याद्देशकालाद्यपेक्षया ३७ उद्धूलनेप्यशक्तश्चेत्त्रिपुंड्रादीनि कारयेत् त्रिनेत्रं त्रिगुणाधारं त्रया
णां जनकं विभुं ३८ स्मरन्नमः शिवायेति ललाटे तु त्रिपुंड्रकं ईशाभ्यां नम इत्युक्त्वा पार्श्वयोश्च त्रिपुंड्रकं ३९ बीजाभ्यां नम इत्युक्त्वा धारयेत्तु प्रकोष्ठयोः

कूर्पकाधःपितृभ्यांचउमेशाभ्यांनथोपरि ४० भीमायेतिततःपृष्ठेशिरसःपश्चिमेतथा नीलकंठायशिरसिक्षिपेत्सर्वात्मनेनमः पापंनाशय
तेक्षिप्तंअधिजन्मशतार्जितं कर्णोपरिकृतंपापंनष्टंस्याद्भस्मधारणात् कंठेचधारणात्कंठेभोगादिकृतपातकं तद्भस्मधारणंमुख्यंसर्वत्रैवत्रि
पुंड्रकं ४३ ब्रह्मविष्णुमहेशानांत्रयाणामग्नीनांचधारणं गुणलोकत्रयाणांचधारणंतेनवैकृतं ४४ तेनाधीतंगुरोऽश्रुतंतेनसर्वमनुष्ठितं येनविप्रेण
शिरसित्रिपुंड्रंभस्मनाकृतं त्यक्तवर्णाश्रमाचारोलुप्तवर्णक्रियोपियः सकृत्तिर्यक्त्रिपुंड्रधारणात्सोपिमुच्यते ४६ येभस्मधारणंमुक्त्वाकर्मकुर्वंतिमानवाः
तेषांनास्तिविनिर्मोक्षःसंसाराज्जन्मकोटिभिः ४७ महापातकयुक्तानांपूर्वजन्मसुसर्वतः त्रिपुंड्रोद्धूलनेद्वेषोजायतेसुदृढंबुधैः ४८ येषांद्वेषो
भवेद्ब्रह्मन्ललाटेभस्मदर्शनात् तेषामुत्पत्तिसांकर्यमनुमेयंविपश्चिता ४९ येभस्मधारिणंदृष्ट्वानराःकुर्वंतिताडनं तेषांचंडालतोजन्मब्रह्म
न्नूह्यंविपश्चिता ५० येषांनास्तिमुनेश्रद्धाश्रौतेभस्मनिसर्वदा गर्भाधानादिसंस्कारास्तेषांनास्तीतिनिश्चयः ५१ त्रिपुंड्रंयेविनिंदंतिनिंदंतिशिवमे
वते धारयंतिचयेभक्त्याधारयंतितमेवते ५२ धिग्भस्मरहितंफालंधिग्ग्राममशिवालयं धिगनीशार्चनंजन्मधिग्विद्यामशिवाश्रयां ५३ रुद्रा
ग्नेर्यत्परंवीर्यंतद्भस्मपरिकीर्तितं तस्मात्सर्वेषुलोकेषुवीर्यवान्भस्मसंयुतः ५४ भस्मनिष्ठस्यदह्यंतेदोषाभस्माग्निसंगमात् भस्मस्नानविशुद्धात्माभ
स्मनिष्ठइतिस्मृतः ५५ भस्मसंदिग्धसर्वांगोभस्मदीप्तत्रिपुंड्रकः भस्मशायीचपुरुषोभस्मनिष्ठइतिस्मृतः ५६ श्रीस्कंदउवाच अष्टस्थानधृतं
त्रिपुंड्रमलिकेस्यादष्टमूर्तिप्रियं तद्देहेद्वादशभानुदैवतमुमेतद्द्वादशांगेधृतं ५७ मन्येषोडशशीतलांगकलयाधार्यंत्रिपुंड्रंततो मन्येषोडशशी
तलांगकलयाधार्यंत्रिपुंड्रंततो द्वात्रिंशत्स्थितवर्ष्मणित्रिभुवनाधीशास्पदंप्राप्नुयात् ५८ धृतंललाटेक्षितिदंधातिफालेपाणावथैणंशिरसींदुं
गेवक्षःसुचक्षुश्रवसोरुहारंहरेभवेद्भूतिविभूतिभानैः योवान्हिसप्तकमनुप्रथितोरुभस्मभीषात्रियापुषमनुप्रथितोरुपुंड्रः ५९ फालेणवाहस
रवएणकृतांकमौलिरेणीदृशार्धतनुरेणकरोभवेत्तत्रैवर्णिकानामिदमेवभस्मधार्यंसदाश्रौतमभंगृहस्थैः ६० विरजानलजंसमिद्भवंवासहि
वर्णिःकिलाधारयेद्विभूतिं स्मृतिजातानलभस्मधार्यमाहुःगृहिणोवैनियमेनसर्वथाहि ६१ विप्राणांपचनाग्निसंभवमुमेधार्यंत्रिपुंड्रात्मना
भस्मैवाघहरंभवेत्तहितत्कृत्साद्रोद्भवानांसदा संकीर्णेष्वपिरथ्यपथ्यविहितंभस्मैवतत्पावनंधन्यानामिदमेवमंगलकरंसत्फालेलिप्तंमुने
६३ भस्मत्रिपुंड्रपरिमंडिततुंडगंडश्रीबाहुदंडयुगलांसबृहत्तिचंडः चंडांशुसत्तुनिलयंनसजातुपश्येदिंदुप्रभासरसमौलिकयाक्षखंडैः ६४
भवेत्सविभवाधिकःप्रतिभवेपिभावादरोभवोद्भवसमर्चनप्रभवितात्मभावःसदाभजेनभसितंसितंयदितदात्मजःसंत्यजन्भवेत्तकिल्बा
नरःपरमकानरःपामरः ६५ शिवेभसितभूषणोभवतिभाग्यपूर्णोनरोवरश्रुतिपरायणोप्यहहभस्मपुंड्रोज्झितः द्विजाधमकुलानलप्रबल

धूमकेतुर्भवेत्कदापिनरकालयान्नहिसज्जातुमुच्येदपि धृतसितभसितत्रिपुंड्रभूषायतिमतिगतिदायिनस्तुतेशाः ६६ कृतवरसुकृतान्जितारिवर्गा
मितहितनपसाभवंतिहाराः नस्नानशौचाचमनक्रियाभिःशुद्धेनविध्यापिकृतान्कृतेहिं ६७ भस्मत्रिपुंड्रांकितफालगात्रःपात्रंनसामुष्मिकपु
ण्यहेतौ वीनैषणास्त्रिषवर्णकिलभस्मभूषोयोषाविरक्तहृदयःकिलभक्तवर्यः शक्तःसमुक्तिपरवीममिवीस्मितुंवैत्र्यक्षप्रसादमखिलस्तुतदा
लभेत् ६९ इतिश्रीशिवरहस्येईशानाख्येऽष्टमांशेपूर्वार्धेषष्ठोध्यायः ६॥ स्कंदउवाच मानस्तोकेतिमंत्रेणमंत्रितंभस्मधारयेत् ऊर्ध्वपुंड्रंभवे
त्साममध्यपुंड्रंयजूंषिच १ अधःपुंड्रमृचःसाक्षात्तस्मात्पुंड्रंत्रियायुषं त्रियायुषाणिकुर्वीतललाटेभुजयोर्हृदः २ नाभौशिरसिहस्ताग्रेब्राह्मण
क्षत्रियास्तथा वैश्यास्त्रियंबकेनैवशूद्रःपंचाक्षरेणतु ३ स्त्रीणांचसधवानांतुपंचाक्षरत्रिपुंड्रकं विधवानांतथैवायंविधिप्रोक्तोथशूद्रवत् ४ त्रि
यंबकेनमनुनाब्रह्मचारिसदैवहि पंचब्रह्मादिमनुभिःगृहस्थस्यविधीयते ५ अघोरेणाथमनुनाविपिनस्थविधिस्मृतः यतिस्तुप्रणवेनैवत्रि
पुंड्रादीनिकारयेत् ६ अतिवर्णाश्रमीनित्यंशिवोहंभावनात्मना शिवयोगीचनियतंईशानेनविधारयेत् ७ नस्माज्जपसर्ववर्णैश्चभस्मेदंशिवशा
सनं अत्रेदमितिहासंतेनामपंचकभासकं ८ वासिष्ठोथमुनिःकश्चिद्वंसोवेदवित्तमः धनंजयस्सोविप्रोनाम्नेवासीद्धनंजयः ९ तस्यभार्याश
तंचासीद्रूपलावण्यशोभितं ज्येष्ठिनेपत्नसुतोकरुणोनामतोभवत् १० उपनीतःस्वकालेनवेदानप्यगृहीत्सहि भार्गवीमुपयेनेसकन्या
कमललोचनां ११ पितर्युपरतेकालेभ्रातृभिःकलहाद्यतैः विभज्यतत्पितृधनंभवनाशान्तरंययौ १२ तत्राश्रमोचितंकर्मनिर्वर्त्यसमवस्थितः
नृसिंहमगमत्तत्रहरिंसंसेवितुंद्विजः १३ ब्राह्मणेनपरेणास्तंनृसिंहोपायनंफलं अजिघ्रन्मोघजंवीरंगंधवत्कांचनप्रभं तेनविप्रेणशप्तोसौ
मक्षिकत्वमुपेयिवान् भार्यामाहूयविप्रोसौजगादस्वस्यचेष्टितं १५ मांरक्षेतितदाप्राहकरुणाशरणायता मक्षिकानामरक्षत्सातदनरविरो
धिनः १६ भ्रातरस्तस्यतंपापंतैलमध्येह्यमारयन् सामृतंस्वपतिंगृह्यअरुंधत्यैन्यवेदयत् १७ रुदतींसाविशालाक्षींतांसांत्वैःसमतोषयत्॥
अरुंधत्युवाच शोकेनालमितोभद्रेभस्मनाजीवयाम्यहं अग्निहोत्रोद्भवंभस्मसमानयद्गुतंमम १८ समानीयततोभस्मदत्तौतस्याःकरेसती
मृत्युंजयेनमंत्रेणमृतजंतौन्तदाक्षिपत् १९ मंदवायुस्तदाजज्ञेव्यजनेनशुचिस्मिता उदतिष्ठत्ततोजंतुःभस्मनास्यप्रभावतः २० ततोवर्षशतानि
स्यभ्रातामृतिमवाप्तवान् काश्यपोदुष्टसर्पेणदष्टोपिपुनरुत्थितः २१ भस्मनोस्यप्रभावेनतस्मादुक्षेतिनामतः तस्माच्चभस्मनोवीर्यात्तस्यपुत्रो
भवत्मुनिः २२ दधीचिस्तपतांश्रेष्ठःतपस्वीतपनप्रभुः शुभंवासोमुनेनत्रसुरकार्यार्थमुद्यतः २३ गौतमस्यमुनेःपूर्वंविवाहेहल्ययासह २४
पयुक्तादेवगणाः तांवीक्ष्यप्रमदोत्तमां कामप्रमाद्रोपहताःनिर्धूतभस्मसोभवन् इंद्रोपिसंगतस्तस्यांशप्तश्चाक्ष्यपदेनहि २५ ह्रियावनम्रानदे

वाःपुरुहूतपुरोगमाः दूर्वाससंभस्मनिष्ठंअगच्छंमापशांतये २६ प्रणम्यशांभवश्रेष्ठंभस्मनिष्ठंसुरास्तदा प्राहुःप्रांजलयःसर्वेस्वागोमुनिवंप्रति
२७ देवाऊचुः क्षमस्वनोमुनिश्रेष्ठस्वागोहेतुंतदद्यनः इंद्रंचकृपयावीक्ष्यपाह्यस्मान्मुनिशापतः २८ इत्युक्तंदेववचनंश्रुत्वातानाहसुव्रतः॥
दूर्वासाउवाच तद्दोषंशमयिष्येहंभस्मनैवसुरोत्तमाः शतरुद्रीयमंत्रेणमंत्रितेनैवभस्मना शमयिष्येमुनिकृतंशापेनेंद्रविरूपतां ३० इत्येव
मुक्त्वादुर्वासादत्तवान्भस्मचोत्तमं ब्रूतमद्वचनात्सर्वेयूयंवैकृतरेभसः ३१ शतरुद्रेणमंत्रेणभस्मोद्धूलितविग्रहाः निर्धूतरेभसःसेंद्राःसुरा
आसन्नेनसः ३२ आश्चर्यमेतज्जानीहिप्रभावंभस्मनोमुने एकार्णवेयुगांतेहिपुराहिशयनेहरिः ३३ योगमास्थायपरमंशिश्येसनमसा
वृत्तः आनुदध्रेणवजलेसंचरन्परमेश्वरः ३४ शूलासक्तमहास्कंधःसोमार्धकृतशेखरः दृष्ट्वाहरिंकरुणयास्वभावतमसावृतं ३५ अप्रणम्य
स्थितंज्ञात्वातद्ध्याननिवृत्तये स्ववक्षसिस्थितंभस्मनखेनादायशंकरः ३६ प्रणवेनाभिमंत्र्याथशिवपंचाक्षरेणहि हरिमस्तकगात्रेषुभस्मतत्क्षिप
द्रंजसा ३७ शिवांगसंगभस्मादिसद्वृत्तागोहरिर्हरं संत्यज्यनामसंहस्थंध्यायन्नस्तुत्यिनोहरिः ३८ साष्टांगमष्टमूर्तिंतमष्टांगंप्रणिपत्यच दृष्ट्वेश्वरंभ
क्तिगम्यंभस्माभक्षयदच्युतः ३९ तद्देवासीद्धरिःपूर्णपक्वबिंबसमद्युतिः वासुदेवःशुद्धमुक्ताफलवर्णोभवत्तदा ४० तदाप्रभृतिमुक्ताभोवासुदेवो
मुनीश्वर तुष्टावदेवंहृष्टात्मासोपिशिपिविष्टमुमासखं ४१ श्रीविष्णुरुवाच त्र्यक्षाक्षयोरुरक्षाक्षपितहृदिमभध्वांतसंघातवक्षसोभाक्षाक्षतशिक्षया
द्भुतसुराध्यक्षाद्यसंवीक्षितः वीक्षाशिक्षितदक्षपक्षसुमष्टकालानलस्वध्वराध्यक्षाक्षोभ्यगुणाकरार्णवविभोमारक्षमुक्षध्वज ४२ वेदांत
स्तुतवस्तुरूपरहितामेयादिमायोभितप्रज्ञानंदघनैकनिस्तुललसत्प्राचावचोदूरग मस्तेनाभिनमंतियेनवपदंतेस्वस्तयेहिक्षितौस्तेनाकस्त
वसंस्तवाद्यगणनागण्येषुशस्तंमनः अशक्यंतेरूपंपरमपरमप्राप्यहरयोभवाभावंप्राप्ताविधिहरसुराश्चासुरगणाः महाग्रासोरुद्रोभवसिभग
वन्नद्भुततनोरणीयानोजिष्ठोवृहदणुकरूपोसिमहिमा ४४ स्कंदउवाच इत्थंस्तुत्वातदाविष्णुःमहादेवंतदावदत् प्रणम्यभस्मफालोहि
भवप्रणवमानसः ४५ विष्णुरुवाच नशक्तिंभस्मनोजानेप्रभावंतेकुतोविभो नमस्तेस्तुमहादेवत्वामेवशरणंगतः ४६ त्वत्पादयुगलेशंभो
भक्तिरस्तुसदाममम तत्रविष्णोर्वचःश्रुत्वानत्स्तुत्यातुष्टईश्वरः ४७ स्पृष्ट्वाविष्णोःशिरस्तत्रभस्मनापाणिगेनहि उवाचघनघोषेणउच्चैर्वो
षोमहेश्वरः ४८ ईश्वरउवाच भस्मधारणसंपन्नोममभक्तोभविष्यसि त्वंभस्मनिष्ठोनितरांपालयेदंचराचरं ४९ पुनस्तेभस्मनोवक्ष्येमहि
मानंश्रुणुष्वमे उमानाथोरमानाथंवीक्ष्यनामगजांतदा ५० एवमाहविरूपाक्षःपद्माक्षंवीक्ष्यसादरं ईश्वरउवाच मानस्तोकेतिशस्तंभ
सितमतिसितंहस्तमध्यांगुलीभिः न्यस्तंफालतलेत्रिपुंड्रवचनाद्विध्वस्तपापोभवेत् ५१ स्नातंतस्यमहेशपादकमलोदारप्रभूतंमधुव्य

द०पू० शिवरहस्य अ०७ ८ स्तपापगणेनग्रस्तभसितेनाध्यस्तमस्तेशिवे त्रिपुंड्रविष्टतिः शिवेकिलमहाघशैलानुलकुलाचलविलोपनेसुदिग्धपृष्ठिसृष्टिप्रभः ५२ भवाखिल
विभावरिपरमचातुरीसीमभूर्भवेत्तविभवाधिकः परमकालकालप्रियः अभावभवभावकृद्भवपदाब्जभावोद्भवभवेत्तविभवाधिकंप्रतिभवेपिभाव
स्यहि ५३ शिवेभसितधारणंसितहिताभिनानिर्हरत्त्रिपुंड्रमिदमेवमेप्रबलपापतूलानलं क्षारंत्विदंनिखिलपापहरंप्रदोषसारंधृतंभसितमेवभ
वैकसारं ५४ पारंभवेतभवसागरतारणायहारंवरंश्रुतिशिरोजगबोधकारं अकार्यकरणाद्यहत्करणजातमप्यंननोविशेषशरणेनवैभसितधारणे
द्विजे ५५ शिरःकरउरोदरेकरपदोरुभागेधृतंभगाक्षिःहरपूजनप्रकरणेकहाम्पूर्णं द्विजात्यजवधाद्धिवेत्पजतिपातकंयत्कृतंस्मरत्पजालिपीगतं
शिरसिधार्यमेतत्सदा ५६ भजेनभसितेनसितंद्विजवरोनरोवात्पजोममप्रियतरोविकेभवतिभाग्यपूर्णोजनः इतिश्रीशिवरहस्येईशानाख्येदशमांशे
पूर्वार्द्धेसप्तमोऽध्यायः ७ स्कंदउवाच पुराभंकणकःसिद्धःफणिभूषणपादधीः भस्मनिष्ठस्तदाशंभुंतपसाराध्यवैमुने १ लेभेसिध्यष्टकंविप्रअष्टमूर्तिकृ
पारसैः लेखालभ्यंपदंशंभोःलास्यात्केलासमाप्तवान् २ शिवपादैकनिष्ठेनमनसासमहामनाः हारोहरैकमनसायोगंमाहेश्वरंपरं ३ युयोजविजित
क्रोधःकामजित्क्षोभवोत्तमः शिवोक्तेनैवमार्गेणपुण्यमाथर्वणोदितं ४ चक्रेशिरोव्रतंश्रीतमश्रान्तमनसामुनिः भस्मनिष्ठोभवद्विप्रोभस्मांगोभस्म
भावनः ५ शतंवर्षाणिसमुनिस्तदाचक्रेशिरोव्रतं सदात्रिषवणस्नायीत्रिवारंभस्मभूषणः ६ वैराजमग्निमिंधानोविरजाःसरराजहि द्विजराजकला
मौलिपादाब्जभ्रमरोपमः ७ रुद्रमावर्त्तयन्भक्त्यायुक्तःसमुनिरास्तहि हिमांशुपांडुरंभस्मतत्संसर्गात्सुखेनदा ८ जैगीषव्यउवाच क्रौंचदारणसर्वज्ञवि
स्मयोमेमहानभूत् कथंमंकणकःसिद्धःशांभवेभस्मभावनः ९ लेभेसपरमांसिद्धिमित्यवादित्वयाद्यहि सर्वार्थदंमहासारंपापगर्वनिवारणं १०
शिरोव्रतंकथंचक्रेतन्मेवदविशेषतः शिवप्रसादपात्रंवैमुनिःकेनाभवत्तदा ११ शिपिविष्टोपदेशेनकथंचक्रेशिरोव्रतं तन्मेवदविशेषेणचरितंमंकण
स्यहि १२ स्कंदउवाच जैगीषव्येनमुनिनापृष्टस्तुष्टोथषण्मुखः सन्मुखायाथमुनयेबभाषेमांकणींकथां १३ सुब्रह्मण्यः शृणुत्वंमुनिभिःसार्धं
वृंदारकगणैर्मुने यथोपदिष्टोदेवेनमुनिर्मंकणकःपुरा १४ गरभूषणपादाब्जेसदाप्रवणमानसः हिमवच्छिखरेरम्येपुण्यवृक्षोपशोभिते १५
रसालतालहिंतालतमालामलकैर्युते सालजालमहाबिल्वपनसाम्रातकैर्युते १६ पुन्नागनागपीतांम्रलिकुचैर्वकुलैर्धवैः केतकीसर्जभूर्जा
द्यैरर्जुनैश्चंदनैर्युते १७ क्रमुकाक्रमितद्राक्षावल्लीगुच्छविराजिते एलांदोलितवल्लीजमल्लिकाकुसुमोत्करे कदंबवृंदपुष्पौघरजसाच्छादिभूतले
वनावनीरणन्मंदसमीरणविराजिते १९ तत्पुष्पमकरंदोद्यद्गंधबंधुरतर्पित सरोद्भवसरोजश्रीविराजत्फुल्लहल्लके २० पुष्पगुच्छच्छदामोदसप्तच्छ शिवं ८
दविराजते राजत्कोकनदामोदसमुद्यन्मंदमारुते २१ शारिकाविरतोड्डीनशाखद्विजविराजिते पुंस्कोकिलकुलारावकेकीकूजनसंजिते २२

गंधर्वगीतवहुलमृदंगध्वनिसंयुते हरिणीगणसंचारपंकान्क्खुरभूतले २३ करग्रीकरसंस्त्राविमदामोदितभूतले महामहिषहुंकारप्रतिध्व
नितकंदरे २४ सुंदरेतद्वनेतत्रचचारसमहत्तपः सहिमंकणकःसिद्धःफणिकंकणपूजकः २५ महालिंगंतत्रमुनिःप्रतिष्ठाप्यार्चयच्छिवं त्रिका
लंभस्मनिरतोविरतोविषयेष्वसःत्यक्तैषणःत्रिषवणंभस्मस्नानरतःसदा अग्निरित्यादिभिर्मंत्रैःयत्रितांगःसभस्मना २६ त्रियायुषत्रिपुंड्रांकोशशा
कांकितमौलिधीः शकांतकादिरहितःकालांतकसमर्चकः २८ भस्मच्छन्नोभस्मसंस्थःस्वस्थोरुद्रमजीजपत् शतवर्षाणिहृष्टात्मावर्षास्वभ्रा
वकाशकः २९ अदभ्रभक्तिरभ्रौघैःछन्नोपिस्वस्थमानसः निरिच्छोन्यसुरार्चायांहृच्छयादिविवर्जितः ३० पंचाग्निमध्यनिरतःभस्माभ्यक्तो
भवाश्रयः भवभावसमासक्तोभावोभवपदाश्रयः ३१ शांतिदांसादिनिरतःमुक्तिमार्गैकतत्परः तंतादृशंतपश्पंतंपश्यंतित्रिदशामुने ३२
सरोजासनआगत्यतंतदाप्राहविस्मितः ब्रह्मोवाच ब्रह्मन्ब्रह्माहमागस्यत्वदग्रेसंस्थितोमुने सहैभिश्चसुरैःसार्धंवृणुमत्तोवरंवरं ३३ त्त
दापद्मासनवचःश्रुत्वानत्वानमब्रवीत् मंकणउवाच धन्योमान्योद्यतेब्रह्मन्दर्शनादेवमेमनः नाहंत्वत्तोवरंयाचेयाचेभक्तिंशिवेस्थि
रां ३४ त्वमेवेशेप्रसादेनप्राप्तोसिपरमंपदं वेदजालंसृष्टिवलंवलप्रमनार्चनात् ३५ याहित्वंवैसुरैःसार्धंतवलोकंपितामह इत्युक्तस्त
तदाप्राहमुनिंपद्मासनस्तदा ३६ ब्रह्मोवाच त्वंमंकणस्तपःसिद्धःभवभक्तोसिसत्तम उत्तमोसिमुनीद्राणांप्रसन्नोस्तुभवस्त्वयि ३७
भवस्त्वतपसेभूस्वेभवभक्तिर्भवेत्त्वयि भवतोभवशांतिर्हिभवादेवभविष्यति ३८ भविष्यतित्वयिप्रीतोभवएवनसंशयः भस्मच्छन्नोसिनित
रांसिद्धोसित्वंनसंशयः ३९ तमामंत्र्यमुनिंतत्रययौलोकविधिःसुरैः पुनस्तत्तापसिद्धोसौमंकणोभस्मभूषणः ४० फणिभूषणपादाब्जचरण
स्मरणादरः तंविष्णुर्गरुडारूढःशंखचक्रगदाधरः ४१ स्वपार्षदैःपरिवृतोययौतंमुनिपुंगवं तमाभाष्यबभाषेवंविष्णुसाक्षार्चनेरतं ४२
विष्णुरुवाच शांभवोसिमुनिश्रेष्ठशिपिविष्टपदार्चक निष्ठांतवेदृशींदृष्ट्वाविस्मयोमेमहानभूत् ४३ तपावीक्षितुमायातःशिवभक्तिंत्तवे
दृशीं सूतउवाच इत्थंविष्णुवचःश्रुत्वानिमील्यनयनेस्वके अशांभवंचतच्चिन्हंहृष्ट्वाविष्णुंतदाब्रवीत् मुनिरुवाच नाहंत्वत्तोवरंयाचेयाचे
भक्तिंमहेश्वरे अशांभवेत्वांदृष्ट्वैवनाहंवीक्ष्येजनार्दन ४५ यस्यलिंगार्चनेनैवविष्णुत्वंप्राप्तवानसि त्वंपालकोजगत्यस्मिन्वैकुंठस्याधिपः
कृतः ४६ महेशेनप्रसन्नेनतत्वत्तोकांक्षयेवरं याहियाहियथाजोषंविशेषोनास्तितेमयि ४७ नाहंत्वत्तोभियाचेवरमसमरधुनीधन्यमूर्ध
न्यमौलेर्नाहंचान्यंसुरंवाशतमखममरंशंकरान्यंनवीक्ष्ये यत्रस्थाक्षतपादपंकजरजोलेशांशलेशांशतोयाचेहंवरमेवनावरमहंविष्णोनिंद्रं
ष्टेमनाक् ४८ इत्युक्तंमुनिवचनंनिशम्यधाष्ण्र्यंविष्णुस्तंमुररिपुराबभाषेभीतोभावमनोनिरीक्ष्यभसितंप्रोद्भूतपापंतदा ४९ श्रीविष्णुरुवाच

द०पूर्वी॰
शिवरहस्य
अ०८
९

त्वंभावोसिभवोत्तमांबुजपदध्यानैकसन्मानसः भस्मोद्धूलितदिव्यभासुरमहादिव्यत्रिपुंड्रांकितः ५० त्वद्भावंविमलंविलोक्यतवहृ
दग्रातुंप्रवृत्तस्त्वयि भावेष्वेवभवांतकोहिभगवान्शीघ्रंप्रसन्नोभवेत् ५१ इत्युक्तासयथोहरिहरमहाभक्तंचयुक्तंमुनिं सत्कृशंभुपदांबुजा
र्चनरतंसंवीक्ष्यहृष्टोभवेत् ५२ लक्ष्म्यावैगरुडेनपार्षदगणैरुद्राभिषिक्तोत्तमैः नीरैस्तैःस्वशशिरस्यहोभिषिषिचेधन्यंअमन्यन्मुनिं श्री
ईश्वरउवाच लेखाशाखामखमुखशिखिनामाख्ययाभस्मरेखाप्रोक्तास्तावेनखशिखरहिताकुर्यरंगुष्टतोहि तेसर्वेसुखिनाभवंतिगिरिजेते
षण्मुखासोपमाअन्येतद्रहिताश्चदुःखपरमामत्तसुखवर्जिताः ५३ कृतिकृतिमतिहिनादुर्हृदागाविहीनाहीनादीनानिमीनाइवअवित
रलासूरघर्मातुतप्ताः भालेभस्मादिहीनाकृतिमतिविमुखामय्यनेनेकृतांतश्रांतावाताद्वेशिप्रतिजनिविनुताबालवालेयतुल्याः ५४
इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्द्धेमंकणिकोपाख्यानंनामअष्टमोध्यायः ८॥ स्कंदउवाच एवंतपस्यतस्तस्यमंकणस्यमहामुनेः
भस्माभ्यक्तस्यनियतंत्रिपुंड्रालंकृतस्यच १ शरत्सुधांशुधवलंभस्मांगान्निर्गतंमुने ततःस्वांगसमुद्वीक्ष्यत्र्यक्षलिंगार्चनप्रियः २ भस्मनिष्टो
मुदंप्रापशिपिविष्टनिविष्टधीः जपन्श्रीशतरुद्रीयंहर्षवर्षैरतर्पितः ३ पुलकैरुल्लसद्गात्रस्त्रिनेत्रपदभावनः ततस्तुष्टावहृष्टात्मामंकणःफ
णिकंकणं ४ मंकणउवाच अहोमेतपसःसिद्धिःसिद्धाशंभोःप्रसादतः मदंगेभ्योभस्मधाराःशरच्चंद्राकाकराःसदा ५ विनिर्गतामममातीव
प्रमोदामोदतेमनः इत्थंसमंकणस्तत्रविकथंमेरुमस्तके ६ ननर्त्तानंदविवशोमहेशंसस्तुवंस्तदा शतवर्षाणिमुदितोभस्मस्वांगेभिवी
क्ष्यसः ७ मंकणउवाच हेशंभोभगवन्महेशगिरिजाजानेनजानेविभो त्वत्तोहंशशिसंगरंगितमहागंगातरंगोद्यत विद्युत्पुंजसमाधिका
कृतजटाजूटंनिटालेक्षणं वंदेदेवशिखामणिंगरगलोदारंहरंशंकरं मारापारशरादिभीकरकणासारेणसंहारिणं भोभर्गत्रिजगच्छ
रण्यचरणांभोजप्रभाभावतोभस्मोद्धूलितकामिनीवरधृतार्धांगागसंगप्रभो त्वत्तोवेह्मिनचैववक्तुमितसुरोदारंखरंपामरंहारंधीरतरंममे
वहृदयंजानासिशंभोघना वीक्षाशिक्षितमन्मथांतकपुरंदक्षादिदीक्षापहं त्र्यक्षंभिक्षितमोनिपोषितमुमाकांतंक्षपेशांकितं १० उक्षाग
स्थितमप्रमेयविभवाध्यक्षंहिवीक्ष्यैकदाभक्षीभूतगरंभवार्णवहरंयक्षींद्रवाहार्चितं सोमावतंसवरसामसुगीतशंभोनिर्धूतकामगि
रिजापरिपूर्णकाम निःसीमभूममहितभगवन्नमस्तेत्वंव्योमधामगरिमालघिमासमश्व त्वद्धासनंभसितमेवभवादिरोगसंप्रणमनश
मनभेदनमेवशंभो तद्धेषजंभवतिभूतिकरंमहेशपारंअदेतभवसागरतारणाय १२ लिंपन्निर्लिंपपदवीमदवीयसींवैयात्येवतद्भसित शिवं॰
फालतलंसितेन मृत्स्नामलीकृतिलकंत्वलिकेहिविप्रःकृत्स्नमहाघनिचयंसकलंभेतशंभो १३ योनित्यंभसितत्रिपुंड्ररहितोहाआहितोग्राव ९

धोमग्नोयात्यनुवासरंसनिनरांनग्नोविभूतिंविना शावास्थश्यसमंनदीयमधुनादेहंहिदाहोपमंहाहाहंतभवेत्तपातककरंत्रक्षाधुनानेक्षये १४ तस्यानुस्म
णदुर्मुखाधमसुखंदृष्टंचदुःखास्पदंयात्येवानुदिनंसशावजमहास्थश्योपमःस्तकी घोरांयातिचयातनांयमकृतांनिःसीमकामातिगांतस्योद्धार
परंपरासुनहरिर्वाचापतिर्नोसुराः १५ भंडास्तर्कवितर्ककर्कशधियोभस्मत्रिपुंड्रोझिताश्ते सौर्यद्धतबाहुदंडविधृतप्रोच्चंडदंडाहताः धाराखड्गनि
पातिताघममहामुंडादिषंडाकुलाकोदंडोरुशराभिघातसुमहादेहाद्रवंत्यार्त्तवत् १६ याहक्षादक्षशिक्षासुभिन्नसुरगणाध्यक्षसंघुक्षितासाधां
क्षामीक्षाभुजोत्रक्षितिधरशरणावारणाःकक्षमुखाः त्वादृक्षाक्षारहीनाविधिहितनिहितागाधगोधानुयोधानाधवंत्तिद्रुतंतेशरवरगतिदाःत्रक्षरू
क्षाःकराक्षाः १७ मंकणउवाच शिवार्चनपरौकरौशिववि लोकनेलोचनेशिवध्वनिपरेश्रुतीशिवनमोविनोदंशिरः अहोपरमदुर्लभंकिमपिभाग्यम
स्मादृशंशिवेकविषयंमनःशिवपतिव्रताभारती १८ स्कंदउवाच एवंस्तुवंतंनृत्यंतंमंकणंशिवतत्परं शांभवंतेसुराद्दृष्ट्वाविस्मयोत्फुल्ललोचनाः १९
नृत्यमानंजगच्चापिससुरासुरमानवं अथरोत्तरमुद्भ्रांतंशांभवस्यतपस्यया २० नानर्तीदंजगत्किंवाइतिचिंताकुलांतराः पद्मयोनेःसद्मगत्वाप्रोचुर्दृतं
मुनेःसुराः २१ सुराऊचुः पद्मयोनेनमस्तेस्तुलोकसर्जकपाहिनः तर्जमानान्गर्जमानान्वयंभीताःप्रजापते २२ शांभवोमंकणोनामफणिभू
षणपादधीःसभस्मधारणाद्धृष्टोनिष्ठामात्यंतिकींगतः २३ भेरुमौलौसलिंगाग्रेनृत्यत्युन्मत्तवन्मुनिः तेनेदंभ्राम्यतेब्रह्मन्जगत्स्थावरजंगमं २४
अकांडमेवब्रह्मांडंनानर्तीदंनिवारय इत्युक्तःससुरैर्ब्रह्माविचिंत्यमनसाचिरं २५ सुरान्ब्रह्मातदाप्राहभक्तिंवीक्ष्यमुनेस्तदा श्री ब्रह्मोवाच शांभ
वोयंमुनिश्रेष्ठःपूर्वमद्भुतवारकः मयानिवारितुंशक्योवासोमुनिरयंसुराः २६ नशांभवेषुधार्ष्ट्यंमेनविष्णोर्वापिवासुराः अस्यप्रसादयत्नेनभववैद्यंमहे
श्वरं २७ तेनैवशमयिष्यंतिहेत्वेतुवोमानसोज्वरः इत्युक्त्वाससुरैःसार्धंकैलासंशंकरंययौ २८ सुरैश्चविष्णुनाचैवनिरुद्धोनंदिनांतरा तद्वारिसगिरि
स्तत्रगिरांनाथःसुरैःसह २९ रमानाथेनसतदाउमानाथंप्रसन्नधीः तुष्टावविमलोदारवचोभिःशिवमेवहि ३० देवाऊचुः शंभोबालमृगांकशेखरज
टाजूटोरुधीरीरयस्फारोर्वीधरधैर्यदारुणमहागंगातरंगौघहृत् कालांधांतककामदक्षभगदृक्संहारपाद्यनोदेवान्मंकणनृत्तभीतिपरमानाम्वा
सयाद्यप्रभो ३१ प्रालेयाचलकन्यकाविलसितश्रीमत्सदेहप्रभोमग्नसंहरदैन्यनाशकहरत्वत्तोहिनान्यःसुरः धन्यान्नःकुरुपापजन्यसुरनादुःखविह
न्यप्रभोस्वर्धुन्येंदुकलाललामभगवन्त्वंचाप्यनन्यागतिः ३२ भवभूतपतेसुरेषुभावंभवदुःखभुविनाशयाशुभावैःभवभावेनभयंनचैवनोविभवंचापिभ
वेभवापनः अभ्यर्णभवतावकीनचरणंसंत्राणमेवाद्यनोभावोद्यभवकार्णवैकतरणेउदीर्णमेवप्रभो ३३ पाह्यस्मान्छरणायपूर्णदययादीर्णसुरा
णांगणं तूर्णंघूर्णितमेतदद्यसुमुनेःनृत्तंहिनिर्वापय हरिशशिशिखिवाणघोणघूर्णत्रिपुरविदारणशेषभूषणाद्य फणिमणिघृणिकंकणोरुहस्त

प्रमथाधीशसनाथयाश्रुनः ३४ गरगुरुत्वरगोरखोस्तबिम्बत्रिदशानांशिवदुर्दैशाविनाशअविनाशशरीरव्योमकेशजगदाकाशशरीरकोशकाशमुनयः
प्रशमायनाःसदातेशमनाघातपदंहृदाभिधाय समुदायमिमंमुदात्वघानामदनारे किलनाशयंतिशंभो शंभोत्वरंकवसतेःकिलमंकणोयंतुल्य
प्रभोभसितभासितनुःसदेषः ३५ कौचानकस्यसदृशःसुदृशातमीश्यनेवारमाश्रुनटनाज्जगतोवनाय गीर्वाणवर्गकृतसंस्तुतिभिःप्रतुष्टोईष्टेद्दोप्र
निमहोप्यभिद्रुस्तुमेव ३६ यातोदयासुरसयासुरवृंदवंद्योमोदायपर्वतवरात्मजयासमेतः कैलासगोपुरवरान्निरगासुरारिःपादांवुजनुरगवैरिवहांतकं
सं ३७ संदर्शयन्नुरगवैरिवहादिदेवानालोकयन्वृषगतोमुनिलोकनाथ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्द्धेदेवस्तुतोनवमोध्यायः९॥
स्कंदउवाच तत्स्तुत्यातुष्टहृदयोभगवान्गोवृषध्वजः द्रष्टुंमंकणकंसिद्धंस्वयंगौयौविनिर्ययौ १ महापांडरमारुह्यवृषंकैलाससप्रभं त्र्यक्षःशंवर
मूलोद्यत्करनीलसुकंधरः २ गंगातुंगजयामौलिःशशांककृतशेखरः दिव्यभस्मत्रिपुंड्रोद्यत्फालानलविराजितः ३ फणीमणीघृणिलसद्धारहार
हिसज्जलः गुरुणागरजातेननीलीभूतसुकंधरः ४ दंतित्वक्परिवीतांगोव्याघ्रचर्मांबरावृतः वामभागमहादेवीवीक्षितापांगवक्त्रकः ५ नंदिभृंगीमहा
कालस्कंदविघ्नेशसेवितः उदारमकुटीकोटीमणिनीराजितांघ्रिकः ६ गणेंद्रवदनोद्भूतशंखकाहलनिस्वनैः मृदंगढक्काभेरीणामारवोद्धोषितांवरः
७ छत्रचामरमायूरव्यजनात्तकरैर्गणैः पार्श्वतःसेवितःशंभुरययौमंकणांतिकं ८ सुनिर्भरकरोत्स्पष्टपुष्पवृष्टिरभूत्स्वरवात् ननृतुस्तालसाम्ये
नलयेनाप्सरसांगणाः ९ प्रावाद्यंतोरुवाद्यानिगंधर्वाःकिन्नरास्तदा जगुःशिवापदानानिनारदाद्यास्तुंबरः १० विष्णुब्रह्मादिभिर्देवैःजयेशेतिन
तस्तुतः देवाऊचुः देवादिमस्त्वमसिसोमकलाललामःसामादिसंस्तुतपदःश्रुतिसीमभूमाव्योमावकाशमहिमागरिमात्वमीशोसर्वेषुहत्सुलघि
मात्वनोमहेश हेमाचलात्तधनुधाकरसुत्करंतेकामादिदर्पविनिवारकसत्पदंते १२ भामार्धकायमतिसुंदरमीक्षितंनेत्रत्र्यक्षाघनासुरगणेषुभवे
त्कृपाते इत्थंदेवस्तुतिंश्रुत्वातान्वीक्ष्यकरुणादृशा १३ हिमवच्छिखरंप्रापसोपश्यन्दृत्तमद्भुतं मंकणस्यमहादेवःप्रणतोमुनिनास्तुतः १४ पुल
कांकुरितांगोथनृत्यंस्तुष्टावशंकरं गणदेवेषुपश्यत्सुदेवदेवंसमंकणः १५ मंकणउवाच शंभोभर्गभवेदुशेखरमहादेवाव्ययेशानतेपादद्वंद्व
समर्चनार्जितमहाभक्तिप्रभाभावितः भावोहंभवभावपरमानंदांबुधौमग्नधीरुन्मत्तोत्तमधन्यमान्यपदवीमापादितःसादरं १६ हेशंभोशशिखंड
सुंदरजटाकांडोरुविश्राणितत्र्युद्यत्तारपतंगसंगसुमहादिग्वक्त्रभाभावितः पापापारमहांवुसागरमहापानोरुसद्धाडवदिव्येनाद्यदृशांकुरेककरु
णाकोणेनसंवीक्षय मातंगत्वगलंकृतांगगिरिजादेहार्धसंगप्रभोहस्तेबालकुरंगसंगतनलसन्नेत्रेपतंगोत्तम लिंगस्थागमहोत्तमागविधृतागंगा शिवं
शशांकांकनेपादौवैशरणांप्रयामिसततंपापौघभंगायमे १८ उग्रभीमभवभर्गशंकरत्र्यक्षरक्षमरवभक्षवीक्षमां अंधकांतककृतांतनिशीशमोदवे १०

दशिखराश्रयपाहि १९ त्वत्पादरत्नसुमहाधिकयत्नलभ्यंपुण्यासपत्नमघहारिविशुद्धतत्त्वं हृष्टोविशिष्टकरुणारुणशिष्टमिष्टमोजिष्टमष्टत
नवेकरवैनमस्ते २० वस्तुस्वस्तिदमस्तुमेहृदिसदावेदोरुमस्तस्तुतंनिस्तोकंवरहस्तशस्तसुमहाविध्वस्तमोमोहत्तं शूलत्रस्तसमस्तदैत्यनिक
रारंभेणमातंगहृच्छस्तंनिस्तुलमाविरस्तुपरतोध्वस्ताघसंघंपरं २१ भद्राक्षत्र्यक्षपादंफणिमणिघृणियुक्सर्वसंपत्प्रदंवैलेखमौल्युत्थरेखांकि
णमस्तृणयुतंसिद्धसंसिद्धिवंद्यं अरुणिमशरणानांलोकलीलाविनोदंमदसुदितभवानांभावनानाशहेतुं २२ अयन्महिपराजनोमखशतेनते
प्रीतये अयुज्मयदिशांकरत्नवसुयोगमत्यादरात् ददृग्भहिमहापथप्रतिवरोरुदानैरपि दधीमहिहृदासुदातवसरोजपादंसदा २४ अधीमहि
सदाह्यहंसुगममुक्तिमार्गप्रदर्शनश्रुतिशिरोगतंविमलमेवरुद्रंसदा अलेपिभसितंसितंविमलमेवपंड्काकयुक्भवेनसततंभवेभवनवैकभावा
समीहितार्थकलनेस्वांगेचसद्भूषणाः शर्वाणीरमणार्चनासुनियतंधार्याहिमद्भूषणाः ३२ रुद्राक्षस्मृतिमात्रतोप्यघकुलंनश्यत्तपश्यंनरोमुक्तोदेवहिसंस्पृशे
जैनिजराररोगैःस्पृशन्मुक्तिभाक् नामोच्चारणमात्रतोतिकृपणःपाणिंकृपाणेदधन्छिंद्यादेवहिपापदुद्रुमवनंगोदानपुण्याधिभाक् ३३ रुद्राक्षोरुकिरीटकं
उत्तधरत्नसंगदेकंकणेमालाभिर्वरवक्षसाचविमलोभूयाच्छिवेपावनः तस्यानुक्षणमीक्षणेनगिरिजेलोकस्यकष्टंमुदासंहृष्टोनितरांहरामिसततंनत्संग
संगात्मना ३३ यस्मिन्ग्रामपुरेवृतवरविमलादाररुद्राक्षभूषोतिष्ठेत्तत्रनपातकानकभयंदुःखंकृतः तत्रनोतत्क्षेत्रंविमलंतदेवहिशिवागारंवरंशांभवंदेहं त्व
त्यद्दयांव्रजेगिरिजयामद्धासद्दृष्टःसदा ३४ योनित्यंभसितत्रिपुंड्ररहितोरुद्राक्षमालोज्झितः तद्दृष्टंसमलंत्यजंतिविमलाअन्नंचनीरंफलं सोनित्यंशवस्तु
कीपरमुमेपापाहिदृष्टोनरःनित्यंतन्मुखवीक्षणेनगिरिजेसूर्योनिरीक्ष्योजनैः ३५ इतिश्रीशिवरहस्येईशानांशेम्दशमांशेरुद्राक्षमहिमानामद्वाविंशोध्यायः २२
देव्युवाच कस्माज्जातंतुकिंनामकथंवाधार्यतेनरैः नलेभेथमुखान्यत्रकेर्मंत्रैःकथयस्वमे १ ईश्वरउवाच दिव्यवर्षसहस्राणिचक्षुरुन्मीलितंमया पुराभ्यां
चारुलक्ष्याभ्यांपतितानजलबिंदवः २ तत्राश्रुबिंदवोजाताःमहारुद्राक्षवृक्षकाः स्थावरत्वमनुप्राप्यभक्तानुग्रहकारणात् ३ भक्तानांत्रौदिवापापंदिवारात्रिकृतं
हरेत् लक्षंतुदर्शनात्पुण्यंकोटिस्तत्स्पर्शनात्फलं ४ ततःकोटिशतंपुण्यंलभतेधारणान्नरः लक्षकोटिसहस्राणिलक्षकोटिशतानिच ५ तज्जपाल्लभतेपुण्यंनरोरुद्र
द्राक्षधारणात् रुद्राक्षाणांतुरुद्राणांधारणेस्यान्महत्फलं ६ धात्रीफलप्रमाणंयच्छ्रेष्ठमेतदुदाहृतं बदरीफलमात्रंतुमध्यमंप्रोक्तमतेबुधैः ७ अधमंचैकमात्रं
स्यात्प्रक्रियेषामयोच्यते ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चेवशिवाज्ञया ८ वृक्षाजाताःपृथिव्यांतुतज्जातीयाःशुभाक्षकाः श्वेतास्तुब्राह्मणाज्ञेयाःक्षत्रियारक्तव
र्णकाः पीतावैश्यास्तुविज्ञेयाःकृष्णाःशूद्राउदाहृताः ब्राह्मणोबिभृयाच्छ्वेतान्रक्तान्राजातुधारयेत् १० पीतान्वैश्यस्तुबिभृयात्कृष्णाञ्छूद्रस्तुधारयेत् वज्राःस्नि
ग्धादृढाःस्थूलाःकंटकैःसंयुताःशुभाः ११ कृमिदुष्टंछिन्नभिन्नाकंटकाधानमेवच प्रणयुक्तंचर्मकृतंनषड्रुद्राक्षाणिवर्जयेत् १२ स्वयमेवकृतद्वारंरुद्राक्षं

ई.र.पू. स्यादिहोत्तमं यत्तुपौरुषयत्नेनकर्तनंतन्मध्यमंभवेत् १३ सर्वान्स्निग्धान्दृढान्सर्वान्क्षौमसूत्रेणसंयुतान् धारयेत्सर्वगात्रेषुसमास्थानिविचक्षणः १४ निरपेसोमलेखेवय
शिवरहस्य स्यरेखाप्रदृश्यते तदक्षमुत्तमंविद्यात्तद्धार्यंशिवपूजकैः १५ शिखायामेकरुद्राक्षंत्रिशतंशिरसावहेत् षट्त्रिंशतंचगलेदध्यात्बाहोर्द्वादशधारयेत् १६ मणिवंधेतुनावंति
अ० स्कंधेपंचाशतंहरेत् अष्टोत्तरशतंमालामुपवीतंप्रकल्पयेत् १७ द्विसरंत्रिसरंवापिसरणांपंचकंतुवा द्वात्रिंशच्चैवरुद्राक्षान्बिभृयात्कंठदेशतः १८ मकरेकुंडलेचैव
२० कर्णिकाहारकेषुच केयूरकटकेचैवकुक्षिवंधेविशेषतः १९ छन्नवीतिसदाकालंरुद्राक्षंधारयेन्नरः त्रिशतंत्वधमंपंचशतंमध्यममुच्यते २० सहस्रमुत्तमंप्रोक्तमेव
भेदेनधारयेत् शिरसीशानमंत्रेणकंठेतत्पुरुषेणच २१ अघोरेणगलेधार्यंतेनैवहृदयेपिच अघोरबीजमंत्रेणकरयोर्धारयेत्सुधीः २२ पंचाशदक्षग्रथितान्व्योम
व्यापीतिचोदरे पंचब्रह्मभिरंगैश्चत्रिमालापंचसप्तच २३ अथवामूलमंत्रेणसर्वाण्यक्षाणिधारयेत् एकवक्त्रंतुरुद्राक्षंपरतत्वस्वरूपकं २४ तद्धारणात्परेतत्वेली
यतेविजितेंद्रियः द्विवक्त्रंतुमुनिश्रेष्ठअर्धनारीश्वरोभवेत् २५ धारणादर्धनारीशःप्रीयतेतस्यनित्यशः त्रिवक्त्रमनलःसाक्षात्स्त्रीहत्यांदहतिक्षणात् त्रिमुखंचैव
रुद्राक्षमग्नित्रयस्वरूपकं तद्देवहिपरंब्रह्मपुरुषहत्यामपोहति २७ चतुर्मुखंतुरुद्राक्षंपितामहस्वरूपकं तस्यधारणमात्रेणसंतुष्यतिसदाशिवः पंचवक्त्रःस्वयंरु
द्रःकालाग्निर्नामनामतः अगम्यागमनंचैवाभक्ष्यस्यचाभक्षकः २९ मुच्यतेसर्वपापेभ्यःपंचवक्त्रस्यधारणात् षड्वक्त्रमपिरुद्राक्षंकार्तिकेयाधिदैवतं ३० वि
नायकाधिदेवंचप्रवदंतिमनीषिणः सप्तवक्त्रंतुरुद्राक्षंसप्तमंनिधिदैवतं ३१ सप्ताश्वदैवतंचैवमारीसप्तकदैवतं तद्धारणान्महाश्रीःस्यान्महदारोग्यमुत्तमं ३२
महाविज्ञानसंपत्तिःशुचेर्धारयतःशनैः अष्टवक्त्रंतुरुद्राक्षंअष्टमूर्त्यधिदैवतं ३३ वस्वष्टकप्रियंचैवगंगाप्रीतिकरंपरं तद्धारणादिमेप्रीताभवेयुःसत्यवादिनः ३४
नववक्त्रंतुरुद्राक्षंनवशक्त्यधिदैवतं तस्यधारणमात्रेणप्रीणंतेनवशक्तयः ३५ दशवक्त्रंतुरुद्राक्षंयमदैवमुदाहृतं दशाशाप्रीतिजननंधारणेनात्रसंशयः ३६
एकादशमुखंत्वक्षंरुद्रैकादशदैवतं तदिंद्रदैवतंचाहुःसदासौभाग्यवर्धनं ३७ रुद्राक्षंद्वादशमुखंमहाविष्णुस्वरूपकं द्वादशादित्यदैवंचबिभृत्सत्यपरोनरः ३८ त्र
योदशमुखंचाक्षंकामदंसिद्धिदंशुभं तस्यधारणमात्रेणकामदेवःप्रसीदति ३९ चतुर्दशमुखंचाक्षंरुद्रनेत्रसमुद्भवं सर्वव्याधिहरंचैवसदारोग्यमवाप्नुयात् ४० मद्यंमां
संचलशुनंपलांडुंशिग्रुमेवच श्लेष्मातकंविड्वराहंभक्षयन्वर्जयेन्नरः ४१ ग्रहणेविषुवेचैवअयनेसंक्रमेतथा दर्शेचपूर्णमासेचपूर्णेषुदिवसेषुच ४२ रुद्राक्षधारणा
त्सद्यःसर्वपापक्षयोभवेत् भूमावामलकोपमास्तुविहिताद्वात्रिंशवक्त्रोन्नताःकृष्णारक्तसदक्षवर्णकलिताःगौडोद्भवाःशंकरि अन्येचापिभवंतिपुण्यपरमाद्वात्रिंश
जात्यानगादेवप्रार्थनयामयासुविहिताभूभोजनाघोघहृत् ४३ मान्याधन्यास्तएवक्षितितलतिलकावंद्यसंन्यासिनस्तेपापापारभवोदवशमनेपर्जन्यरूपाश्चते शिवं
मूर्धन्याश्चवदान्यकरणानान्यच्छरण्यंसदातेषांशंभुसमर्चनंश्रुतिगतंभस्माक्षसद्धारिणां ४४ इतिश्रीशिवरहस्येईशानाख्येदशमांशेत्रयोविंशोध्यायः २३ स्कंदउवाच २०

कैलासस्थानजन्मानांरुद्राक्षाणांमुनेतदा वक्त्राणांशतसंख्यानांदेवाप्रोक्तासमासतः १ एकवक्त्रेश्वरःसाक्षात्द्विवक्त्रेपार्वतीशिवौ त्रिवक्त्रमनलःसाक्षाच्चतुर्वक्त्रः
पितामहः २ पंचवक्त्रहरिर्विप्रषण्मुखोहंसनातनः सप्तैवलोकसप्तास्येअष्टास्येवसुदेवतं ३ नवास्येनवदुर्गास्ताःदशास्येदशनागकाः एकादशास्येरुद्रादिदेवताः
परिकीर्तिताः ४ द्वादशादित्यदेवस्यंद्वादशास्येप्रकीर्तितं त्रयोदशमुखेचास्येकामदेवसमाह्वयं ५ चतुर्दशास्येतेलोकाःचतुर्दशमुनेतदा शताष्टोत्तरसंख्यानांमुखा
नांदेवतामुने ६ कथयिष्येनुपूर्वेणशिवप्रोक्तंसनातनं मातंगावानराऋक्षागरुडाःपतगास्तथा ७ मुनयोमनवश्चैवलोकाश्चाथचतुर्दश नागानांपतयश्चैवदि
ग्गजापक्षिणस्तथा ८ मरुतोमातरश्चैवपितरोमरुतस्तथा पिशाचायातुधानाश्चनैरृतावायवस्तथा ९ विद्याधराकिंपुरुषानागाःसर्पाश्चपूरुषाःदैत्याश्चराक्षसा
श्चैवममरुद्रगणास्तथा १० सप्तर्षयःसर्वदेवाकर्मदेवाःसनातनाः कलाकाष्ठामुहूर्त्ताश्चनक्षत्राणियुगजातयः ११ मधुश्चमाधवश्चैवऋतवोहायनानथा क्ष
णात्रुटिलवाश्चैवगावोधर्मोप्यधर्मकः १२ सिद्धायक्षामखाश्चैवनदीकालाग्निरुद्रकः भैरवश्चैवचंडीशोमांडकीभांडकिस्तथा १३ वेदाश्चोपनिषद्वर्गाःपुराणानि
तथागमाः रहस्यानितथाखंगानद्योवैसागरस्तथा १४ पर्वताद्वृक्षगुल्माद्यात्रणौषधिलतास्तथा रेणवश्चतथाप्राणाः प्रणवामंत्रजाश्चैवछंदांमंत्राणिमानवा
तथैवाप्सरसःसर्वागंधर्वानागकास्तथा गतागतोपुण्यपापेतथासर्वेकृताकृते १६ इंद्रियाणिमनश्चैवत्वङ्नासंरसधातवः अतीतानागतंचैवभूतभव्यंचवर्तितं १७
तत्वाभिमानिनोदेवाःदिशाकालाश्चसंख्ययोः रुद्राक्षवदनानांचदेवाश्चाष्टोत्तरंशतं १८ प्रोक्ताकैलाससदनरुद्राक्षाणांशिवेमम भूमौचतुर्दशान्येवमुखान्येवभवंति
हि १९ मुखंमुखेषुग्रथितंकिलेदंपुण्यायपापायभवेद्यथान्यथा तत्क्षौमसूत्रैर्मणिभिर्विशिष्टमष्टाकृतैःश्रीनिकरंभवेच्छिवे २० शिरोक्षधृतंनिःशिवेशिरसिजातपापो
घहन्सुवक्षविधृताक्षकैपरजनत्यभोगोद्भवं करादिविधृताक्षकैकरकृतोरुपापापहंभवेतगिरिजेसदातदिहपुण्यवृद्धिप्रदं २१ धृतरुद्राक्षसरेणादत्तदानंपर
मात्वृद्धिमुपैतिदेवलोकेप्रतिगोमाह्यधर्मागतिंनचाप्नुयाद्यदिभस्माक्षधरोद्विजोत्तमोपि २२ आवश्यकंवश्यकरंसदैवरुद्राक्षमेतद्धृतमद्रिकन्ये पश्चाधुना
कश्यपकण्वमुख्येर्धृतंसदादेवगणैर्मुदामे २३ अलंविविधदानतोप्यलमुमेमखादिक्रियाविचारपरमक्रियाविविधवेदवोधैरपि धृतंयदितनौशिवेविम
लभेतदेवाद्यन्यमाक्षमिदमुत्तमंभटितिहृत्तमोनाशयेत् २४ त्रियंवकेनमनुनाविधृतंयदाक्षंवर्णीगृहीवनपरोपिनरस्सदैव पंचाक्षरेणसधवाविधवापिदे
वितत्कंठमध्यविधृतंवरमंगलंस्यात् २५ तोरणैवयतेःवदंतिनिगमारुद्राक्षमालाधृतंतत्यक्त्वानिगमोत्तमांगवचसांसारंलसप्राप्नुयात् ज्ञानांगंत्विदमेववोध
दमहामुक्तेर्हिमार्गप्रदंप्रातर्धारितमद्रिजेसवरकंनैशत्वघंनाशयेत् २६ मध्यान्हेपिततोपिपूर्वमघहृत्सायंतनेजन्महृत्नैशोततशशिशेखरार्चनमतिंदद्या

दुमेपावनं द्वात्रिंशत्कंरभागेधृतमगननयेभ्रूयुगेचैकमक्षंमूर्ध्नीधारितमक्षविंशतियुगंबाह्वोस्तथाषोडश २७ षट्कंहृत्सुमेधृतंहिकरयोःषट्कंडलेमंडलेमंडने
वक्षस्यष्टाधिकोक्तशतमतिविमलाचाक्षमालामुदेमे रुद्राक्षहीनवपुषंनसमक्षमीक्षेचक्षुश्रवोरुवरमन्युजकोपरूक्षैः नंदक्षयाक्षिनितरामरिपक्षमीक्षेकक्षेग्निसिद्धि
रिवमेसभवेत्क्वणक्षैःशतंनियुतमेविकेप्रयुतमेवधार्यंनरैःसहस्रमथलक्षकंविमलमेवरुद्राक्षकं २९ सकोटिविधृतंशिवेदधदपारपुण्यंशिवे हरिविधिभावदंश
तमखस्यसाम्राज्यदं वलक्षंरुद्राक्षंद्विजजनुभिरेवेहविहितंसुरक्तंक्षत्राणांप्रकथितमुमेपीतमसकृत् ३० ततोवैश्यैधार्यंप्रतिदिनकमावश्यकमहोतथाकृष्णंशूद्रैः
श्रुतिगदितमार्गोयमगजे नवर्णंसंसिद्धिरुमेविशिष्टारुद्राक्षमेतद्वरशिष्टधार्यं वर्णैस्तथैवाश्रमतत्परैर्नरैस्त्रीभिश्चधार्यंवरमक्षजातं ३१ धृतसितभसितत्रिपुंड्रफाला
वररुद्राक्षमहांगशोभिमालाः सततंशिवनामसक्तिशीलाशिवमेवप्रवदंतितेविशालाः ३२ इतिश्रीशिवरहस्येईशानारव्यदशमांशेचतुर्विंशोध्यायः २४ स्कंदउवाच
विधिरीशेनकथितोरुद्राक्षस्यसुव्रतोमुने शिवेनोक्तंसमासेनतद्धारणविधौसदा १ पुण्योयंशिवसंवादोदेव्यैदेवेनचोदितः रुद्राक्षवक्षसांनित्यंशिवःसाक्षात्प्रसीदति २
रुद्राक्षंप्रथमंधृत्वाकर्मकुर्यादतंद्रितः भस्मवद्धारणाविधिःकेचिन्नेयंवकोदितः ३ सर्वाश्रमाणांवर्णानांस्त्रीशूद्राणांशिवाज्ञया धार्याःसदैवरुद्राक्षायतीनांप्र
णवेनहि ४ दिवाविभ्रद्रात्रिकृतंरात्रौविभ्रन्दिवाकृतं प्रातःमध्यान्हसायान्हेविभ्रन्तत्पूर्वपातकैः ५ सद्यएवविमुच्येतपित्रहोमार्चनाविधौ रुद्राक्षधृक्नरोनि
त्यंततद्दशगुणंफलं ६ प्राप्नोतिशिवसारूप्यंएषात्रविहितोविधिः देवदेव्याश्चसंवादःकैलासेविदितोमया ७ तत्तेहंसंप्रवक्ष्यामितन्मेनिगदितंशृणु यच्छ्रुत्वास
र्वैपापेभ्योमुच्यतेभवसागरात् ८ सर्वेषांसर्वपापानांशामकोयंमुनेसदा नारुद्राक्षधरेणपूजितमुमेलिंगंनमुक्तिप्रदंकर्वंतेनविवर्जितोत्रमनुजोनोतस्यविंदेत्फलं ९
निंदन्नपिसदाक्षधारिणमथोयात्येवरौरवंतेनसंरक्षःक्रिमिभिःक्षतांगरुधिरोमज्जेत्सविश्वाहदे स्नानेसंध्यासुतीर्थेपितृतिथिसुविधौहोमकालेप्रदोषेदोषघ्नेत्विर
मेवतर्पणविधौधार्यंविभूत्यासमं तन्न्यूनाधिकताभवेनयदिचेत्संपूर्णमेतद्भवेत् रुद्राक्षोत्तमधारणेनगिरिजेसत्यंत्रिसत्यंवदे ९ वर्णीवनीगृहीयतिःनियमेनधार्यंए
तद्रहस्यपरमेनहिजातुतिष्ठेत् रुद्राक्षधारणमिदंसुकृतैश्चलभ्यंत्यक्तेदमेतदखिलानरकंप्रयांति १० यद्दृशंभवनेभसितैकचारुरुद्राक्षकुंडललसत्कवचो
रुवक्षाः तंपक्षपातसुहृशाप्यतिपापयुक्तंप्रक्षोनिरीक्षतिमुदापितृभिःकरालैः यस्तूर्ध्वपुंड्रमलिकेपिविभूतिपापसंतापतप्तहृदयोपिसदाभवानी रुद्राक्षकंठव
लयोपिसहारवक्षाकक्षाग्निमध्यपरिवर्तितनुर्भवेत १२ देवास्तन्मुखसंख्ययासुविहितातस्यप्रसन्नाःशिवेसन्नाएवभवंतिपापगिरयस्तस्यारयोदुःखिताःरुद्राए शिवं
वभवंतिरुद्रपरमारुद्राक्षवक्षासदारुद्राक्षोत्तमवक्षसासुजपतोमंत्रोविशिष्टार्थदः १३ तन्मानाकृतसंख्ययाचविहितोनित्यंशिवेपावनः तस्मामेयफलंभवेत २१

सततंमद्रुद्रपंचाक्षंस्वाहृत्वाभसितेनंदेहगतकेनायुष्यहृद्धिर्भवेत् १४ विष्णुब्रह्मासुरायेपितृमुनिनिवहाःतन्नमस्यंतिदूराद्रुद्राक्षोत्तमवक्षसंद्विजवरंनी
चंजनंवाशिवे तद्दृष्ट्याभिभवंतिराक्षसगणाःप्रेताःपिसाचास्तथारक्षंत्येवसदामुदासुकृतिनंरुद्राक्षयुक्तंनरं १५ संक्रांतावयनद्वयेशशिरविग्राहेसुपर्व
स्वपिधार्यत्वेवनदुर्शंनिचश्रुतिगिरोपुण्यंपहिरुद्राक्षकं आयुष्यंलिहपञ्चमग्र्यगतिदंत्वप्रियस्यान्नरोस्वर्गंपापहरंसदैवविधृतंकिंवच्मितत्तेफलं १६ एका
क्षंकलितंमृदापिविमृश्यात्पुण्यंतुरुद्राक्षकंतस्यानंतमहाघसंघगिरयःकंपंतिभिंदंत्यपि साक्षाद्दक्षमुखेस्ववक्षसिधृतंत्र्यक्षप्रसादाद्गतिंप्राप्यानुक्षणमक्षि
फालसुगिरिंप्राप्नोसलक्षोनरः १७ अर्वागामलकात्त्वेतालघुतराःक्षुद्रास्ततोप्यंचिकेसंहृष्टाक्रिमिभिःतनूवकिणैःछिद्रेणहीनास्तथा धार्यानैवमु
भेच्छुभिः चणकवद्रुद्राक्षमप्यंततोरुद्रादौममलिंगमंगलमुखेसुपुण्यप्रशस्तंसदा १८ स्वर्णेनापिचराजतेनगिरिजेताम्रेणवामौक्तिकैःरत्नैर्विद्रुमस्फा
टिकाक्षमणिभिर्मध्यास्थितैर्धारयेत् नान्यत्स्तकशवयोर्मलजलोत्सर्गेतथासंगमेधार्योनोत्तममालिकाश्रुतिगताविप्रैस्तदेवादरात् १९ इतिश्री
शिवरहस्येईशनाख्येदशमांशेरुद्राक्षमहिमानामपंचविंशोध्यायः २५ स्कंदउवाच कैलासशैलसदनेदेव्यापृष्टोमहेश्वरः शतरुद्रीयमाहात्म्यमभि
षेकजपक्रमं १ अतिरुद्रमहारुद्रविधिमेकादशावृत्तेः जपाधिकारिणंचापिप्रोक्तवान्परमेश्वरः २ तत्तेहंसंप्रवक्ष्यामित्वमिहैकमनाःशृणु जैगीषव्यउवाच
कथंदेव्यापुरापृष्टोशिपिविष्टोष्टदेहकः श्रीरुद्रमंत्रमाहात्म्यमुक्तवान्तज्जपेविधिं तन्मेविस्तरतोब्रूहिनिस्तारायभवार्णवे ४ सूतउवाच जैगीषव्यवचःश्रुत्वा
सुब्रह्मण्योविकासुतः दैमेदेवेनकथितमुवाचविधिविस्तरं ५ सुब्रह्मण्यउवाच कैलासशिखरेदेव्यापृष्टोरुद्रविधिर्हरः संतुष्टेनेवमनसाप्राहदेवोमहेश्वरः
६ उमोवाच देवदेवमहादेवशूलपाणेजगत्प्रभो श्रीरुद्राणांचमहात्म्यंवदमेकरुणार्णव ७ अभिषेकजपेचैवमहारुद्रातिरुद्रके पुण्यपापहराशंभो
श्रुतिर्मेयाजुषीवरा ८ पापानांनाशिनीदेवरुद्रैकादशिनीविधिः श्रीस्कंदउवाच तदादेव्यावचश्रुत्वाप्राहदेवोमहेश्वरः रुद्रातिरुद्रमाहात्म्यंजाप्येचै
वाभिषेचने ९ ईश्वरउवाच शतरुद्रीयमाहात्म्यमधुनासंप्रवक्ष्यते यस्यविज्ञानमात्रेणपापनाशःप्रजायते १० ऋग्वेदेचयजुर्वेदेसामाथर्वणवेदके
सारात्सारतरंपुण्यंशतरुद्रीयमीरितं ११ श्रुतस्याध्ययनंयस्यस्यादधीतस्यनाशनं सर्ववेदवाह्यइत्युक्तःसर्वकर्मवहिष्कृतः १२ दैवेपित्र्यादिकालेषु
नसयोग्यःकदाचन यस्यायातिमहाविद्याशतरुद्रीयनामिका १३ तेनाभ्यस्ताचतुर्वेदाअनधीताअपिद्विजाः जप्यतेशतरुद्रीयंयेननित्यंद्विजोत्तमाः
१४ सएवदेवपित्र्यादिकर्मयोग्योनसंशयः उपास्यनित्यंगायत्रींप्रजप्त्वाशतरुद्रियं १५ ब्रह्मर्षित्वमयंप्राप्यब्रह्मभूयायकल्पते त्यक्तायःशतरुद्रीयंअ

ई.र.पू.
शिवरहस्य
अ०२६
२२

न्यजप्तुमिहेच्छति १६ सगृहेपायसंत्यक्त्वाभिक्षामटतिदुर्मतिः त्यक्त्वायःशतरुद्रीयं० तयक्तस्थजलेत्यक्त्वामृगतृष्णासु धावति १७ त्यक्त्वायःशतरुद्री० कामधे
नुपयस्त्यक्त्वाखरक्षीरंप्रधावति १८ त्यक्त्वायःशतरु० सहेमभारंत्यक्त्वासौअयःपिंडंप्रधावति १९ यथेंद्रजालिकालाभाक्षणमात्रसुखावहा एवमस्मादपरावि
द्यास्ताहशामुनिपुंगवाः २० वेदानामपिशास्त्राणांपुराणानामपिद्विजाः शतरुद्रीयमाहात्म्यंकथनात्तदुपास्यतां २१ ब्रह्मादयःसुराःसर्वेवसिष्ठाद्याऋषी
श्वराःसनकाद्याश्चयोगींद्राःजीवन्मुक्ताःशुकादयः २२ ब्रह्मर्षयोमरीच्याद्यानारदाद्याःसुरर्षयः यक्षकिंनरगंधर्वसिद्धविद्याधरादयः २३ प्रजप्त्वाशतरुद्रीयं
श्रुतिसारमहोदयं अवाप्यसकलान्कामान्जपंत्यद्यापिसर्वदा २४ कृतेयुगेतुऋग्वेदमंत्राजप्याःसदाद्विजैः अथर्वांगिरसाविद्याजप्यात्रेतायुगेसदा २५ प्रजप्तव्या
निसाक्षानियुगेद्वापरनायके प्रजप्तव्यायजुर्वेदोयुगेस्मिन्कलिनामके २६ वेदाःसर्वेपिजप्तव्यायुगेषुत्रिषुचद्विजाः शतरुद्रीयमभ्यस्येत्सततंनियमेवयः २७ सए
वविप्रोलोकेषुपूज्योवंद्योनसंशयः सव्रतीसतपस्वीचसलोनमःसयतिप्रियः २८ सचाचार्यःसक्षतिमान्सज्ञानीसचसाधकः सयज्वासचपूतात्मासदेवज्ञःसमांत्रि
कः २९ सयोगीसचदेवर्षिःसब्रह्मर्षिसुरोत्तमः सब्रह्मासविधाताचसविष्णुःशंकरोद्विजाः ३० तत्कुलंपावनंनित्यंधन्यातज्जननीसदा तत्पिताचकृतार्थस्या
न्मुक्तास्तत्पितरोद्विजाः ३१ पुण्यास्तद्देशजाःसर्वेपूतास्तन्मित्रबांधवाः किमत्रबहुनोक्तेनसारंवक्ष्येमुनीश्वराः ३२ शतरुद्रीयजप्तारंदृष्ट्वास्पृष्ट्वास्मरन्नपि संभाष्यवा
समाप्नोतिराजसूयाधिकंफलं ३३ यस्मिन्देशेस्थितोविप्रःशतरुद्रीयजापकः दिव्यक्षेत्रंतदुद्दिष्टंसमंताद्योजनायुतं ३४ तत्रैवदेवास्तिष्ठंतिवेदायज्ञाःसमंत्रकाः
मुनयःसिद्धयस्तत्रऋषयःपितृभिःसह ३५ इदंचपरमंश्रेयः इदमेवपरंतपः इदमेवपरंतीर्थमिदमेवमहाद्भुतं ३६ इदमेवपरादीक्षा इदमेवपरागतिः इदमे
वपरोयोगः इदमेवपरंसुखं इदमेवपरंपुण्यमिदमेवमहाफलं अयमेवसदाचारः अयमेवमहामखः ३८ अयंसर्वोपनिषदांसारभूतार्थसंग्रहः निर्मलंनिर्गुणं
नित्यंनिष्कलंचनिरंजनं ३९ अनंतमव्ययंज्योतिर्मनोवाचामगोचरं आदिमध्यांतरहितंसर्वभूतहृदिस्थितं ४० स्वप्रकाशंपरंब्रह्मसत्यानंदचिदात्मकं सततंशत
रुद्रीयंजपात्साक्षात्प्रकाशते ब्रह्महत्याशतंवापिसुरापानशतंतुवा मातृहत्यादिकंवापिपितृहत्यादिकंतुवा ४२ शतरुद्रीयजपतोविनश्यतिनसंशयः शतरुद्रीय
मभ्यस्यनियतोनियताशनः ४३ पुत्रपौत्रमतीं वृद्धिमणिमादिगुणान्वितां अवाप्यजीवन्मुक्तःसन्विद्यतेनात्रसंशयः ४४ नाष्टांगयोगाभ्यासेननदानेननचेज्यया
नवेदैर्नागमैःशास्त्रैःनपुराणैःसुविस्तरैः ४५ गतिर्भवतिमर्त्यानांशतरुद्रीयजापिनां वेदसारमिदंगुह्यंपावनंसर्वदेहिनां ४६ महापापक्षयकरंमहापुण्यफलप्रदं शिवं
यजुर्वेदेचतुर्थेस्मिन्कांडेप्रश्नोहिपंचमः ४७ अस्मिन्प्रश्नेशतरुद्रमंत्रास्तिष्ठंतिसिद्धिदाः तस्मादेतद्धिदसारंशतरुद्रीयमीरितं ४८ शतरुद्रीयजपतोब्रह्मसाक्षा २२

त्प्रकाशते जातिस्मरत्वमासाद्यभवेत्साक्षात्परः शिवः ४९ शतरुद्रीयमाहात्म्यंकिंचिदेतन्मयोदितं सर्वपापप्रशमनंकिंभूयः श्रोतुमिच्छथवेदक्षीरमहार्णवोद्यसद्
धिप्रोद्धृतसुमंथानवश्रीरुद्रांतरमध्यसंस्थितमहापंचाक्षराहृत्तिभाक् तन्मध्यस्थशिवाभिधानमसकृज्जप्त्वाजनोमुक्तिभाक् योग्यापाशुप्यमुमस्तुतेसयजुषामध्यार्थ
साराद्रोद्भूरात्पापमपाकरोतिसततंशंभोःप्रसादात्सदैव ५१ इतिश्रीशिवरहस्येईशानाख्येदशमांशेषड्विंशोध्यायः २६ मुनिरुवाच भगवन्सर्वतत्त्वज्ञस्कंदशंकरसं
भव कांडेचतुर्थेयजुषिप्रश्नेस्मिन्पंचमेशुभे १ रुद्रमंत्राःशतंतस्माच्छतरुद्रीयमुच्यते नामानिश्रोतुमिच्छामितेषांस्कंदमहामते २ सूतउवाच जैगीषव्यवचःश्रुत्वा
स्कंदःसद्दितितारकः नमस्कृत्यमहादेवंप्रवक्तुमुपचक्रमे ३ स्कंदउवाच शतरुद्रीयमाहात्म्यंभूयोवक्ष्यामितच्छृणु यस्यविज्ञानमात्रेणसिद्धिःकरतलेस्थिता ४
वेदेषुशतरुद्रीयंदेवतासुमहेश्वरः क्षेत्रेषुचाविमुक्तंमेमंत्रेपंचाक्षरोवरः ५ नृणांयथाद्विजोमुख्योद्विजेष्वपिचशांभवः पापनाशकरंविप्रयथाभस्मैवपावनं ६
भूषणेषुयथामुख्यंरुद्राक्षंपावनंद्विज पुराणेषुयथास्कांदंसर्वस्मृतिषुमानवी ७ यथाप्रमाणंमानानांश्रुतिरेवसनातनी इतिहासेषुपरमंयथाशिवरहस्यकं ८
शतमस्मिन्महामंत्राःसन्तिसंतिभुविदुर्लभाः ऋषिछंदोदेवताभिर्विनियोगैःसमन्विताः ९ जपेत्समग्रंनमकंसमग्रंचमकंतथा रुद्रमित्युच्यतेसद्भिःमहाघौघविनाशनं
१० नमकंचमकंचैकेनानुवाकयुतंजपेत् एवमेकादशावृत्त्यारुद्रैकादशिनीस्मृता ११ रुद्रैकादशिनींजप्त्वानैथैकादशिनींपुनः श्रीरुद्रमितिविद्वद्भिःकथ्यतेभुक्तिमु
क्तिदं १२ श्रीरुद्रैकादशावृत्त्यामहारुद्रमुदाहृतं तथैकादशधाजप्त्वामतिरुद्रमितिस्मृतं नामधेयानिवक्ष्यामिमंत्राणांचपृथक्पृथक् सोमबीजादिकोमंत्रःप्रथ
मःपरिकीर्तितः १४ वामदेवर्षिसंयुक्तोद्वात्रिंशार्णउदाहृतः सांवाख्यदेवतायुक्तोनुष्टुप्छंदोष्टसिद्धिदः १५ पवनादिस्त्रितीयस्याद्दैवतंछंदसान्वितः अंतर्यामीऋ
षिःसांवशिवदेवीष्टसिद्धिदः १६ चतुर्थोवायुबीजादिरनुष्टुप्छंदसान्वितः अभीष्टसिद्धिदःप्रोक्तःस्कंदर्षिस्त्रिपुरांतकः १७ अमृताद्यादिमोमंत्रोगायत्रीछंदसा
वृतः तथैवसप्तचत्वारिंशद्वर्णोभीष्टसिद्धिदः १८ चतुर्मुखादिचमकश्चत्वारिंशाक्षरोमनुः त्रिष्टुप्छंदयुतःषष्ठोभार्गवर्षिसुरोत्तमः १९ रविर्दैवतकोमंत्रोत्रिंशत्सप्तद
शाक्षरः भार्गवर्षिसमायुक्तोगायत्रीछंदसावृतः सृष्टिकर्त्रादिमोमंत्रोभीष्टदःसंप्रकीर्तितः मूलादिमोमहामंत्रःकण्वर्षिर्भयनाशनः २१ पंक्तिछंदसमायुक्तोनील
कंठःसुरोष्टमः अग्नीबीजसमायुक्तोवायुबीजादिमोमनुः २२ दधीचिऋषिसंयुक्तःछंदसानुष्टुभान्वितः त्रिपुरांतकदेवोसौनवमःशत्रुनाशनः २३ विष्ण्वादिदेवता
युक्तोदशमोगायत्रीयुतः सहस्राक्षोसुरःशत्रुक्षयकृद्दशमोमनुः २४ अमृतादिमहामंत्रःपंक्तिछंदसमन्वितः कपर्दिदेवःकण्वर्षिःसदाविजयसिद्धिदः २५ अग्न्या
दिस्तुमहामंत्रऋषिर्नारदसंयुतः गायत्रीछंदसायुक्तोरविरूपसुरस्तथा २६ आयुरारोग्यसंसिद्धिप्रदोद्वात्रिंशदीरितः मकरांत्याइमाविद्याद्दधीचिऋषिसंयुता २७

देवतंछंदसायुक्ता पिनाकीसुरसंयुता त्रयोदशीतिकथिता सोविजयदायिनी २८ मरुद्रादिमहाविद्यापंक्तिछंदसमन्विता पिनाकीदेवतायुक्ता गौतमोऋ
षिसंयुता २९ चतुर्दशेतिकथिता वैश्यादिमप्रदायिनी नमोहिरण्यपत्यारभ्य सत्वनांपतयेनमः एतत्पदांता विद्यास्यात्पार्वतीशसुरःस्मृतः ३० चतुर्मुखर्षिसंयु
क्ताविराट्छंदसमन्विता अनुवाकश्चतुर्थःस्याद्विद्यासप्तदशोस्मृता ३१ कुमारर्षिसमायुक्ता बार्हतंछंदसायुता महादेवासुरःसर्वगृहदेवनिवारिणी ३२ अ
ष्टादशेमहाविद्या अनुवाकस्तुपंचमः गणेशर्षिसमायुक्तो त्रिष्टुप्छंदसमन्विता ३३ महारुद्रसुताःसर्वसिद्धिदाज्ञाननाशिनी षष्ठोनुवाकएकोनविंशोमंत्रः
सईरितः ३४ सविश्वर्षिसमायुक्तः त्रिष्टुप्छंदसमन्वितः परमेश्वरदेवोसौ सर्वसंपत्प्रदायकः एकविंशोमहामंत्रो ह्यनुवाकस्तथाष्टमः वामदेवर्षिसहितोज
गतीछंदसमन्वितः ३६ उमामहेश्वरसुरश्चिंतितार्थफलप्रदः एतन्मध्यगता विद्याशैवपंचाशदीशुभा ३७ ब्रह्मविद्याभुक्तिमुक्तिदायिनीसर्वसिद्धिदा वामदे
वर्षिसहितापंक्तिछंदसमन्विता ३८ सत्यानंदचिदाकारासांवशंकरदेवता एतन्मध्यगतातत्रविंशत्संख्यामुनीश्वराः ३९ वामदेवर्षिसंयुक्तात्रिष्टुप्छंदसम
न्विता अथग्रहानुवाका आमालामंत्रस्वरूपिणी ४० वीरभद्रर्षिसंयुक्ता त्रिष्टुप्छंदसमन्विता महेश्वरसुराभीष्टसिद्धिदाहेमसिद्धिदा ४१ एतन्मध्यगतामं
त्रास्त्रयस्त्रिंशत्फलप्रदाः वेदव्यासर्षिसहिताःपंक्तिछंदसमन्विताः ४२ नमोवर्णप्रथमामीवल्केभ्यइत्यंतसंयुता श्रीरुद्रर्षिसमायुक्ता गायत्रीछंदसान्विता ४२
सर्वप्रथमसंस्तुत्यसांवशंकरदेवता महासिद्धिप्रदासासाछंकरत्वप्रदायिनी ४३ द्रापेअंधसइत्येषा मुनिब्रह्मसमन्विता गायत्रीछंदसायुक्ता स्कंददेवतसंयु
ता ४४ दारिद्र्यनाशनकरी परमैश्वर्यदायिनी यातेरुद्रेतिविद्यास्यात्सूर्यनारायणात्मिका ४५ गायत्रीछंदसायुक्ता भार्गवर्षिसमन्विता सर्वरोगक्षयकरी
मनश्चिंतितसिद्धिदा ४६ इमामितिमहाविद्याशंकर्षिसमन्विता विराट्छंदोयुतासोखसिद्धिदारुद्रदेवता ४७ मृडानोरुद्रविद्यास्यात्संकर्षणमुनिस्तुता
कालाग्निरुद्रदेवीस्याज्जगतछंदसान्विता आधिव्याधिहरंनृणांदीर्घायुष्यप्रदायिनी मानोमहांतमित्येषाविद्यासूर्यर्षिसंयुता ४९ सांवशंकरदेवेशक
कुछंदसमन्विता मातृपितृसुतभ्रातृवियोगक्षयकारिणी ५० मानस्तोकेमहाविद्यावरुणर्षिसंयुता रुद्रदैवतसंयुक्तादेवतछंदसान्विता ५१ गर्भपात
क्षयकरीसुतायुष्यविवर्धिनी आरात्तेगोघ्नइत्येषाविद्याब्रह्मर्षिसंयुता ५२ गायत्रीछंदसायुक्ता शिवदेवतसंयुता अजागोमहिषीमत्तगजाश्वत्राणका
रिणी ५३ तुहिश्रुतमितिह्येषादक्षिणामूर्तिदेवता ऋषिःप्रजापतिस्तुत्या गायत्रीछंदसान्विता ५४ अज्ञाननाशनंसर्वविद्यासिद्धिप्रदायिनीपरिणः
प्रथमाविद्याकण्वकऋषिपूजिता रुद्रदैवतसंयुक्तानिवृज्ञायत्रसंयुता मीढुष्टमेतिविद्यास्याद्विवस्वदृषिसंयुता ५६ साक्षात्कारकरीशंभोगायत्रीछं

दसान्विता विकिरिंदेमहाविद्यामुनिब्रह्मप्रपूजिता गायत्रीछंदसायुक्तावीरभद्राधिदेवता सहस्राणिसहस्रेतिविद्याभद्रर्षिसंयुता ५८ विराट्छंदःसमायु
क्तापरशंकरदेवता सहस्राणीतिविद्यास्याच्चतुर्वर्गफलप्रदा ५९ वीरभद्रर्षिसंयुक्तामहारुद्राख्यदेवता विराजोछंदसायुक्तायद्वासर्वत्रपूजिता ६० अस्मिन्
महत्यादिविद्यानीलग्रीवाधिदेवता पराशरर्षिसहितागायत्रीछंदसान्विता ६१ नीलग्रीवाइतिप्रोक्तामहाविद्याफलप्रदा कपिलर्षिस्तुतावामदेवदेवा
निवृद्युता ६२ येभूतानामधीपेषांमार्कंडेयमुनिस्तुता मृत्युंजयाख्यदेवीस्याद्गायत्रीछंदसान्विता ६४ यएतावंतइत्याद्याविद्याश्रीरुद्रदेवता ऋषिकण्वसमभ्यर्च्य
जागतछंदसान्विता ६५ नमोरुद्रेभ्यइत्येषाविद्याश्रीरुद्रदेवता संकर्षणमुनिस्तुत्यागायत्रीछंदसान्विता ६६ सर्वाधिव्याधिशमनीचतुर्वर्गफलप्रदा एताविद्यामयाख्याताशत
रुद्रीयमध्यगा ६७ एकादशोनुवाकेभ्योविद्याशतमजायत समग्रंनमकंमालामंत्ररूपंद्विजोत्तमा ६८ शतरुद्रीयमित्युक्तंवेदसारंमहोदयं शांत्यर्थंशंचमेसूक्तंपठि
त्वारौद्रिद्विजोत्तमाः ६९ प्रजपेच्छतरुद्रीयंत्रयीसारमनुत्तमं मयैषांसर्वमंत्राणांछंदस्योदितमीरितं ७० उक्तानिनामधेयानिमहात्म्यंवक्ष्यतेपुनः मल्लिंगंवाभिवीक्ष्यरुद्र
जनमोवाकेष्वस्तुवन्मक्तितः शंभुंशांभवसत्तमोत्तमपदंप्राप्नोतिरुद्रंजपन् रुद्रेणप्रणमन् प्रदक्षिणविधिंकुर्वन्महापातकैःमुक्तश्रीशतरुद्रमंत्रजपकृच्छंभोस्थांते
गणः ७१ इतिश्रीशिवरहस्येईशानाख्येदशमांशेसप्तविंशोध्यायः २७ श्रीस्कंदउवाच शतरुद्रीयमाहात्म्यपुनर्वक्ष्येमुनीश्वर शृणुष्वश्रद्धयायुक्तोपदिष्ठसि
भवक्षयं १ शांत्यर्थंशंचमेसूक्तंजप्त्वादौमुनिपुंगव प्रजपेच्छतरुद्रीयंसमग्रंनमकंतथा २ शंभोरुपासनापंचविधाप्रोक्तामहर्षिभिः अस्मिन्समग्रेनमकेनामानि
त्रिशतंद्विज ३ तिष्ठंतिश्रुतिसाराणिभुक्तिमुक्तिकराणिहि एतैर्योनामभिर्लिंगस्थावरेजंगमेपिवा ४ पूजयेत्सामहापूजातथाप्रीणातिशंकरः मयोक्तैःशतसंख्या
कैःमंत्रैःशंकरदेवतैः ५ छंदर्ष्यादिकमुक्त्वादौज्वलितेजातवेदसि स्वाहांतैर्जुहुयाद्द्रापेदन्नममकथ्यते ६ एवंहोमेनगौरीशःप्रीणातिफलदायकः तर्पयेच्छ
तरुद्रीयमध्यगैःशतमंत्रकैः ७ श्रीरुद्रंतर्पयामीतिप्रोच्चरन्सुसमाहितःउपासनात्तृतीयास्यादितिसर्वफलप्रदा ८ न्यासस्यान्मंत्रसंनाहोन्यासहीनोनसिद्धि
दः बोधायनकृतंस्तोत्रंशतरुद्रीयदीपनं ९ बोधायनोक्तमार्गेणन्यासंकृत्वाविचक्षणः प्रजप्त्वाशंचमेसूक्तंआदौविघ्ननिवृत्तये १० समग्रनमकस्यास्यवेदसार
सब्राह्मणःसवामदेवयोघोरः ऋषिरित्युच्यतेबुधैः ११ छंदांसिचास्यगायत्रीपंक्त्यानुष्टुभएवच जगतीबृहतीचेतिदेवताकथ्यतेततः १२ जपाकुसुमसाहस्रसंनि
भेसूर्यमंडलेमध्यरूपीविराड्रूपीविधिविष्णुशिवात्मकः १३ योसावादित्यपुरुषःश्रीरुद्राख्यःपरःशिवःपरमेशःसविज्ञेयःशिवःसत्यंचिदात्मकं १४ समग्रनम
कस्यास्यकथितंदैवतंद्विजाः प्रीत्यर्थंपरमेशस्यविनियोगउदाहृतः १५ ऋषिछंदोदेवतानिविहितानिसमाहितः ध्यायेन्निरामयंवस्तुसर्गस्थितिलयाधिकं १६

ई०द०पू०

शिवरहस यदेषव्यवहाराणांआधारंप्रकृतेःपरं निर्गुणंनिष्कलंनित्यंमनोवाचामगोचरं १७ परंतेजोहमस्मीति ध्यात्वैवंद्विजपुंगवाः सगुणंहृदये ध्यायेद्ब्रह्मरंध्रेथवाप्रभुं १८
अ०२९ शुद्धस्फटिकसंकाशंमध्यान्हादित्यसंनिभं स्वसंवेद्यमनाद्यंतंश्वेतपद्मासनप्रभं १९ गंगाधरंशशिकरंजटामुकुटभूषितं श्वेतभूतित्रिपुंड्रेणविराजितललाटकं २०
२४ लोचनत्रयसंपन्नंस्वर्णकुंडलशोभितं विंबाधरंचतुर्बाहुंमुक्ताहारोपशोभितं २१ अक्षमालांसुधाकुंभंचिन्मयांमुद्रिकामपि पुस्तकंचभुजैर्दिव्यैःदधानंपार्वतीपतिं २२
शुक्लयज्ञोपवीतेनश्वेतवस्त्रेणशोभितं श्वेतांबरधरंश्वेतंरत्नसिंहासनेस्थितं २३ वीरासनेसमासीनंविराड्रूपिणमीश्वरं संतप्तहेमरुचिरंस्वंगुलीयकभूषितं २४ मुक्ता
माणिक्यसौवर्णकांचीदामविराजितं योगिभिःसनकाद्यैश्चस्तूयमानमहर्निशं २५ दातारंसर्वविद्यानांसकलैश्वर्यदायकं सर्वाभीष्टप्रदातारंवटमूलनिवासिनं २६
सत्यानंदचिदात्मानंशंकरंपरमेश्वरं वामांकेसंस्थितांगौरींबालार्कायुतसंनिभां २७ जपाकुसुमसाहस्रसमानश्रियमीश्वरीं सुवर्णरत्नखचितमकुटेनविराजितां २८ ल
लाटपट्टसंराजत्संलग्नतिलकांकितां भ्रमद्भ्रमरनीलाभधम्मिल्लालकशोभितां २९ सौंदर्यजितकामेशकोदंडभ्रूयुगान्वितां राजीवायतनेत्रांतांनीलोत्पलदलेक्षणां ३०
मुक्तामाणिक्यखचितनासिकाभरणान्वितां कुंडलद्वयसंशोभिकर्णयुग्मविराजितां ३१ तांबूलचर्वणरतांनवरत्नविराजितां आढ्यभूषणसौवर्णचित्रकाभरणान्वितां ३२ पत्र
काभरणोपेतांमुक्ताहारोपशोभितां इक्षुकार्मुकपुष्पेषुचापबाणशराकरैः ३३ दिव्यांगुलीयकयुतैःकेयूरयुगलान्वितैः स्वर्णकंकणसंयुक्तैःचतुर्भिःबाहुभिर्युतां ३४ सुवर्ण
रत्नखचितकांचीघंटाविराजितां सौभाग्यभूषणयुतांसूक्ष्ममध्यविराजितां ३५ रक्तचंदनसंलिप्तहेमकुंभोपमस्तनीं रत्नवस्त्रपरीधानांरक्तमाल्यविभूषितां ३६ तनुमध्यां
पृथुश्रोणींशिववामांकसंश्रयां कदलीललितस्तंभसंनिभोरुयुगान्वितां ३७ सुवर्णपादकटकयुगलेनसुशोभितां संतप्तहेमपादांगुलीयकैःसुविराजितां ३८ पूर्ण
चंद्रमुखींअंबांसुस्मितास्यविराजितां ब्रह्मविष्णुमहेंद्रादिशिरोमकुटजानया ३९ श्रियाविराजितपदांभक्तत्राणपरायणां स्वकांतांशंकरंदेवंपुनरप्यरुणीकृतं ४०
सर्वालंकारसुभगंयुवानमतिसुंदरं छत्रेणशोभितंमूर्ध्नेचामराभ्यांविराजितं ४१ ब्रह्मविष्णुमहेंद्रादिवंद्यमानपदांबुजं सृष्टिस्थित्युपसंहारहेतुभूतंसनातनं ४२ अन्यो
न्याश्लिष्टहृद्बाहुंगौरीशंकरसंज्ञितं सनातनंपरंब्रह्मपरमात्मानमव्ययं ४३ नमामिजगतामीशंशंकरंपरमेश्वरं एवंध्यात्वाजपेन्नित्यंशतरुद्रीयमादरात् ४४ चमके
रुद्रसंख्याकाननुवाकान्जपेत्ततः एकवारंद्विवारंवात्रिवारंचमकान्वितं ४५ नमकंप्रजपेदेषाजपोपास्तिरुदीरिता शिवप्रीतिकराश्रेष्ठाश्रीरुद्रैक्यप्रदायिनी ४६ स्था
वरेजंगमेलिंगेसमाहितमनाःशुचिः न्यासध्यानादिसहितंशंचमेसूक्तपूर्वकं ४७ प्रजपन्छतरुद्रीयमभिषेकंसमाचरेत् एकवारंद्विवारंवात्रिवारंचमकान्विता ४८ उपास्तिः शिवे.
पंचमीप्रोक्ताशंभोःप्रीतिकरीशुभा विशेषमंत्रान्वक्ष्यामिशृणुध्वंद्विजपुंगवाः ४९ जप्त्वासमग्रंनमकंशतरुद्रीयमुत्तमं चमकास्यानुवाकस्यचैकमेकंततोजपेत् ५० रु २४

रुद्रैकादशिनीमेतांप्रजपन्छंकरोपरि करोतियोभिषेकंहिनियमेनैकमंडलं ५१ समहापातकैस्त्यक्तोराजसूयफलंलभेत् शतमंत्रैश्चतुर्वीरंजुहुयात्त्वायसंशुभं ५२रु
द्रसंख्यानुवाकैश्चजपहोमोहुनेनतः मधुत्रितयसंयुक्तंमहापापैःप्रमुच्यते ५३अभिषेकंकेवलंवामंडलंयःकरोतिहि इहभुक्त्वाखिलान्लोकान्परेब्रह्मणिलीयते ५४
पूजायाअधिकोहोमोहोमात्तर्पणमुत्तमंतर्पणाच्चजपःश्रेष्ठःह्यभिषेकःपरोजपात् ५५ रुद्रैकादशिनींजप्त्वाप्रजपेच्छांतिपंचकं अन्यथातस्यसंसिद्धिर्नास्तिनास्तितपोधन
५६ यदाभक्त्युदयोनृणांततोपास्तिंसमाचरेत् चतुरस्रंवरंकुंडंहोमकालेविधीयते ५७ गणेशमादौसंपूज्यकृत्वानियममेवच उपासनांपंचकार्थंकृत्वानियममादितः ५८
समग्रंनमकंप्रोतःप्रजपेच्चमकान्वितं समहापातकैर्मुक्तःशिवसायुज्यमश्नुते ५९ मध्याह्नेप्रजपेद्वस्तुचमकेनयुतंद्विजाः ससूर्यमंडलंभित्वागणनामग्रणीर्भवेत् ६०सायं
कालेप्रजपेद्वस्तुनमकंचमकान्वितं अवाप्यसकलान्भोगान्परेब्रह्मणिलीयते ६१ भूतिभूषितसर्वांगोलिंगपूजारतःशुचिः नमकंचमकंनित्यंप्रजपेत्फलदायकं ६२वेद
साराणिनामानिकथितान्यत्रतानिहि एतज्ज्ञात्वामृतोभूत्वाब्रह्मभूयायकल्पते ६३ एतत्तेशतरुद्रीयंन्यासध्यानादिकंशुभं मयोक्तंब्राह्मणश्रेष्ठाःकिंपुनःश्रोतुमिच्छथ ६४
एकावृत्त्याघनाशोभवतिगिरिसुतेनह्निपेयेगणेंद्रोत्तमित्वप्रविशेत्तत्त्रितयतोश्रीरुद्रजापीनरः षड्वारंप्रजपंश्चमुक्तिफलभाक्भूयोभवेच्छाभवःश्रीरुद्रनामार्चनतोमहे
शलिंगेर्चयन्योकुसुमैश्चबिल्वैःरुद्राक्षभस्मागयुतोविमुक्तःच्युतोपिमुक्तोगणपोभवेद्विजः ६६ तस्मात्त्वाननएवजानतइमंजप्त्वाविमुक्तोभवेत्त हुत्वावाप्यभिषिच्य
वाद्विजवरःतस्यास्तितद्वैफलं छंदोदैवतसर्षिकंमनुगुणंजप्त्वाभवेत्पावनोनैनद्वेदयदिश्रुतीशतगतंनावेतिनंसर्वथा ६७ इतिश्रीशिवरहस्येईशानाख्येदशमांशेअष्टा
विंशोध्यायः२८ श्रीस्कंदउवाच शतरुद्रस्यमाहात्म्यंभूयोवक्ष्यामिमेशृणु कथितंसश्रुतंयैस्तुतेषांपापंप्रणश्यति १ साक्षात्त्रस्यप्रियेवेदमध्यगंशतरुद्रिय
शतरुद्रीयमाहात्म्यंशिवप्रोक्तंसनातनं २ निष्कृतिंसर्वपापानांयदिकर्तुमिहेच्छसि शतरुद्रीयमभ्यस्यसर्वपापैःप्रमुच्यते ३ ब्रह्महत्यासुरापानंस्तेयंगुर्वंग
नागमः तत्संसर्गइतिप्रोक्तंमहापातकपंचकं ४ ज्ञानाज्ञानकृतंपापंद्विविधंपरिकीर्तितंब्रह्महत्याज्ञानकृताक्षिप्रस्यपदिजायते ५ भस्मधृक्भस्मशायी
चत्रिपुंड्राकोनुतापवान् रुद्रैकादशिनींनित्यंप्रजपन्वत्सरत्रयं ६ तदंतेदक्षिणांदद्यात्रुवांशतवृषान्वितं गवामभावेनिष्कंस्यात्तदर्धंपादमेववा तदभावेप्य
नर्मासत्रितयंप्रजपेच्छुचिः ब्रह्महत्याविनिर्मुक्तोभवत्येवनसंशयः ८ श्रोत्रियंचद्विजंहत्वाज्ञानपूर्वंद्विजोत्तम प्राजापत्यत्रयंपूर्वंशरीरस्यविशुद्धये ९
कृत्वाशरीरसंशुद्धिंकृत्वाचांद्रायणंजनः महन्यासविधिंकृत्वारुद्रेणैवसमाहितः १० संपूज्यस्थावरेलिंगेजंगमेवासमाहितः रुद्रैकादशिनीनित्यंनिय
यमेनसमभ्यसेत् ११ वर्षषट्कमधःशायीफलमूलाशनोजपन् तदंतेदक्षिणांदद्यात्गवांत्रिशतमेववा १२ एवंकृतेविशुद्धात्मासयातिब्रह्मशाश्वतं द्वि
विधंमद्यपानंस्यात्ज्ञानाज्ञानकृतंभवेत् १३ अज्ञानोद्भवपापस्यमद्यपानस्यकथ्यते भूतिभूषितस्यसर्वांगोरुद्राक्षाभरणान्वितः रुद्रैकादशिनींनित्यं
वत्सरंप्रजपेद्विजः तदंतेदक्षिणांदद्यात्गवामेकोनविंशतिं १५ विमुच्यतेज्ञानकृतान्मद्यपानान्नसंशयः ज्ञानेनकृतपापस्यसुरापानस्यकथ्यते १६ गौडी

माध्वीचपैष्टीचविज्ञेयात्रिविधासुरा आसामन्यतमंपीत्वासुरापीतिचकथ्यते १७ भूतिभूषितसर्वांगोत्रिपुंड्रांकोजितेंद्रियः प्राजापत्यंचरेत्कृच्छ्रंकृच्छ्रंसांतपनंततः १८
रुद्रैकादशिनींनित्यंएकंसवत्सरंजपेत् तदंतेदक्षिणांदत्वागवामेकोनविंशतिः १९ एकमासंदरिद्रश्चेद्रुद्रैकादशिनींजपेत् सुरापानात्ज्ञानकृतान्मुच्यतेनात्रसंशयः
२० स्वर्णस्तेयंतुद्विविधंज्ञानाज्ञानसमुद्भवं भूतिभूषितसर्वांगोरुद्राक्षाभरणःशुचिः २१ जिताहारेंद्रियोमौनीरुद्रैकादशिनींजपेत् तदंतेदक्षिणांदद्यात्अष्टाविंशतिगाः
शुभाः २२ स्तेयेनाज्ञानजन्येनमुच्यतेनात्रसंशयः रुद्राक्षमालाभरणोभूतिभूषितदेहवान् २३ प्राजापत्यंचरेत्कृच्छ्रंब्रह्मचारीजितेंद्रियः षण्मासंनियताहारोरुद्रैका
दशिनींजपेत् २४ तदंतेदक्षिणांदद्यात्दशगावःसवत्सकाः गवामभावेनिष्कंस्यात्तदर्धंपादमेववा २५ दरिद्रश्चेत्तुनर्मासंरुद्रैकादशिनींजपेत् स्वर्णस्तेयात्ज्ञानकृ
तान्मुच्यतेनात्रसंशयः २६ गुरुपत्नीगमनंज्ञानाज्ञानकृतंद्विधा कंठदघ्नजलेस्थित्वाषण्मासंनियतेंद्रियः २७ रुद्रैकादशिनींनित्यंप्रजपेदात्मशुद्धये तदंतेदक्षिणां
देयादशगावस्सवत्सकाः २८ गुरुस्त्रीगमनात्पापात्कृतान्मुक्तोभवेद्ध्रुवं तत्संसर्गाभिधंपापंद्विविधंपरिकीर्तितं २९ नित्यंत्रिषवणस्नायीमासमेकंमतंद्रितः भस्मरुद्रा
क्षभूषाढ्यःत्रिपुंड्रपरिशोभितः ३० रुद्रैकादशिनीनित्यंप्रजपेद्भूतिभूषितः मासत्रयेणसंसर्गाद्विविधादपिमुच्यते ३१ आर्द्राणामप्यनार्द्राणांपापानांनिष्कृतिवरा पापानां
मुपपापानांसूक्ष्माणांमहतामपि ३२ असत्यस्तेयमित्रध्रुक्गोघ्नश्चैवकृतघ्नकः परान्नादःशूद्रगामीसन्नज्ञानपरोमुने ३३ गणिकोगणिकाजीवीवेद्यविद्याविचक्षणः
परान्नादोगणान्नादोवार्धुषोहलजीवकः ३४ भार्यात्यागीसुतत्यागीपंक्तिभेदकरोनरः अग्नित्यागीदुरान्नादीसर्वजीवोपघातकः ३५ तडाकारामभेत्ताचदेवानां
निंदकस्तथा वैश्वदेवःश्राद्धहीनःतथातिथिविवर्जितः ३६ निंदापरोन्यस्त्रीचगुरुदेवद्विजन्मनां राजद्रोहीजनद्रोहीगरदोपिशुनःखलः ३७ रसनांचतिला
नांचविक्रेतागोखराश्वयोःन्यस्तापहारीकुंडाशीविधुरोवृषलीपतिः ३८ देवब्रह्मस्वहारीयोअनृजुःवाकृच्छरोद्विजः भस्मरुद्राक्षनिंदाकृद्भृतकाध्यापक
स्तथा ३९ ग्रामणीःशूद्रहारीचमहादानप्रतिगृहीसर्पहाजंतुहाभ्रूणोगोणीजीवानिकामवान् ४० पुंसिगोष्ठखरक्रीडोरेतपोक्त्वाधनोशुचिः तीर्थदूषकरो
मर्त्योगृहदाहोरतिर्नरः ४१ एतेचान्येचवहवासंकरापापवत्तराः संकलीकरणायेचमलिनीकरणास्तथा ४२ जातिभ्रंशकराश्चैवअपात्रीकरणास्तथा जा
ग्रत्स्वप्नसुषुप्तौचजनितानांद्विजोत्तम ४३ बाल्ययौवनकौमारवार्धकेषूद्भवान्यपि पापानिनाशमायंतिरुद्रैकादशिनीजपात् ४४ प्रारब्धैःसंचितैःपापैःमु
च्यतेरुद्रजापकः भस्मच्छन्नस्त्रिपुंड्रांकोमुच्यतेसर्वपातकैः ४५ कोटिजन्मकृतैःपापैःमहापापोपपातकैः रुद्रजापीविमुच्येतफलंविंदेतसर्वदा ४६ रा
जसूयाश्वमेधाभ्यामग्निष्टोमायुतस्यच अवाप्यचफलंकृत्स्नंशिवेलीनोभविष्यति ४७ स्कंद उवाच ब्रह्मघ्नश्चकृतघ्नस्करवरोगोघ्नःकृतघ्नोमुने ब्रह्म
घ्नस्थंशिवमीश्यरुद्रजपकृत्पापैश्चमुक्तोभवेत् ४८ स्नात्वागांगजलेभगघ्नपदहन्तत्कंठदघ्नस्थितोभस्मास्नादिविदग्धसर्वतनुभाक्संदग्धपापोभवेत् प
ण्याविमुक्तसदनेमदनांतकस्यभक्त्येवरुद्रजपकृत्सकलाघमुक्तः तद्वैरवोरुवदनंभ्रुकुटीकरालमुद्यच्छशांकरदनैःकदनंनगच्छेत् ४९ इतिश्रीशिवरहस्येद

शर्मांशे ईशानाख्ये पंचपातकनिष्कृतौ रुद्रमहिमानाम एकोनत्रिंशोध्यायः २९ श्रीस्कंद उवाच अथ काम्यानिकर्माणि वक्ष्यामि मुनिपुंगव स्नात्वाशु
क्लांबरधरः समाहितमनाः शुचिः भूतिभूषितसर्वांगो रुद्राक्षाभरणान्वितः गायत्रीं प्रजपेन्नित्यम् अष्टोत्तरसहस्रकं २ नित्याग्निहोत्रं कृत्वाथ ब्रह्मयज्ञमतः परं
संतर्प्य पितृदेवर्षीन् द्विजाः त्रैवर्णिका अपि ३ संपूज्य विधिवल्लिंगे रुद्रैकादशिनीं जपेत् ऋक्संत्रयजुषां मंत्रसामान्याथर्वणो गणः ४ त्रिंशद्दिनानि जप्त्वा तु शीघ्रं शत्रून्वि
नाशयेत् संपूज्य स्फाटिके लिंगे शुभ्रदेशे मनोरमे ५ नैवेद्यं पायसं दत्वा कृत्वान्यासादिकं शुभं रुद्रैकादशिनीं जप्त्वा षण्मासं विजितेंद्रियः ६ अधिपः सर्वविद्यानां मू
कोपि भवति ध्रुवं जपन्नेकाग्रमनसा आपन्नेवमुमापतिं ७ आम्नाताश्रुतिशास्त्राणाम अश्रुतानां च जायते सर्वे वेदान्गृह्णाति श्रवणेनैकदा मुने ८ न विस्मरति
सर्वत्र विद्यां विप्रेश्वराज्ञया पीतांबरधरो नित्यं भूतिभूषितदेहवान् ९ रुद्राक्षमालाभरणः लिंगं मरकतोद्भवं प्रतिष्ठाप्य महापीठे संकल्प्य सुसमाहितः १० प्राणा
यामत्रयं कृत्वा छंदऋष्यादिन्यासपूर्वकं रुद्रैकादशिनीं नित्यं प्रजपन्नभिषेचयेत् ११ पूजां बिल्वदलैः कुर्यात् सितपद्मसमन्वितैः नैवेद्यं शर्करायुक्तं त्रिमधुप्लुतपायसं १२
दद्याच्छिवाय देवाय मासषट्कं दिने दिने एवं यः कुरुते नित्यं षण्मासं विजितेंद्रियः १३ अलक्ष्मीः कलहा घोरा दूराद्याति च गेहहान् धनधान्याकुलाला लक्ष्मीर्गजाश्वपशुसं
युता अणिमादिगुणोपेता महती श्रियमश्नुते संततिव्यापिनी लक्ष्मीः अचला तस्य जायते १५ अथातः पुत्रकामानां वक्ष्ये योगाननुत्तमान् पूर्वजन्मकृतात्पापात्
स्त्रियो वंध्या भवंति हि १६ वंध्यात्वमृषिभिः प्रोक्तमंगनानां चतुर्विधं महावंध्या काकवंध्या कदली च मृतप्रसूः १७ पुरुषस्यापि वंध्यत्वं चतुर्विधमुदीरितं पूर्व
जन्मनि संसारविच्छित्तिः पुरुषो यदि १८ या नारी बालकान्हंति सपत्न्यै च विषप्रदा सपत्न्या गर्भविच्छित्तिं या करोत्यंगना द्विजाः १९ चतुर्विधैः सा वंध्या स्यात्पूर्वजन्मज
दुष्कृतात् यो विप्रो विधवागंता भार्यात्यागं करोति यः २० दासीगंता भवेद्यस्तु परनारीरतः सदा विप्रबालकहंता च विहृत्पीडाकरः सदा २१ अनेन पूर्वपापेन वंध्य
शुक्लो न संशयः तन्निमित्तं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः २२ प्रातः स्नात्वा विशुद्धात्मा शुक्लांबरधरः शुचिः भूतिभूषितसर्वांगो रुद्राक्षाभरणान्वितः २३
ब्राह्मणान्वेदसंपन्नान् शुभ्रवस्त्रानलंकृतान् आहूय वरयित्वैकम् आचार्यं द्विजपुंगव २४ ऋत्विजो वरयेत्पश्चाद्दशसंख्यान्द्विजोत्तमान् दद्याद्धासायुगं ते
भ्यः शुभे लग्ने शुभे दिने २५ कारयेदभिषेकं तैर्ब्राह्मणैर्वेदपारगैः एकादशे दिने पश्चाद्ब्राह्मणान्भोजयेदथ २६ अष्टाविंशोत्तरचतुःशतसंख्यैरनुत्तमैः द्वादशे
दिवसे होमं कारयेद्द्विजपुंगवैः २७ वसोर्धारां ततः कुर्यात्प्रजपंश्चमकं द्विजाः सवत्सा दशगाः कांस्यदोहना दक्षिणास्ततः २८ आचार्याय वृषं दद्यादलंकार
दिकं शुभं रुद्रैकादशिनीमेव एकविंशोत्तरं शतं २९ महारुद्रमिति प्रोक्तं महापातकनाशनं एवं कृते न संदेहो वंध्यात्वं नश्यति द्विजाः ३० महावंध्यापि लभते त
स्मिन्संवत्सरे सुतं आयुष्मंतं यशस्विनं लक्ष्मीवंतं गुणान्वितं ३१ गोमूल्यमेकनिष्कं स्यात्तदर्धं पादमेव वा यद्येकस्मिन्दिने कुर्युरेकविंशच्छतं द्विजाः ३२ महारुद्रमिति
प्रोक्तं सर्वदुष्कृतनाशनं रुद्रैकादशिनीजप्यानंतरे शांतिपंचकं ३३ तदंते पौरुषं सूक्तं नारायणमतः परं पंचब्रह्ममहामंत्रात्परितः रुद्रमप्यथ ३४ त्र्यंबकमहामंत्रो
रुद्रमिति मंत्रकं सर्वो वाहुतिविद्या स्यान्नकद्रुद्रायेत्यतः परं ३५ नमो हिरण्यमंत्रं च त्वरितं रुद्रमीरितं एतज्जपेन सांगः स्यात् रुद्रैकादशनीजपः ३६ त्रिवारं यो महारुद्रं कारये

ई॰द॰पू॰अ॰३०
शिवरहस्य
अ॰३०
२६

ब्राह्मणोत्तमैः विनाशयत्यसौस्त्रीणांवंध्यत्वंचचतुर्विधं ३७ पुरुषस्यापिवंध्यत्वंविनश्यतिनसंशयः अचिरात्पुत्रमाप्नोतिह्यायुष्मंतंयशस्विनं ३८ कौरयेदनिरुद्रैर्योब्राह्मणै
वेंदपारगैः नदेनेहवनंकुर्युःलक्षसंख्यंद्विजोत्तमाः ३९ धेनूनांशनकंदद्यात् आचार्यायवृषत्रयं वृषाभावेत्रिनिष्कंस्यान्मूल्यंकनकमीरितं ४० धेन्वाभावेतथानिष्कंस्वर्ण
मेकमुदीरितं ब्राह्मणान्भोजयेत्पश्चाद्दशसाहस्रमादरात् ४१ एवंयःकुरुतेविप्रअतिरुद्रमहोदयं सर्वपापानिनश्यंतिकोटिजन्मार्जितान्यपि ४२ आयुःश्रीकीर्तिसं
युक्तान्पुत्रपौत्राननुत्तमान् अवाप्यसकलान्भोगान्लीयतेपरमेशिवे ४३ अशक्तश्चेत्स्वयंनित्यंरुद्रैकादशिनींजपेत् वत्सरात्लभतेपुत्रंआयुष्मंतंयशस्विनं घर्माभिषेकंयः
कुर्यात्शिवस्यपरमेष्ठिनः सर्वपापविनिर्मुक्तोसंप्राप्नपशुसंपदं ४५ कैलासेशिवसांनिध्यंवसत्येवनसंशयः नारिकेलोदकेनैवह्यभिषेकंकरोतियः ४६ सलब्ध्वामहतीं
लक्ष्मींआयुष्मत्पुत्रपौत्रकान् मेधांप्रज्ञांतरंतेतुशिवसांनिध्यमश्नुते ४७ यःकुर्यात्मधुनाशंभोःअभिषेकंद्विजोत्तमाः सपुत्रपौत्रानचलांलक्ष्मींविद्यांयशस्तथा ४८
अवाप्यशिवसांनिध्येरमतेनात्रसंशयः घृताभिषेकंयःकुर्यात्शिवस्यपरमात्मनः ४९ सब्रह्मवर्चसंप्रज्ञांलक्ष्मींपुत्रानवाप्नुयात् इक्षूदकेनाभिषेकंयःकुर्यात्परमात्मनः
५० सपुत्रपौत्रानासाद्यविद्यांलक्ष्मीमचंचलां कैलासेशिवसांनिध्येरमतेनात्रसंशयः ५१ आम्रोदकेनाभिषेकंयःकरोतिजितेंद्रियः ससर्वपातकैर्मुक्तःपुत्रान्विद्यांमहाश्रि
यं ५२ अवाप्यशिवसारूप्यंलभतेनात्रसंशयः शुद्धोदकेनाभिषेकंशिवस्यकुरुतेयदि ५३ ससर्वाभीष्टमासाद्यशिवसायुज्यमश्नुते सद्राजराजिनजटंत्वकहंसरोजेराजीव
वत्सुपरमानसरुद्रजापी पापंनिरस्यचिरजंविरजोभवेत्तमद्राजतोत्तमनगेसभवेद्गणेंद्रः रुद्रानिरुद्रशतरुद्रमहातिरुद्रएकादशावृत्तिपरोजपतीहिरुद्रः होमार्चनासु
नियतोजपतांविमुक्तोभूयाच्चशांभववरेष्ठविनिश्चयेन ५५ इतिश्रीशिवरहस्येईशानाख्यदशमांशेत्रिंशोऽध्यायः ३० श्रीस्कंदउवाच होमेपिशंचमेरुद्रमाद्य
वेकाहुतिंचरेत् नमस्तेप्रथमोमंत्रोद्वितीयोयातइत्यथ १ यातेरुद्रेतिविद्यास्याद्याभिषुंगिरिशंतया शिवेनवचसात्वेतिह्यध्यवोचदथापरा २ असौयस्ताम्रइत्यस्यत
थासौयोवसर्पतीति नमोअस्त्वितिमंत्रोयःप्रमुंचेतिपरोमनुः ३ अवतत्येतिमंत्रोस्माविज्यंधनुरथापरः यातेहेतिस्तथाविद्यानमस्तेस्त्वातथापरः ४ परितेधन्वनइतिन
मोहिरण्यबाहवे नमोवृक्षेभ्यइत्यन्योनमसस्पिंजरायच ५ सानमोवभ्लुशायेतिनमोहरिकेशायइत्यथ नमोभवस्यहेत्यैस्यानमोरुद्रायमंत्रकः ६ नमःसूतायविद्यान्मान
मोरोहितायत्यथ सानमोमंत्रिणेविद्यानमोभुवमथापरा नमऊच्चैस्तथाविद्यानमःकृत्स्नेत्यथापरा सानमःसहमानायकक्कुभायच्वनंतनः ८ नमोनिषंगिणेविद्यानमोवं
चतइत्यथ नमोनिचेरवेविद्यानमःसृकाविभ्यइत्यथ ९ नमोसिमद्भ्यइत्सन्यानमउष्णीषिणेतथा नमइषुमद्भ्यइत्यन्यानमआतन्वनेत्यथ १० नमआयच्छदित्यन्यानमोस
भ्द्योपरोमनुः नमआसीनइत्यन्यानमःस्वपद्भ्यइत्यथ ११ नमस्तिष्ठद्भ्यइत्यन्यानमःसभाभ्यइत्यथ नमअश्वेभ्यइत्यन्यानमआव्याधिनीत्यथ १२ नमउगणाभ्यइत्यना
नमोगृत्सेभ्यइत्यथ नमोव्रातेभ्यइत्यन्यानमोगणेभ्यइत्यथ १३ नमोविरूपइत्यन्यानमोमहद्भ्यइत्यथ नमोरथिरथिभ्यइत्यन्योनमोरथेभ्यइत्यथ १४ नमःसेनाभ्यइत्य
न्योनमःक्षत्तृभ्यइत्यथ नमस्तक्षभ्यइत्यन्यानमःकुलालेभ्यइत्यथ १५ नमःपुंजिष्ठइत्यन्यानमइषुभिधोमनुः नमोमृगयुमंत्रोन्यानमोश्वभ्यःपरोमनुः १६ नमोभवा शिवं:
येत्यपरोनमःशर्वायइत्यथ नमोनीलेतिमंत्रोन्यानमःकपर्दिनेत्यथ १७ नमसहस्राक्षायच्चशतधन्वेतिचापरः नमोगिरिशायचशिपिविष्टायचान्योमनुः १८ नमो २६

मीढुष्टमायेतिनमोह्रस्वायचेत्यथ नमोबृहतइत्यन्योनमोवृद्धायचेत्यथ १९ नमोअग्रियायचेत्यन्योनमआशवेत्यथापरः नमःशीघ्र्यायमंत्रोन्योनमऊर्म्यायचेत्यथ २० नम
स्रोतस्यायेतिनमोज्येष्ठायचेत्यथ नमोपूर्वजायचापरजायचेत्यन्योमनुः २१ नमोमध्यमायचापगल्भायायपरोमनुः नमोजघन्यायइतिनमःसोभ्यायचेत्यथ २२ नमोयाम्याय
चेत्यन्योनमउर्वर्यइत्यथ नमःश्लोक्यायचेत्यन्योनमोवन्यायचेत्यथ २३ नमःश्रवायचप्रतिश्रवायेत्यपरोमनुः नमआशुषेणायचापरोमंत्रोद्विजोत्तमाः २४ नमःशूरायचेत्य
न्योनमोवर्मिणइत्यथ नमोविल्मिनइत्यन्योनमश्रुतायचेत्यथ २५ नमोदुंदुभ्यायचाहनन्यायचेत्यन्योमनुः नमोधृष्णवइत्यन्योनमोदूतायचेत्यथ २६ नमोनिषंगिणेचेषुधिमतेचे
त्यन्योमनुः नमस्तीक्ष्णेषवेचायुधिनेचेत्यपरोमनुः २७ नमःस्वायुधायचसुधन्वनेचेत्यन्योमनुः नमःस्रुत्यायचेत्यन्योनमःकाट्यायचेत्यथ २८ नमोनाद्यायचेत्यन्योवैशंता
येत्यथापरः नमःकूप्यायचाप्यन्योनमआवट्यइत्यथ २९ नमोवर्ष्यायइत्यन्योअवर्ष्यायेत्यथापरः नमोमेघ्यायइत्यन्योविद्युत्यायेत्यथापरः ३० नमईध्रियायइत्यन्योआतप्यइत्तरो
मनुः नमोवात्यायचेत्यन्योनमोवास्तिनथापरः नमःसोमायमंत्रोन्योनमस्ताम्रायचेत्यथ नमःशंगायमंत्रोन्योनमउग्रायचेत्यथ ३२ नमोअग्रेवधायेतिनमोहंत्रेत्यथापरःनमो
वृक्षेभ्यइत्यन्योनमस्ताम्रायइत्यथा ३३ नमअरुणाइत्यन्योनमःशंभवइत्यथमयोभुवेत्यथान्योयंशंकरेन्योमुयःस्करः ३४ नमःशिवायमंत्रोन्योसर्वमंत्रशिखामणिःतथा
शिवतरश्चान्योमंत्रोयंशिवबोधकृत ३५ नमस्तीर्थायचाप्यन्योनमःपार्यायचेत्यथ नमःप्रतरणायेतिनमचोत्तरणोमनुः ३६ नमआतार्यकोमंत्रःनमःशष्प्यायचेत्यथ
नमःसिकत्यायचेत्यन्योनमइरण्यायचेत्यथ ३७ नमःप्रपथ्यायचेत्यन्योनमःपांसव्योमनुः नमोरजस्यइत्यन्योशुष्क्याथहरित्योमनुः ३८ नमोलोप्यायचेत्यन्योनमोलप्येत्य
थापरः नमउर्वर्यइत्यन्योनमोपगुरवेमनुः ३९ नमआखिद्यतेचेतिनमोवःकिरिकेभ्यमनुः नमोदेवादिहृदयंनमोवीक्षीणकंपरं ४० नमोविचिन्वत्केभ्यनमआनिर्हतेपरं
नमआमीवत्केभ्यइत्य आद्रघंगादेभ्यइतिमुच्चरेत्सिद्धविद्यकः ४१ द्रापेअंधसइत्यन्यायातेरुद्रशिवेत्यथ इमारुद्रायविद्यान्मामृडानोरुद्रमंत्रकः ४२ मानोमहांतमित्य
न्योमानस्तोकेमनुस्ततः आरात्तेगोघ्नइत्यन्योस्तुहिश्रुत्यतथापरः ४३ परिणोरुद्रइत्यन्योमीढुष्टमतथापरः विकिरेदितिमंत्रोन्योसहस्राणिसहस्रधा ४४ सहस्रा
णिसहेत्यन्योअस्मिन्नित्यपरोमनुः नीलग्रीवाइतिह्यन्योनीलाग्नन्वाइतीरितः ४५ येवृक्षेषुमंत्रोन्योयेभूतानामथापरः येअन्नेषुइत्यन्योयेपथांपथिमंत्रकः ४६ येतीर्था
निमंत्रोन्योयएतावंतमित्यथ नमोरुद्रेभ्यइत्यन्योनंतवोजंभेतिचत्रिभिः ४७ एवंशतंतेमंत्रास्तुःश्रुतरुद्राःसमीरिताः अष्टपंचाशदधिकाशतमंत्राःप्रकीर्तिताः ४८ येते
मन्त्राख्यामंत्रास्तुरमृतत्वप्रदायकाः स्वाहांताहोमकालेस्तुःसर्वसिद्धिप्रदायकाः ४९ श्रीरुद्रायेदंनमइत्युच्चरेद्ब्राह्मणोत्तमैः अष्टापंचाशदधिकशतमंत्रैफलप्रदैः
५० हुत्वापश्चाद्वसोर्धारांजपन्नंते कुर्वनेकाहुतिंबुधः ५२ रुद्रैकादशिनीहोमंरुद्रावृत्यासमाचरेत् महारुद्रांगहोमोयंसर्वाघौघविनाशनः ५३ अतिरुद्रेतथाकुर्युः
शतमेकादशोत्तरं नमकेनानुवाकेनहोमंकुर्याद्विचक्षणः ५४ चमकैकानुवाकेनहोमंकुर्युस्ततोद्विजाःपुनःसमग्रनमकंजप्त्वांतेवन्हिवल्लभां ५५ एकामेवाहु
तिंकुर्यात्समग्रनमकंततः जप्त्वांतेवन्हिदयितामुच्चार्यैकाहुतिंचरेत् ५६ इतिवात्रयंकुर्यात्पूर्णाहुतिमतःपरः अतिरुद्रांगहोमोयंसर्वप्रत्यूहनाशनः ५७ एतच्च
द्विगुणंप्रोक्तंमहारुद्रजपोहवं एतद्दशगुणंकुर्वन्जपहोमद्विजार्चने ५८ कोटिरुद्रमितिप्रोक्तंशिवप्रीतिकरंमुने अश्वमेधसहस्रस्यफलमाप्नोतिसाधवः ५९

ई.द.पू.
शिवरहस्य.
अ३२
२७

पुत्रपौत्रानवाप्नोतिविद्यायुःश्रीसमन्वितान् अणिमादिगुणैश्वर्यं दिव्यान्भोगांश्च दुर्लभान् ६० आसाद्यशिवसायुज्यमाप्नोत्यंतेनसंशयः यावद्विश्वंभराशैलद्वीपकानन
संयुता ६१ अनिरुद्धकृतेनावत्कालंभूमंडलेद्विजाः विद्यायुःश्रीःसमायुक्तासंततिर्वसतिध्रुवं ६२ अनिरुद्धसमोधर्मोनभूतोनभविष्यति यदिहास्तितदन्यत्रयन्ने
हास्तिनतत्क्वचित् ६३ एतद्वःशतरुद्रीयमाहात्म्यंपापनाशनं उदीरितंमयाविप्राःकिंपुनःश्रोतुमिच्छथ ६४ यस्मिन्पुरेग्रामेवाद्विजकुलतिलकोभस्मरुद्राक्ष
धृक्स्यात् श्रीरुद्रंप्रजपादरोभिनिवसेनतत्क्षेत्रवर्यंमम ६५ कोशंतत्रमृतेपिकोटकवरोग्रामोपिनैवान्तरोभूयाद्रेकश्रुतीरितोयमगजेपुण्योविधिःकेवलः किं
जप्येनामृतत्वंभवतिभगवतीत्युपक्रम्यवेदेष्टष्टोवर्णिगणेःगणेन्द्रपदंप्राहारुणीमेपरं पुण्यमेशनरुद्रजापनविधिःश्रीज्वलितांगोमुदाभद्राक्षाभरणोन
पुंड्रलसितेफालप्रभामंडले ६७ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्धेएकत्रिंशोध्यायः ३१ श्रीस्कंदउवाच अथान्यविधिमाख्यास्येरुद्रमंत्रस्यसत्तम
शृणुष्वसावधानेनचेतसाशिवभाषितं १ ईश्वरउवाच जयोदिवास्वेवसुदेवकार्याच्छ्रीरुद्रमंत्रस्यसदेवशंकरी रात्रौनजप्योमनुरेषनित्यंश्चितंशिवाभिषेकेतुसदैवयो
ज्यः २ कालाष्टम्यांसोमवारेमहेशिभूतायांवैग्रहणेपर्वकाले.नित्यादभीष्टफलमाप्यमेदंतेश्रीरुद्रंसंजप्ययएषधीभवः ३ मृदोर्ध्वपुंड्रविरचय्यफालेजप्योनचा
यंमनुरेषनिश्चयं जप्त्वासद्योनेननरकंप्रयातिभस्मास्यधृक्कुयोग्यतमोहिजप्त्वा ४ साधिष्ण्येतभवेतभस्मजमहंनिष्ठोभवेच्छांकरी ज्येष्ठश्रीशतरुद्रनिष्ठसुहृदापू
तोवरिष्ठोनरः ५ अन्येकुष्ठकनिष्ठदुष्टजनिताश्रीरुद्रजाप्योविके मेतास्तेदुरहष्टतःप्रतिभवेविप्राशनाःसंकराः मद्रुद्रजाप्यपरिहायमर्त्यामुक्तेकथंतेप्रभ
वंतिमूढाः रत्नंस्वहस्तस्थमपास्यहर्षतोगृण्हानिकाचंत्वयथातथेय यत्तुऋग्जुवरसास्सेतत्प्रजपन्नमुक्तिमुपास्तुनैवरोपि ७ यदिसंत्यज्यसुरुद्रजाप्यंगि
रिजेपूयपपातकीभवेत् नैतत्प्रजप्याधिकमेतदेवश्रीरुद्रमंत्रंचतदान्यशाखिनः स्वकंचरुद्रंप्रजपंतिबोधंदपूर्वंततोरुद्रपरोभवेत् ८ नमकंचमकैश्चवर्जितंप्र
जपन्नैवसुमतितिसोनुवाकं यतिभिःसितभस्मधारिभिःशतरुद्रश्रवणोथमुक्तिभाक्स्यात् ९ विषमंप्रजपेतरुद्रमंत्रंविषशेषभस्मभूषा विषमाक्षंत्वभिवीक्ष्य
धुक्षिताधोपभवेद्देवसमोक्षणेधिकारी १० श्रीपंचाक्षरमध्यभागविलसच्छ्रीरुद्रसूक्ताद्दरेदारान्मुक्तिमुपेत्यशंकरपदध्यानानुधारादर रुद्राक्षानुलभस्मफा
लकलितामुद्रादिविद्राविततापध्वांतनिवारणार्ककिरणोभूयान्मुदेमेशिवे ११ नरणास्थितकारणंमहेशचरणंयःशरणंहृदाप्रपद्यप्रणिपत्यचरुद्रमंत्रजापि
नोमरणांततोभविनाविमुक्तके रुद्रैकादशनींजपंतिचभवेभस्मत्रिपुंड्रांकितारुद्राक्षाभरणाःशिवैकशरणाःपूतामहापातकैः १२ तेनैवोत्तमदिव्यलिंगमगजेसं
सिच्यतीरैर्वरैःसर्वोर्वीवरदानकोटिजफलंलब्ध्वासमुक्तोभवेत् विमुक्तपापोप्यविमुक्तमाश्रयेच्छ्रीरुद्रसूक्तप्रजपन्नघघ्नं युक्तोह्रिभक्त्येवमहेशपादसक्तेवभस्मा
क्षधरोनरोपि १४ भस्मच्छन्नोभवघ्नंप्रजपतियतिराट्रुद्रमंत्रंसतारंपारंतद्भवसागरेडुपमिवप्राप्येतमुक्तिंस्थिरां दिव्यंफालतलेत्रिपुंड्रमगजेबिभ्रत्सरुद्राक्षभा
क्संत्यज्यान्मृद्रोर्ध्वपुंड्रमखिलविद्याविधिंप्राप्नुयात् १५ यदिसितभसिततत्रिपुंड्रधारीविमलमनंप्रजपेतरुद्रसूक्तं शिवपदकमलेनिविष्टचित्तोभवतिभवे शिव
पिविमुच्यतेगृहस्थः १६ वर्णीवनीशतमनंशतरुद्रमंत्रंभस्माक्षधृग्यदिजपेद्विमुक्तसिध्यै विध्युज्झितोपिनियमाश्रमवर्णधर्मैःरुद्रस्यजाप्यपरमःस २७

कल्लंलभेत् १७ रुद्रेणविद्रावितसर्वपापसंतापनिद्रादिविवर्जिताश्च यस्यप्रसादेनचरुद्रजापीदारिद्र्यनाशंकिलशैवमंत्रैः १८ गृहेवागोष्ठेवानदितटेवराम्बुस्थ
तलगः क्रमात्पुण्यवृद्धिंलभतिचजपन्नूरुद्रमगजे शिवक्षेत्रेपुण्यंभवतिशिवपादाब्जभजनेजपेविल्वस्याधोयदिजपनकृत्तपनभाः १९ यदिसितभसितत्रिपुंड्रफा
लोमनुगुणमद्रिसुतेसुरुद्रजापी पापोपतापसहितोपिविमुक्तसंघः प्रभवतिरुद्रगणोत्तमःसधन्यः २० योभानुसोदरवरोत्तममूलसंस्थोरुद्रार्थवा
द्विधिवोधितमंत्रसारः तस्याविमुक्तसदनंमरणांतकालेप्राप्यसदेशिमदनांतकदृष्टिदृष्टः २१ श्रीविल्वमूलगतिभाक्शतरुद्रमंत्रजाप्येनपापसहि
तोपिविमुक्तपापः सएवमेपंकजपादमिष्टनिष्ठानकाछांभवसत्तमोद्रिजे २२ प्रातश्रीशतरुद्रमंत्रजपतोभस्मत्रिपुंड्राक्षधृक् सायान्हेपिततोपिसंगवकृत
सायंतनेजन्महृत् रात्रौतत्प्रजपन्निशासुगिरिजेभस्माक्षधृक्समुक्तिभाक् निर्यातोयतिनाशुतिशतगतंवैद्विजवरेमुदारुद्रभस्मस्थितसितवरांगोद्गतपदं
२४ त्रिपुंड्राक्षःफालेधृतसितवराक्षस्रजधरोवरोहारःपारःभवतिचविमुक्तेयपरतरः नान्यार्थप्रजपेदघघ्नमथमेश्रीरुद्रमंत्रंशिवेकामाद्वाधनलोभतोगि
रिसुतेजप्त्वालभेद्यातनां २५ लालाजालनिकायदुष्कृमियुतोवक्रेणपूयाद्यसृक्पूतीगंधयुतांगकोहिसभवेत्तद्देवमानशने पुण्याविमुक्तसदनेशतनि
गमगतंरुद्रजाप्याद्विमुक्तः नैवंयदिलोभतोधनपरःजप्त्वालभेभैरवीं २६ दुष्टांतांकिलयातनांगिरिसुतेतद्वैरवस्यकशाघातजांतांसोढानहितत्रतस्य
णमुमेतत्केनशक्याध्रुवं भूयाद्रुद्रपिशाचकोत्तरहेजप्त्वापितत्पातकैः मुक्तोनैवभवेत्तचोग्रकिरणाननयस्यसद्मनिहितोविष्ठासुतिष्ठेच्छतं २७ त
स्मान्नप्रजपंतिसाधवइमंमंत्रंविमुक्तिप्रदंस्वर्गारोग्यसुखप्रदानमगजेमज्ज्ञानदंकेवलं मल्लिंगासेकनीरैःशतमनुविहितैःस्नापयेत्रोगिणंवाथं
ध्यावानियत्तंसुरुद्रजपकृद्रोगैःप्रमुक्तोभवेत् २८ वंध्याचापिसुवेतपुत्रमगजेपुण्यंपरंशांभवंमुक्तेश्चापिमनुंदिशंतिमुनयोमत्पादनिष्ठाःसदा
आपातालनभस्थलांतभुवनब्रह्मांडमाविस्फुरज्ज्योतिस्फाटिकलिंगमौलिविलसत्पूर्णेंदुवांतामृतैः अस्तोकाप्लुतमेकमीशमनिशंरुद्रानुवाकां
जपन्ध्यायेदीप्सितसिद्धयेद्भुतपदंविप्रोभिषिंचेच्छिवं २९ श्रीस्कंदउवाच एवमाहमहादेवःकैलासेगिरिजांप्रतिरुद्राध्यायविधिंकृत्स्नंकिंभूयः
श्रोतुमिच्छसि ३० शंभोःपदांभोजसमर्चनेनकुंभोद्भवाद्यामुनयश्चशांभवाः अंभोजजातोपिचपंचरुद्रंजपंतिदंभादिविवर्जितांगाः ३१ नारायणेनपद
जपेद्यदिमुदारुद्रंद्रुतोच्चंविनानत्वाप्रांजलिरीशनामकलयन्मुक्तोमहापातकैः भस्मोद्धूलितदेहएवहिजपन्श्रीरुद्रमंत्रंद्विजोरुद्राक्षामलदेहएवहि
भवेन्मुक्तोमहापातकैः ३२ इतिश्रीशिवरहस्येईशानाख्यदशमांशेपूर्वार्धेश्रीरुद्रमहिमानामद्वात्रिंशोध्यायः ३२ श्रीजैगीषव्यउवाच श्रुतंते

रुद्रमहात्म्यंदेवदेवसनातनंपंचाक्षरस्यचविधिंउत्पत्तिंमेवदाधुना १ विधिर्जपेधिकारंचकीदृशस्यब्रवीहिमे सुब्रह्मण्यनमस्तेस्तुत्वत्तोवेत्तानचापरः २ सूतउवाच
इतितस्यवचश्रुत्वामुनिप्राहशिखिध्वजः महादेवेनयत्प्रोक्तंकैलासेपार्वतींप्रति ३ श्रीस्कंदउवाच जैगीषव्यशृणुष्वेवमितिहासंनगोत्तमे कैलासेलास्यसदनेमदंता
नकरस्यच ४ नानाशिवालयोल्लासिमणिद्युतिविराजिते शातकुंभमहाकुंभधगधगितदिक्तटे ५ महाबिल्वोत्थविपिनंसंतानप्रवरेमुने रत्नप्राकारसौधोद्यच्चंद्रमौली
श्वरालये ६ पंचयोजनसाहस्रचंद्रस्फटिकनिर्मिते कस्यागवाक्षशिक्षाभिर्दैवतास्सुदुर्लभे ७ तत्रतत्स्फाटिकोद्दामसौधेचंद्रशिखामणिः एकाकारखंडदंडस्फा
टिकोत्तममंडपे ८ सहस्रस्तंभवितते रत्नसिंहासनस्थितः देव्यासहमहादेवः रहस्येसुंदरास्यकः तन्मौलिचंद्रकिरणानिर्यस्फाटिकसंस्रवैः अच्छोदःसरमुत्कृष्टउत्फुल्ल
कमलोत्पलं १० स्फटिकोत्तमसोपानतत्तीरमणिमंटपं पश्चिमाभिमुखंतत्रगर्भागारंमहेशितुः शतयोजनमानेनस्फटिकोपलनिर्मितं प्राकारराजद्वृषभमणिकंभविरा
जितं १२ चंद्रमौलीश्वरंलिंगंस्फाटिकंयोजनोन्नतं तन्मौलिचंद्रकांतोत्थधारासारांगशीतलं १३ भुजंगबिल्वकुसुमैःअर्चितंलिंगमुत्तमं सोमार्द्रापातयुक्तायांभूतायांभूतना
यकं १४ स्नात्वातच्चंद्रसरसिभस्मरुद्राक्षभूषणः गणास्तत्रसमायांतिअहंचापिगजाननः १५ वीरभद्रस्तथानंदीविघ्नंतुऋष्टिर्मुने चंद्रमौलीश्वरंलिंगंद्रष्टुंसंपूजितुंतदा
१६ तस्यांतिथावेकदाहंगजास्यगणैःपरैर्वृतः द्रष्टुंश्रीचंद्रमौलीशंशर्वरीवस्याकरोगमं १७ तद्द्वारिद्वारिणोतिष्ठंनंदिकेशेनसादरं अहमेवाब्रुवंतत्रनंदिकेशंगणैर्वृतः १८
स्कंदउवाच सोमार्द्रापातयुक्तायांभूतायांपतयेहिता अस्यांसंपूजयामीशंचंद्रमौलीश्वरंशिवं १९ तदातद्वचनंश्रुत्वानंदिकेशोभ्यभाषत प्रणम्यमांद्वारपालःशंभोरं
तर्गृहार्चितः २० नंदिकेशउवाच रहस्यास्तेत्रदेवेशोदेव्यास्फाटिकमंटपे नचात्रगमनंशक्यंसर्वेषांनारकांतक २१ चंद्रमौलीश्वरंलिंगंद्रष्टव्यंचेत्वयागणैः नेतुमर्थि
तुमीशायविज्ञाप्याद्याहमाव्रजे २२ इत्युक्त्वानंदिकेशोथगत्वानत्वामहेश्वरं स्तुत्वाप्रांजलिराहेत्थंमदागमनमीश्वरे २३ नंदिकेश्वरउवाच देवदेवमहादेवसर्वेश
शशिशेखर द्रष्टुंश्रीचंद्रमौलीशंनंतुंसंपूजितुंगणाः २४ स्तोतुंस्कंदादयोद्वारिगजास्याद्याश्चसंस्थिताः सोमार्द्रापातयुक्तायांभूतायांगणनायकाः २५ तवपादांबु
जद्वंद्वंद्रष्टुमिच्छंतिशंकर आज्ञापयमहादेवद्रष्टुंलिंगंतवप्रभो २६ इतितद्गिरमाकर्ण्यमहादेवोमहेश्वरः उवाचतंमहादेवोनंदिकेशंपुरस्थितं ईश्वरउवाच प्रवे
श्यतांगणश्रेष्ठाःस्कंदविघ्नेश्वरादयः पूजयंतुसपर्याभिःलिंगंमेगणपोत्तम २८ चंद्रमौलीश्वरंह्येतत्सुरादर्शंगणोत्तमाः पश्यंतुगणपाःसर्वेपूजयंतुसपर्यया २९ इत्यु
क्तोनंदिकेशोथतदास्मानप्रवेशयत् गत्वागणावयंसर्वेतत्रनत्वामहेश्वरं ३० देवींचनत्वागत्वाथसांतर्गृहगतंविभोः गजास्यश्चाप्यहंविप्रभस्मरुद्राक्षभूषणाः ३१
गत्वाश्रीचंद्रमौलीशंपूजयंतोव्यवस्थिताः गंधैःपंचामृताद्यैःशशिनिभसुघटैःदिव्यपाथैरचंद्रसारैश्चसुगंधैर्यक्षकर्दमैःबिल्वचंपकमंदारनवनीलोत्पलांबुजैः धूपै

दीपैश्चनैवेद्यैःस्तवैश्चकरताडणैः ३३ नीराजनैर्वीजनैश्चचामरछत्रदर्पणैः प्रदक्षिणानमस्कारैःशतरुद्रीयसंस्तवैः ३४ रुद्राणीगणवेणूनांस्वरैर्वैनृत्तदर्शनैः मृदंग
मुरजाढक्काशंखदुंदुभिवादनैः ३५ एवंचतुर्थयामेषुभूतायामर्चिशंकरं गिरिजेनंदिभृंगाद्याःवयंतत्रमहेश्वरं ३६ यामिनीरमणोत्तंसंकामिनीशोभितांगकं क्षणप्रायां
मेनिरेथक्षणादांगणपुंगवाः ३७ चंद्रमौलीश्वरेलिंगेगणैःपूजांकृतांहरः वीक्षन्सिंहासनवरेदेव्यातिष्ठत्सहर्षितः ३८ वयंस्तवामदेवेशंचंद्रमौलीश्वरंतदा तत्स्तुतिंशृणु
वक्ष्यामिसमाहितमनामुने ३९ गणाऊचुः यस्मिन्जगत्सर्वमिदंविभातियश्चाप्यनन्यःसकलप्रपंचात् तिलेषुतैलोपममास्थितंत्वांश्रीचंद्रमौलीश्वरमाश्रयामः ४०
अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजंतोः त्वांसर्वभूतस्थितमात्मरूपंश्रीचंद्रमौलीश्वरमाश्रयामः ४१ यःसर्वसाक्षीतमसःपरस्तात्विभातिसर्वंकिल
यस्यभासा त्वमागमांतैरपिदुर्निरूपंश्रीचंद्रमौलीश्वरमाश्रयामः ४२ प्रमानविज्ञायशिवंकदाचिद्दुःखस्यनांतंसमुपैतिधीरः त्वांसच्चिदानंदमयंप्रशांतंश्रीचंद्रमौलीश्व
रमाश्रयामः ४३ अजंपुराणंपुरुषंमहांतंअनश्वरंवाङ्मनसोतिदूरं ज्ञानात्मनाहृद्यवभासमानंश्रीचंद्रमौलीश्वरमाश्रयामः ४३ अजंपुराणं) ४४ वदंत्यमीयत्पद
मेववेदाज्ञातेतुयस्मिन्सकलंविबुद्धं त्वांप्रत्यगात्मानमचिंत्यशक्तिंश्रीचंद्रमौलीश्वरमाश्रयामः ४५ यंनिर्विकल्पेनसमाधिनैवतपस्विनःचेतसिवीतरागाः ध्यायंति
तेजोमयमद्भुतंत्वांश्रीचंद्रमौलीश्वरमाश्रयामः ४६ त्रिलोचनंचंद्रकलावतंसंगंगातरंगोल्लसदुज्वलांगं स्मेरस्मिष्टप्रदमष्टमूर्तिंश्रीचंद्रमौलीश्वरमाश्रयामः
४७ अपारसच्चित्सुखवारिराशिमनादिमध्यांतमनंतरूपं त्रिलोचनंनीलगलंप्रशांतंश्रीचंद्रमौलीश्वरमाश्रयामः ४८ कैलासशैलेंद्रशिरस्तटेषुनगेंद्रपुत्र्यासहसंवसं
तं विभूतिरुद्राक्षविभूषितांगंश्रीचंद्रमौलीश्वरमाश्र० ४९ श्रीस्कंदउवाच इत्थंगणानंदवचोनुवीचीमाध्वीझरीभारतरैरुहर्षाः हरस्तदात्तांगिरिराजपुत्रीधन्यांस
वित्रींजगतांमहेशः ५० तदंतरेसाप्रणतामहेशपादांबुजंस्वांजलिपद्मकोशैः अभ्यर्च्ययत्साप्रणनाथनत्वामश्वरहेसानुनयाद्बभाण ५१ इतिश्रीशिवरहस्येईशा
नाख्येदशमांशेपूर्वार्द्धेचंद्रमौलीश्वरस्तुतौत्रयस्त्रिंशोध्यायः ३३ श्रीदेव्युवाच देवदेवमहादेवकरुणावरुणालय शरणंतेप्रपन्नाहंकारणंशरणंसतां १
यथाविधानंमेब्रूहिमहागोप्यमपिप्रभो यदितेकरुणाचित्तेमयिशंभोस्तणस्थिचेत् २ विस्तरान्तस्यमंत्रस्यप्रभावंकथयाधुना नातिसंग्रहविस्तारेनिस्तारायकृपाकरः ३
श्रीस्कंदउवाच इत्थंगिरिजयापृष्टःतुष्टस्तांप्राहशंकरः अंभोरुहाक्षीमंवांताअभिवीक्ष्यहसन्हरः ४ श्रीईश्वरउवाच पंचाक्षरस्यमाहात्म्यंकल्पकोटिशतैरपि
नशक्यंविस्तराद्वक्तुंतस्मात्संक्षेपतःशृणु ५ वेदेशिवागमेचायंउभयत्रषडक्षरः मंत्रस्थितःसदामुख्योलोकेपंचाक्षरस्मृतः ६ सर्वमंत्राधिकश्चायंओंकाराद्यात्ष
डक्षरःसर्वेषांशिवभक्तानांअशेषार्थप्रसाधकः ७ तदल्पाक्षरमर्थाढ्यंवेदसारंविमुक्तिदं आज्ञासिद्धमसंदिग्धंवाक्यमेतच्छिवात्मकं ८ नानासिद्धियुतंदिव्यंलोक

चिंतानुरंजनं सुनिश्चितार्थगंभीरंवाक्यंतत्पारमेश्वरं ९ मंत्रंसुखमुखोच्चार्यंअशेषार्थप्रसिद्धये प्राहोन्नमःशिवायेतिसर्वज्ञःसर्वदेहिनां १० तद्बीजंसर्वविद्या
नांमंत्रमाद्यंषडक्षरं अतिसूक्ष्मंमहार्थंचज्ञेयंतद्वटबीजवत् ११ देवोगुणत्रयातीतःसर्वज्ञःसर्वकृत्प्रभुः ओमित्येकाक्षरेमंत्रेस्थितःसर्वगतःशिवः १२ ईशानाद्या
निसूक्ष्माणिब्रह्माण्येकाक्षराणिच मंत्रेनमःशिवायेतिसुस्थितानियथाक्रमं १३ मंत्रेषडक्षरेसूक्ष्मःपंचब्रह्मतनुःशिवः वाच्यवाचकभावेनस्थितःसाक्षात्
स्वभावतः वाच्यःशिवःप्रमेयात्वान्मंत्रस्तद्वाचकस्मृतः वाच्यवाचकभावोयमनादिःसुस्थितस्तयोः १५ यथानादिप्रवृत्तोयंघोरःसंसारसागरः शिवोपिहितथा
नादिःसंसारान्मोचकःस्थितः व्याधीनांभेषजंयद्वत्प्रतिपक्षस्वभावतः तद्वत्संसारदोषाणांप्रतिपक्षःस्थितःशिवः १७ असत्यस्मिन्जगन्नाथेतमोभूतमिदंभवेत्
आदित्येनयथाहीनंनिरालोकमिदंजगत् अभावादीश्वरस्येयंजगत्स्थितिःकथंभवेत् १८ अचेतनत्वात्प्रकृतेरज्ञत्वादीश्वरस्यच प्रधानपरमाण्वादियावत्किं
चिदचेतनं १९ मतत्कर्तृस्वयंदृष्टंबुद्धिमत्कारणंविना धर्माधर्मोपदेशश्चबंधमोक्षविचारणा २० नसार्वज्ञंविनापुंसांआदिसर्गेप्रसिध्यति वैद्यंविनानिरानं
दाःक्लिश्यंतेरोगिणोयथा २१ शिवंविनानिरानंदंक्लिश्यतेहिजगत्तथा तस्मादनादिःसर्वज्ञःपरिपूर्णःसदाशिवः अस्तिनाथःपरित्रातापुंसांसंसारसागरात्
आदिमध्यांतनिर्मुक्तःस्वभावविमलःप्रभुः २३ सर्वज्ञःपरिपूर्णश्चशिवोज्ञेयःशिवागमे तस्याभिधानमंत्रोयंअभिधेयस्तनस्मृतः २४ अभिधानाभिधेयत्वा
न्मंत्रार्थःपरमःशिवः एतावद्धिशिवज्ञानंएतावद्धिपरंपदं २५ तदोन्नमःशिवायेत्तिशिववाक्यंषडक्षरं विधिवाक्यमिदंशैवंनार्थवादःशिवात्मकं २६ यःसर्वज्ञः
सुसंपूर्णःस्वभावविमलःशिवः लोकानुग्रहकर्त्तायःसमृषार्थःकथंभवेत् २७ यद्यथावस्थितोवस्तुगुणदोषैस्वभावतः यावत्फलंचयत्पुण्यंसर्वज्ञस्तत्तथा
वदेत् २८ रागाज्ञानादिभिर्दोषैःग्रस्तत्वादनृतंवदेत् तेचेश्वरेनविद्यंतेब्रूयात्सकथमन्यथा २९ अज्ञाताशेषदोषेणसर्वज्ञेनशिवेनयत् प्रणीतममलं
वाक्यंतत्प्रमाणंनसंशयः ३० तस्मादीश्वरवाक्यानिश्रद्धेयानिविपश्चिता यथार्थंपुण्यपापेषुतदश्रद्धोव्रजत्यधः ३१ स्वर्गापवर्गसिध्यर्थंभाषितंयत्सु
शोभनं वाक्यंमुनिवरैःशांतैःतद्विज्ञेयंसुभाषितं ३२ रागद्वेषात्मकंक्रोधकामतृष्णानुसारियत् वाक्यंनिरयहेतुत्वात्तद्दुर्भाषितमुच्यते ३३ संस्कृतेना
पिकिंतेनमृदुनाललितेनवा अविद्यावारागवाक्येनसंसारक्लेशहेतुना ३४ यच्छ्रुत्वाजायतेश्रद्धारागादीनांचसंक्षयः विरूपमपितद्वाक्यंविज्ञे
यमतिशोभनं ३५ बहुत्वेनापिमंत्राणांसर्वज्ञेनशिवेनयत् प्रणीतममलंमंत्रंनतेनसदृशंक्वचित् ३६ सप्तकोटिमहामंत्रैरुपमंत्रैरनेकधा मंत्रःष २९
डक्षरोभिन्नःसूत्रवृत्यात्मनायथा ३७ शिवज्ञानानियावंतिविद्यास्थानानियानिच षडक्षरस्यमंत्रस्यतानिभाष्यंसमासतः ३८ किंतस्यबहुभिर्मंत्रैः

शास्त्रैर्वाबहुविस्तरैः यस्योंनमःशिवायेतिमंत्रोयंहृदिसुस्थिरः ३९ तेनाधीतंश्रुतंतेनकृतंतेनसर्वमनुष्ठितं येनोंनमःशिवायेतिमंत्राभ्यासःस्थिरीकृतः ४० नम
स्कारादिसंयुक्तंशिवायत्यक्षरत्रयं जिह्वाग्रेवर्ततेयस्यसफलंतस्यजीवितं ४१ अंत्यजोवाधमोवापिमूर्खोवापंडितोपिवा पंचाक्षरजपेनिष्ठोमुच्यतेपापबंध
नात् ४२ इत्युक्तंपरमेशेनदेव्याःपृष्टेनशूलिना हितायसर्वमर्त्यानांतिष्यजानांविशेषतः ४३ गौर्युवाच कलौकलुषितेकालेदुर्जयेदुरतिक्रमे अपुण्यत
मसाछन्नेलोकेधर्मपराङ्मुखे ४४ क्षीणवर्णाश्रमाचारेसंकरेसमुपस्थिते सर्वाधिकारेसंदिग्धेनिश्चितेवाविपर्यये ४५ सदुपदेशेपिहितेगुरुशिष्यक्रमेगते
केनोपायेनमुच्यंतेभक्तास्तवमहेश्वर ४६ शिवउवाच आश्रित्यपरमांविद्यांहृद्यांपंचाक्षरींमम भक्त्याचभविताम्नानोमुच्यंतेकलिजानराः ४७ मनोवाक्का
यजैर्दोषैःवक्तुंस्मर्तुमगोचरैः दूषितानांकृतघ्नानांनिर्दयानांखलात्मनां ४८ लुब्धानांवक्रमनसांअपिमत्प्रवणात्मनां ममपंचाक्षरीविद्यासंसारभयतारि
णी ४९ मय्येवमसकृद्देविप्रतिज्ञातंधरातले पतितोवापिमुच्येतमद्भक्तोविद्ययानया ५० विद्यांहृद्यामविद्यांविजहतिधिगतागद्यपद्याक्षरांताउरखिदैवता
मविद्यांहृदिकुटिलतमोरोगवैद्यांजपेद्यः मुक्तिःप्राप्यैवसद्यःशतगुणफलदांपर्णशय्याप्रसादात् दुर्भिद्यंत्वघमाद्यजन्ममरणंसद्यैवभेद्यंभवेत् ५१ इति
श्रीशिवरहस्येईशानाख्येदशमांशेचतुस्त्रिंशोध्यायः ३४ गौर्युवाच पुनःपंचाक्षरस्यास्यमहिमानंमहेश्वर अधिकारिविभेदेनपरश्चर्तुःफलंवद १
ईश्वरउवाच षडक्षरंप्रवक्ष्यामिसमासेनगिरींद्रजे सद्यःसंसारदुःखानिविनश्यंतिजपात्किवे २ ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रीछंदउच्यते देवतास्यशिवः
साक्षात्अहमेवमहेश्वरः ३ शक्तिर्महेश्वरीत्वंचभुवनेशाक्षरीभवेः बीजंमायात्मकंप्रोक्तंरुद्रःसंकल्पविग्रहः ४ सोहंतन्मयएवंस्यात्मंत्रमध्यस्थितःसदा
अंगुष्ठादिकनिष्ठांतंविन्यसेदक्षरक्रमात् ५ मस्तकेचललाटेचहृदिनाभौपदद्वये पुनःपंचाक्षरैरेवंन्यसेत्स्वस्यतनुंपरं ६ प्रणवंप्रथमंविद्यात्द्वितीयंतुनका
रकं मकारंतत्परंदेविशिकारंतुततःपरं ७ वकारंपंचमंविद्यात्यकारंषष्ठमुच्यते एवंषडक्षरंदेविश्रीरुद्रपदमध्यगं ८ स्त्रीशूद्राणांनमोंतायंप्रभवेत्तमनुः
शिवे ब्रह्मक्षत्रविशांभेषजप्रोत्क्रमतोमनुः ९ ब्रह्मचारिगृहस्थानांवर्णिनांवनवासिनां सन्यासिनांसप्रणवमाद्यंतेषुविधीयते १० नकेवलंगृहस्थानां
लब्धीजेनयुतोमनुः धनधान्यसमृद्धिश्चपुत्रपौत्रादिसंपदः ११ लब्धीजेनयुतोदद्यात्गृहीणांजापिनांमनुः वर्णीजपेत्सहस्रंहिगृहस्थःत्रिसहस्रकं १२ व
नवासीसहस्राणांदशकंप्रजपेद्दिने सन्यासीपंचसाहस्रंप्रणवाद्यंजपेन्मनुं १३ नगायत्र्याधिकंजाप्यमेतत्पंचाक्षरंमनुं स्त्रीभिःशूद्रैश्चनियतंशतमष्टो
त्तरंजपेत् १४ यथाब्राह्मणजाप्यस्यात्तथाविट्क्षत्रियोरपि मंत्रेणानेनमल्लिंगेकेवलेनचसेचयेत् १५ सएवपूजकोमान्योममदेविप्रसादभाक् अनुद्धृ

लितदेहेननजप्योयंमनुःशिवे १६ त्रिपुंड्रोद्भिन्नतफालेननजप्योयंमनुःशिवे अरुद्राक्षधरेणापिनजप्योयंमनुःशिवे १७ ऊर्ध्वपुंड्रधरेणायंनजप्योयंमनुःशिवे नान्य
देवार्चनायोग्योमनुरेषगिरींद्रजे १८ नदीतीरेगृहेगोष्ठेवनेचापिशिवालये विल्वमूलेविशेषेणप्रश्चर्यादिसिद्धिदः १९ मृगव्याघ्राजिनेचैलेजाप्यासीनकुशोत्तरे नभूमौन
चपाषाणेनकाष्ठेजाप्यमाचरेत् २० मंत्रःसांगःसमाख्यातोजपासनविधिक्रमेः देशकालविशेषोत्रकथ्यतेगिरिजेधुना २१ अष्टम्यांचचतुर्दश्यांपर्वण्योरुभयोरपि ग्रह
णेसोमसूर्योस्थेविषुवायनयोरपि २२ सोमवारेप्रदोषेचसायंप्रातःपराण्हयोः निस्याद्यधिकंकुर्यात्जपंपंचाक्षरस्यच २३ फलंशतगुणंतत्रप्रोक्तमीशेनयाधुना मनोर
र्थंतथामेद्यनमोयुक्तोविशेषतः २४ अहंवाच्योमहादेवःतस्यार्थोयंसनातनः ध्यानांगन्यासभेदाश्चवहवोस्यमनोःशिवे २५ निगमागमभेदेनवदंतिमुनयोद्विजे मंत्रार्थः
कथितःकृत्स्नप्रश्चर्यांशृणुष्वमे २६ आचार्यमुखतोमंत्रंजपेत्सर्वसमाहितः यथाशक्तिधनंतस्मैप्रदत्वातदनुज्ञया २७ स्नानंत्रिषवणंकृत्वाभस्मनाशाकभोजनःफल
मूलाशनोवापिहविष्याशीयथावलं २८ पर्वताग्रेनदीतीरेसागरांतेशिवालये वनेवानिर्भयेशुद्धेप्राङ्मुखोदङ्मुखःशुचिः विल्वमूलेगृहेगोष्ठेभस्मच्छन्नासनोभवेत् प्राणायाम
त्रयंकृत्वाछंदर्षिज्ञोस्यदेववित् ३० शक्तिंबीजंदेवताचमंत्रांगेषुतथामनुं कल्प्यासंप्रनःकृत्वातथांगन्यासमेवच ३१ पंचांगमपिविन्यस्यगुरुंमामभिवीक्ष्यच लिंगेवास्थंडि
लेदेविसोमसूर्याग्निमंडले ३२ विद्युल्लेखेवकल्याणंज्वलंतंविश्वरूपिणं शिवंध्यात्वाजपेन्मंत्रंलक्षाणांपंचकंशिवे ३३ प्रणवाद्यंनमोंतंचाद्विजेजपमाचरेत् वंदेहंवरदंशू
लकपालहस्तंसाभीतिमद्रिसुतयोज्वलदेहकांतिं वामोरुपीठगतयानिजवामहस्तन्यस्तारुणोत्पलयुजापरिणद्धदेहं ३४ शांतंपद्मासनस्थंशशिधरमकुटंपंचव
क्त्रंत्रिनेत्रंनागंपाशंचघंटांप्रलयहुतवहंसांकुशंवामभागे नानालंकारदीप्तंस्फटिकमणिनिभंदक्षभागेवहंतंशूलंवज्रंचखड्गंपरशुमभयदंपार्वतीशंनमामि ३५ मंग
लायतनंदेवंयुवानमतिसुंदरं ध्यायेत्कल्पतरोर्मूलेसुखासीनंसहोमया ३६ एवंध्यायेज्जपेन्मंत्रंपंचाक्षरमतंद्रितः तर्पयेल्लक्षमेकंतुजुहुयाल्लक्षमेवहिआज्येनपयसा
वापिपलाशकुसुमेनवा ततस्सिध्यतिमंत्रोस्यभुक्तिमुक्तिफलप्रदः ३८ तैलेनचाभिचारेषुअर्कोणांसमिधोहुनेत् वश्येपंकोसुंभकुसुमैःविल्वपत्रैर्धनाप्तये ३९ ज्व
रोगादिशांत्यर्थंअश्वत्थसमिधोहुनेत् विद्वेषणेमारणेचवैभीतककरंजकौ ४० उच्चाटनेचशत्रूणांअपामार्गेर्हुनेत्तदा प्रत्येकमष्टसाहस्रंजुहुयाज्ज्ञानवेदसि ४१
निंवतैलैश्चहेरंडैःजुहुयादाभिचारके नित्यादप्यधिकंजप्यजपेन्मंत्रस्यसिद्धये ४२ नित्यंद्वादशसाहस्रंजपेद्भक्त्यासमाहितः सम्यक्ज्ञानंसमासाद्यमयिलीनोभ
विष्यति ४३ लक्षपंचाशतंजप्त्वाहृत्वारेःपदमाप्नुयात् षष्टिलक्षजपेनैवलभेतब्रह्मणःपदं ४४ अशीतिलक्षंजप्त्वातुनरोविष्णुत्वमाप्नुयात् लक्षाणांतुशतंज
प्त्वासाक्षाद्रुद्रत्वमाप्नुयात् ४५ लक्षंजप्त्वातथायुष्यंद्विलक्षजपतःसुतान् निष्कामोलक्षदशकंजप्त्वाप्येत्तविमुक्तकं ४६ विनियोगसमाख्यातःतज्जपेल

लक्षणंशृणु विधिनोक्तेनमार्गेणमंत्राभ्यासोजपःस्मृतः ४७ जपस्तुत्रिविधःप्रोक्तोवाचिकोपांशुमानसः वाचिकोपांशुरुच्चैश्चद्विविधःपरिकीर्तितः
मानसोमननध्यानभेदद्वैविध्यमास्थितः उच्चैर्जपादुपांशुश्चसहस्रगुणमुच्यते ४९ मानसाच्चतथाध्यानमनंतगुणमुच्यतेउमासहायंमादेवंनीलग्रीवंत्रिलो
चनं ५० ध्यात्वाजपेत्तथामंत्रंसचानंतफलःस्मृतः अथवाप्राकृतंभावंस्त्वीयमुत्सृज्यदेहकं ५१ शिवोहमितिसंचिंत्यसाधयेदिदमुत्तमं उच्चैर्जपस्तुसर्वे
षांयथोक्तफलदोनृणां ५२ नीचैःश्रुतोनचेत्सोपिश्रुतश्चेन्निष्फलोभवेत् ऋषिश्छंदोदैवतंचध्यायन्मंत्रंजपेत्सुधीः ५३ दीपस्तंभनरच्छायाच्छायाम
भ्यसंत्तम नजपेत्तविशुद्धात्माशूद्रम्लेच्छासंनिधौ ५४ एषास्येवविधिःप्रोक्तःषडक्षरजपस्यहि उत्पत्तिमस्यमंत्रस्यपुनस्त्वंनिबोधमे ५५ ईश्वर
उवाच सुगमंनिगमांतगोचरंत्वगमागांतकरंगमोक्तसारं नगमौलिसुतेनगाधिवासप्रियमेतज्जपतांनचाघसंगः ५६ इतिश्रीशिवरहस्येईशाना
ख्येदशमांशेपूर्वार्धेशिवगौरीसंवादेपंचत्रिंशोध्यायः३५ श्रीस्कंदउवाच शिवेनोक्तंसमासेनदेव्यैदेवेनकीर्तितं शृणुध्वंमुनिभिःसार्धंगणैःसुर
गणैःसह १ पुराकल्पांतरेशंभुःस्रष्टुपायमचिंतयत् पंचाननःस्वयंजातःमायास्वीकृतविग्रहः २ तेजोराशिःस्वप्रकाशोस्वभासाभासयज्जगत् वदनानिम
हेशस्यप्रादुरासन्समंततः ३ प्राक्प्रत्यक्दक्षिणोदीचंऊर्ध्ववर्णैश्चपंचभिः अक्षराणिसोमधामोद्यच्छेकराणिसमंततः तत्पूर्वमुखंसौम्यंशुद्धविंवसमप्रभं
बालेंदुमुकुटंप्रसन्नंसुस्मितंकरुणाधिकं ५ विराट्ततःप्रादुरभूत्तकारात्मप्रजापतिः भूर्भूवस्ततोविप्रप्रतिष्ठाशाश्वतीततः ६ सएषभगवान्ब्रह्मलोक
सर्गपितामहः अघोरंदक्षिणंवक्त्रंप्रादुरासीन्महेशितुः ७ दंष्ट्राकरालभ्रुकुटीनिरिलासोज्वलत्प्रभं इंद्रनीलसमाकारंप्रसंबालेंदुभूषणं ८ स्वरांडाख्यत
तोरुद्रःशूलहस्तोविनिर्गतः मकारवाच्योभगवान्ज्योतिषामपतिस्तदा ९ सद्योजातमुखंशंभोःशरदंभोदसच्छविः दीप्तत्रिनयनंसोमधामसामिशिखंमुने १०
संम्राडाख्यस्ततोविष्णुःशिकाराद्बभूवह आपस्तस्मात्समुद्भूताःलोकसर्गेपुरामुने ११ वामदेवमुखंशंभोःप्रादुर्भूतंतदावशात् पद्मरागसमप्रख्यंबालेंदुकृ
तशेखरं १२ प्रसन्नंप्रसन्नवदनंवकारस्मादपीश्वरः वायुःप्राणशरीरात्माजपतांसंबभूवह १३ ईशानाख्यमुखंशंभोःपर्वशर्वरीनाथवत् त्रिलोचनंचंद्रचू
मुदभूतत्वादिदैवतं १४ सदाशिवोयकारश्चप्रादुर्भूतोमहेश्वरात् पंचब्रह्ममयाकारमूर्तयोमीमहेशितुः १५ तुरीयाश्चतथोंकारःप्रादुर्भूतोर्थवाचकः पंचना
दाख्यरूपात्तेशिववक्त्राद्विनिर्गताः १६ जगतामुपकारायब्रह्मविष्णुमहेश्वराः सदाशिवश्चेश्वरश्चपंचब्रह्माणइत्यपि १७ सृष्टिःस्थितिःसंहारस्तिरोधाना
नुदर्शकाः पंचास्यरोद्भवश्चेत्थंउदभूद्भवतोमुने १८ मुखादिक्रमतोपूर्वंशंभोरंभोजसंभवः नियुक्तःसृष्टिकरणेपालनेचांबुजेक्षणः १९ रुद्रःसंहरणे
युक्तःनियुक्तःशूलपाणिना तिरोधानस्यजगतोईश्वरोविनियोजितः २० सदाशिवोनुग्रहस्योजगतोस्यनियोजितः महादेवेनविप्रेंद्रभूतादिक्रमव

र्णकैः २१ एतेहिपशवःप्रोक्ताःपतिरेषांमहेश्वरः प्रणवस्यार्थएवेहअयंवर्णक्रमेश्वरः २२ प्रकाश्यसर्ववर्णानांशिवएवमहेश्वरः पंचाक्षरमिदंप्रोक्तंशत
रुद्रीयमध्यगं २३ वामदेवोस्यऋषिराड्पंक्तिःछंदःप्रकीर्तितः सदाशिवोस्यदेवोहि ॐबीजंशक्तिर्नमुने २४ ब्रह्मबीजमिदंमंत्रप्रोक्तं वैद्विजसत्तम मंकी
लकंमंत्रेणन्यासमस्ययथाक्रमं २५ अंगुलीदेहवक्त्रेषुन्यसेत्पंचाक्षरंमनुं ॐनंतत्पुरुषायसंअघोरंप्रचक्षते २६ शिंसद्योजातकायेतिवांवामायेति
वामुने यंईशानायेतिनमोंतेनन्यसेत्क्रमात् २७ अंगुलीषुहृदिन्यासंकृत्वांगेषुमुनीश्वरः सर्वज्ञधाम्नेहृदयंतृप्तिधाम्नेशिरस्तथा २८ शिखामनादिधाम्ने
चकवचेचस्वतंत्रकं अलुप्तशक्तिधाम्नेच ॐमनंतंचशक्तिच २९ अस्त्रायफडित्येवंअंगन्यासंचरेत्क्रमात् अस्त्रमंत्रेणदिग्बंधंकृत्वामूलेनरोधयेत्
३० प्रज्ञानघनमानंदंकल्याणंशिवमव्ययं ध्यायेदहमितिस्वस्थोस्वस्थान्यक्षाणिधारयेत् ३१ ध्यायेद्देवंविरूपाक्षंषडक्षरविधौमुने ध्यानं विभ्रद्दोर्भिः
कुठारंमृगमभयकरौसुप्रसन्नोमहेशः सर्वालंकारदीप्तःसरसिजनिलयोव्याघ्रचर्मोत्तरीयः ध्येयोमुक्तापरागामृतरसकलिताद्रिप्रभा पंचवक्त्रस्त्र्यक्षकोटी
रकोटीघटितहिमरुचिर्वेन्दुलोत्तुंगमौलिः ३२ एवंध्यात्वाबहिःपीठेसमाराध्यवमेवहि नामज्येष्ठाचरौद्रीचकालीकलविकारिणी ३३ बलाविकरिणीचेति
बलप्रमथिनीतथा दमनीसर्वभूतानांतथाविप्रमनोन्मनी ३४ पीठानांशक्तयोसर्वानववैमुनिसत्तम संपूज्यावरणेपूजापूर्वपश्चदुदीच्यके ३५ पूर्वेचमूर्त
यःपूज्याःपंचब्रह्माणइत्ययउमाचंडीश्वरोनंदीमहाकालोगणेश्वरः ३६ एकद्वित्रिचतुष्कोणपूज्यादिदेवताःक्रमात् पूजाहवनजायेचलक्षाणांचच
तुष्टयं ३७ साज्यशुभ्रतिलैर्होमःपायसेनचकारयेत् मंत्रसिद्धिमवाप्नोतिपंचाक्षरविधौमुने ३८ अनंतसूक्ष्मोचशिशंवोपमश्चतथैवपूर्वांचपिरुद्रे
त्रौ त्रिमूर्तिश्रीमूर्तिश्रीखंडशिखंडितश्च प्राणादिपात्रेषुसमर्चनीयाः ३९ अत्यर्कानलसोमलोचनविभोत्वन्नेत्रजालेर्जगत्पुष्णात्योषधिजा
लमुग्रसुकरैःवर्षत्यथानंपचेत् तत्वत्तेजगतांचप्राणनकराःश्वाप्यायनीशंकरत्वत्तोयंनविभातिभासनपरोदेवस्त्वमात्माशिवः ४० इतिश्री
शिवरहस्येईशानाख्येदशमांशेषट्त्रिंशोध्यायः ३६ श्रीस्कंदउवाच कदाचित्कौतुकाविष्टागौरीपृच्छतिशंकरं रहस्येहरवामांकसंस्थावि
प्रगिरींद्रजा १ शिवोवाच कर्मायोग्योभवेत्सद्यःपतितोयदिसर्वथा कर्मायोग्येनयत्कर्मकृतंतंनरकायहि २ ततःकथंविमुच्येतपतितोवि
द्ययानया श्रीशिवउवाच तथ्यमेतत्त्वयाप्रोक्तंतथापिशृणुपार्वति रहस्यमितिनिर्मलेनतत्गोपितंयन्मयापुरा ३ अमंत्रकोमापतितःपूजयेद्य
दिमोहतः नारकीस्यान्नसंदेहोमस्यपंचाक्षरंविना ४ अभक्षावायुभक्षाश्चयेचान्येव्रतकर्शिताः तेषामेतैर्व्रतैर्नास्तिममलोकसमागमः ५

भक्त्यापंचाक्षरेणैवयस्तुमांसकृदर्चयेत् सोपिगच्छेत्तमथ्यानंमंत्रस्यैवतुगौरवात् ६ तस्मात्तपांसियज्ञाश्चव्रतानिनियमायमाः पंचाक्षरार्चनस्यैतेकोट्यंशेना
पिनोसमाः ७ बद्धोवाप्यथमुक्तोवापाशैःपंचाक्षरेणयः पूजयन्मांविमुच्येतसर्वपापैर्नसंशयः अशुद्धोवाविशुद्धोवासकृत्पंचाक्षरेणयः पूजयन्पंडितोमूढो
मुच्यतेपतितोपिवा ९ षडक्षरेणवादेवितथापंचाक्षरेणवा सब्रह्मांगेनमांभक्त्यापूजयेद्यदिमुच्यते १० पतितोपतितोवापिमंत्रेणानेनपूजयेत् ममभक्तोजित
क्रोधोभस्मरुद्राक्षधृक्द्विजः ११ नान्यपुंड्रधरेणायंनजप्योमनुराडयं अश्रौतमूर्ध्वपुंड्रंहिमंत्रोयंश्रुतिमध्यगः १२ श्रौतंपुंड्रंसदाभस्मत्रिपुंड्रोह्युलनात्मनः रु
द्राक्षधारणंपुंड्रंशिवलिंगमिदंद्वयं १३ नत्याज्यंवैदिकैर्नित्यंतस्माद्धृत्वाजपेन्मनुं गुरुवक्त्रादिमंलब्ध्वाश्रीमत्पंचाक्षरंमम १४ द्विजोत्तमात्समाभवाच्चजपनीयोश
नाष्टकं उपनीतोनथापित्रादत्तःपंचाक्षरोयदि १५ गायत्र्यासहएवायंजपेन्मंत्रमतंद्रितः वर्णीवेदाभ्यासनार्थंशतमष्टोत्तरंजपेत् १६ गृहस्थःपंचसाहस्रंजपे
द्ध्यायन्हिमांसदा वन्यःसन्यासधर्मस्थःसन्यासेप्रणवेनहि १७ दशहूदशसाहस्रंजपंतस्थोयथाबलं स्त्रियःशूद्रासंकरश्चनमोंतेनजपक्रमे १८ चोदिताः
तांत्रिकाणांतुतंत्रोक्तेनैववर्त्मना वैदिकानामयंमंत्रोधर्मश्चायंमयोदितः १९ ब्राह्मणक्षत्रियविशांएषजापविधिक्रमः लब्ध्वामंत्रंगुरोर्वक्त्रान्मैत्र्यादि
गुणसंयुतः २० भस्मत्रिपुंड्रवीतांगःमत्ध्याननिहिताशुभः ब्रह्मचर्यरतोभक्त्यामत्सायुज्यमवाप्नुयात् २१ किमत्रबहुनोक्तेनभक्ताःसर्वेधिकारिणः
ममपंचाक्षरेमंत्रेतस्माच्छ्रेष्ठतरोहिसः २२ पंचाक्षरप्रभावेनलोकादेवमहर्षयः तिष्ठंतिशाश्वताधर्मादेवाःसर्वमिदंततं २३ प्रलयेसमनुप्राप्तेनष्टे
स्थावरजंगमे सर्वप्रकृतिमापन्नःत्वत्तःप्रकृतकार्यभूत् २४ एकोहंसंस्थितोदेविनद्वितीयोस्तिकुत्रचित् तदावेदाश्चशास्त्राणिमंत्राःपंचाक्षरेस्थि
ताः २५ तेनाशैनैवसंप्राप्तामच्छक्त्याह्यनुपालिताः ततःसृष्टिरभून्मत्तःप्रकृत्यात्मविभेदतः २६ गुणमूर्त्यात्मनांचैवततोवांतरसंहृतिः तदानारा
यणोमत्तःसमुत्पन्नोमहेश्वरि २७ मत्तएवसमुत्पन्नोपंचवक्त्रःप्रजापतिःसिसृक्षमाणोलोकांस्त्रीनशक्तोह्यसहायवान् २८ मुनीन्दशससर्जादौ
मानसानमितौजसः तेषांसृष्टिविवृध्यर्थंमांप्रोवाचपितामहः २९ प्रणम्यसंस्तुवन्भक्त्याकृतांजलिरुमेतदा ब्रह्मोवाच नमस्तेदेवेशत्रिपुरहर
सोमत्रिनयनप्रभोशंभोविश्वाधिकहरभवोग्रामितगुण विभोबंधोबुधहरहरशशिद्योतितशिरःप्रसारमेशम्बलकरुकरुभवानमेद्यशरणं ३० म
त्पुत्राणांमहादेवसर्जनेदेहिविक्रमं इत्येवंप्रार्थितस्तेनपंचवक्त्रधरोह्यहं ३१ पंचाक्षराणिक्रमशःप्रोक्तवान्पद्मयोनये सपंचवदनस्तानिगृणन्
लोकपितामहः ३२ वाच्यवाचकभावेनज्ञातवान्मांमहेश्वरं ज्ञातप्रयोगविधिवत्सिद्धमंत्रःप्रजापतिः ३३ पुत्रेभ्यःप्रददौमंत्रंमंत्रार्थंचप्रजापतिः
तेलब्ध्वामंत्ररत्नंतत्साक्षाल्लोकपितामहात् ३४ मयाज्ञातेनमार्गेणमदाराधनकांक्षिणः मेरोस्तुशिखरेदेविमुंजवान्नामपर्वतः मत्प्रियःसततं

श्रीमान्मद्गणैरपिरक्षितः तस्याभ्याशेनपत्नीब्रह्मलोकसृष्टिसमुत्सुकाः ३६ दिव्यंवर्षसहस्रंतुवायुभक्षाःसमाचरन् तेषांभक्तिमहंदृष्ट्वासद्यःप्रत्यक्षतां
मियात् ३७ मांदृष्ट्वातुष्टुवुःसर्वेप्रणम्यैवंतपोरताः मुनयऊचुः ओमित्येकाक्षरोसिप्रकृतिविरहितोओमितीदंचसर्वे त्वत्तोभिन्नेनचैतच्छिवतवमहिमांवक्ति
वेदःसदैवां ईशानस्त्वंसर्वविद्याधिनाथोउद्गीथत्वंवाचकंतेतथैवां मातामानंमानकारव्यानसिद्धिःशब्दादीनांमूलमीशस्त्वमेवां ३८ नमस्तेरुद्रस्त्वंश्रुतिगत
नमोनैकवक्त्रसांभवानंतोनाथोनतिकरणानानाविधतनुः नहित्वत्तोभिन्नंजगदपिचनानेवहिमृषा नमःशेषोदेवःनहिशिवविवादःश्रुतिवलात् ३९
महानात्मामायाविरहितशरीरोमनुगतोमहेशोमन्त्रार्थःत्वमसिमतिदानामनसिगःमनस्वीमध्यस्थोमरणजननाद्यंतरहितोमधुर्मंतामातांभवसिहस्मन्वंचित
पदः ४० शिवःशिष्टोनिष्ठोभवसिशिपिविष्टःशिवतरःशितोवाल्पःस्वल्पःशशिधरशिरवासूक्ष्ममहिमा शिखानेत्रोयंत्रोभवसिशितिकंठःत्वमसिहृकुशत्ताव
तोहर्तात्वमसिभवहंतोसिजगतां ४१ वाहीकृतोस्मभगवन्हरवामदेववाताशनादिपरिभूषितदिव्यकाय वासवास्तुपमहेश्वरवामनेत्रात्म्हस्तार्थकायभगवन्नव·
वारणारे ४२ यतोज्ञानंविश्वंयमयतितथांतेचयद्वतेनहिस्वस्थंयस्मान्नभवतितथानन्यमतिकं यमात्मानंसर्वेनहिखलुविजानंतितमसःपरंपारंयत्तत्भवसि
यततामेवनियतं ४३ श्रीईश्वरउवाच पंचाक्षरार्थस्तवमेनदेवंपठंतियेवाध्यव्रसंतमाशिवे तएवधन्याजगतीतलेस्मिन्तेषांहिमुक्तिःकरगाभवेत्त ४४ वेदसी
रमहार्णवोद्यतमहारुद्रोर्मिनामावलीमध्यभ्राजितदिव्यहृद्यसुमहापंचाक्षरीविद्यया राजत्येवसुधाकरांशुचयवन्विप्रोनरोवासुरोघोरोवाप्यसुरोथवागिरि
सुतेमुक्तोभवेत्पातकैः ४५ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्द्धेपंचाक्षरमहिमावर्णनंनामसप्तत्रिंशोध्यायः ३७ श्रीईश्वरउवाच पंचाक्ष
रमृषिछंदवीजशक्तिंचदैवतं न्यासंषडंगंदिग्बंधंविनियोगमशेषतः १ प्रोक्तवानहमार्याणांजगतःसृष्टिसिद्धये ततस्तन्मंत्रमाहात्म्यादृषयस्तपसिस्थिताः
२ सृष्टिंवितन्वतेसम्यक्सदेवासुरमानुषां अस्याःपरमविद्यायाःस्वरूपमधुनोच्यते ३ आदौनमःप्रयोक्तव्यंशिवायेतिततःपरं सैषापंचाक्षरीविद्यासर्वश्रुति
शिरोगता ४ शब्दजातस्यसर्वस्यवीजभूतासमासतः प्रथमंमन्मुखोद्गीर्णासाममैवात्मवाचिका ५ तप्तचामीकरप्रख्यापीनोन्नतपयोधरा चतुर्भुजात्रि
नयनाबालेंदुकृतशेखरा ६ पद्मोत्पलधरासौम्यावरदाभयपाणिका सर्वलक्षणसंपन्नासर्वाभरणभूषिता ७ सितपद्मासनासीनानीलकुंचितमूर्ध
जा अस्याःपंचविधावर्णाःप्रस्फुरद्रश्मिमंडलाः ८ पीतःकृष्णस्तथाधूम्रःश्वेताभोरक्तएवच पृथक्प्रयोज्याएवैतेविंदुनादविभूषिता ९ अर्द्धचंद्राकृतिर्विंदुः
नादोदीप्तशिखाकृतिः वीजंद्वितीयंवीजेषुमंत्रस्यास्यवरानने १० दीर्घस्तुरीयंपूर्वस्यपंचमंशक्तिमादिशेत् वामदेवोनामऋषिःपंक्तिश्छंदउदाहृतं ११ देव
ताशिवएवाहंमंत्रस्यास्यवरानने गौतमोत्रिर्वरारोहेविश्वामित्रस्तथांगिराः १२ भरद्वाजश्चवर्णानांक्रमशोऋषयःस्मृताः गायत्र्यानुष्टुप्त्रिष्टुप्छंदांसिह

हृतीविराट् १३ इंद्रोरुद्रोहरिर्ब्रह्मार्क्क दस्तेषांचदेवताः ममपंचमुखान्याहुः स्थानंतेषांवरानने १४ पूर्वादिशोर्ध्वपर्यंतंनकारादियथाक्रमं उदात्तः प्रथमोव
र्णः चतुर्थश्चद्वितीयकः १५ पंचमस्वरितश्चैवमध्यमोनिहतस्मृतः मूलविद्याशिवस्यैवस्वस्त्रंपंचाक्षरंतथा १६ नामान्यस्यविजानीयात्सेवेमेहृदयंमतं नका
रःशिवउक्तेनमकारस्तुशिवोच्यते १७ शिकारःकवचंतद्वद्वाकारोनेत्रउच्यते यकारोस्त्रंनमःस्वाहावषट्हूंवौषडित्यपि १८ फडित्यपिचवर्णानांअंतेगलंयथा
तथा नवापिमूलमंत्रोयंकिंचिद्वेदसमन्वयात् १९ तत्रास्यपंचमोवर्णोद्वादशस्वरभूषितः तस्मादनेनमंत्रेणमनोवाक्कायभेदतः २० आवयोरर्चनंकुर्यात्जपहो
मादिकंतथा यथाप्रज्ञंयथाश्रद्धंयथाकालंयथास्मृतिः २१ यथाशक्तियथासंपत्त्यथायोगंयथारति यदाकदापिवाभक्त्यायत्रकुत्रापिवाकृता २२ येनकेनापि
वादेविपूजामुक्तिंनयिष्यति मय्यासक्तेनमनसायत्कृतंममसुंदरि २३ तत्प्रियंचशिवंचैवक्रमेणाप्यक्रमेणवा तथापिममभक्तायेनासंनविवशाःपुनः २४ ते
षामर्थेनशास्त्रेषुमयैवनियमःकृतः पंचाक्षरात्स्मरतिपापगणंचकृत्स्नंरक्षाभिलिप्तशिरसामभिरक्षितेयंरूक्षाभवंत्यखिलराक्षसपक्षसंघाः संधुक्षितापरिभवं
तिशिवेक्षजालैः २५ प्रातःप्रदोषनिशिवासुदक्षःअसानुरक्तहृदयोजपतिप्रमोदात् पंचाक्षरंपरमपावनमेतदेवरुद्रत्वदाईगिरिजेविरजोभवेत्सः २६ वेदा
न्यज्ञान्व्रतंयोशिखिमुखविहितंहोमजालंचकृत्स्नंकन्याःपृथ्वीचवाणीद्विजगणकलितामप्यधन्योभवेत्तश्रीपंचाक्षरजापेनाक्लिंतमतिःयस्तस्यकिंसेवनैः
जाप्यंत्वेतदनुस्मरणंद्विजगणैःपंचाक्षरंमेपरं २७ जाप्यंत्यक्त्वाशिवेयोजयतिमनुगुणंत्वन्यमेवेहमूढोगूढंगूढपदांगशोभिसुदृढंत्यक्त्वामृडेडामपि संत्यज्य
स्यजसंभवेप्रभवतेवेदानुवादेरतोविप्रोपिश्वपचाधमेनसदृशोविष्ठासुतिष्ठेच्छतं २८ षडक्षरपरायणाधवलभस्मसंभूषणामहाघगिरिदारणाभुविभवंतित
त्क्षेषणाः विदूषणपरानरायमकरोरुवाणाहताःतदीयवरवाहनोत्कर्विषाणकोणाहताः पंचाक्षरंहन्तिपराश्वनरात्परवैतेभूसुरासुरगणाश्रिश्रितएवधीराः
अन्येजपोक्षितपरानरएषभास्तेतेषांनराभुविभवंत्यथपामराश्च ३० पंचाक्षरैकमतयोयतयोपिधन्यामान्यानुतत्तहृदयाश्चदयाविशिष्टाः अन्येविनिंदनपरा
गद्याविभिन्नमूर्धानएवनिवसंतियमालयेषु ३१ क्षारत्रिपुंड्रपरिमंडितफालवक्षस्द्राक्षकंकणलसद्गलमालिकाश्च पंचाक्षरंचकलयन्निलयंममेतिसाद
क्षरंपदमुमेनहिनत्क्षरेन ३२ पंचाक्षरंप्रजपतोक्षरलक्षसंख्यामाद्यंतयुक्प्रणवतःप्रवणेनभक्त्या मुक्त्याकिमेवभवतीशकयाक्षशक्त्याक्षरत्वामुनामम
मेतपदंहिभक्त्या ३३ पंचाक्षरंपावनमुच्चरंतःपतिंपशूनांहृदिभावयंतः शांताःकृतांतांतकमर्चयंतःक्षेत्रेषुतिष्ठंतिसदेवसंतः ३४ पंचाक्षराद्धन्तिकृतान्क
रेत्अघसारंभुवंत्यज्यनंदक्षरंव्रजेत् नयक्षरक्षप्रभवंभयंभवेत्त्रसप्रसादाल्लभतेफलास्यं ३५ प्रणवाद्यंतमुमेयतिर्जपेत्नियतिर्वैश्रुतिचोदितामृषान
तवबीजमुमेविधारयन्जपतांजप्यमिदंफलायते ३६ प्रणयानिवर्धयतिपापततिंधुनोतिमुखाविमुक्तसदनेवसतिंकरोति पंचाक्षरंममनुंजपतिस्थिरांतः

तस्यांबिकेपरमुक्तिपदंददाति ३९ इतिश्रीशिवरहस्येईशानाख्येदशमांशेपूर्वार्द्धेअष्टत्रिंशोध्यायः ३८ श्रीस्कंदउवाच तत्रादौसंप्रवक्ष्यामिमंत्रसंग्रहणं
शुभं यंविनानिष्फलंजप्यंयेनवासफलंलभेत् १ आज्ञाहीनंक्रियाहीनंश्रद्धाहीनंवरानने आज्ञप्तंदक्षिणाहीनंसदाजप्यंचनिष्फलं २ आज्ञासिद्धंक्रियासि
द्धंश्रद्धासिद्धंस्वमात्मकं एवंचदक्षिणासिद्धंमंत्रसिद्धंमहत्फलं ३ उपगम्यगुरुंश्रेष्ठमभ्यर्थ्यनत्वार्थवेदिनं जापिनंसगुणोपेतंध्यानयोगपरायणं ४ तोषयेत्तंप्रयत्नेनभा
वशुद्धिसमन्वितं वाचाचमनसाचैवकायेनद्रविणेनच आचार्यंपूजयेच्छिष्यःसर्वदातिप्रयत्नतः हस्त्यश्वरथरत्नानिक्षेत्राणिचगृहाणिच ६ भूषणानिचवासांसिधान्या
निचधनानिच एतानिगुरवेदद्यात्भक्त्याचविभवेसति ७ वित्तशाठ्यंनकुर्वीतयइच्छेत्सिद्धिमात्मनः पश्चान्निवेदयेद्देवमात्मानंसपरिच्छदं ७ एवंसंपूज्यविधिव
त्तुयथाशक्तित्वंचयन् आददीतगुरोर्मंत्रज्ञानंचैवक्रमेणतु ८ एवंतुष्टोगुरुःशिष्यंपूजकंवत्सरोषितं शुश्रूषमनहंकारंस्नातंशुचिमुपोषितं ९ स्नापयित्वाविशुध्य
र्थेपूर्णकुंभघृतेनवै जलेनमंत्रसिद्धेनपुण्यद्रव्ययुतेनच १० अलंकृत्यसुवेषंचगंधस्वर्णविभूषणैः पुण्याहंवाचयित्वाचब्राह्मणानभिपूज्यच ११ समुद्रतीरेनद्यांवा
वागोष्ठेदेवालयेपिचशुचौदेशेग्रहेवापिकालेसिद्धिकरेतिथौ १२ नक्षत्रेशुभयोगेचसर्वदोषविवर्जिते अनुगृह्यततोदद्यात्ज्ञानंममयथाविधि १३ स्वरेणोच्चारये
त्सम्यक्एकांतेतुप्रसन्नधीः उच्चारयोच्चारयित्वाचावयोर्मंत्रमुत्तमं १४ शुभंचास्तुशिवंचास्तुशोभनंचप्रियंत्विति एवंदद्यात्गुरुर्मंत्रंआज्ञांचैवसमाहितः १५
संकल्प्यचजपेन्नित्यंपुरश्चरणपूर्वकं यावज्जीवंतपेन्नित्यंअष्टोत्तरसहस्रकं १६ अनन्यमनास्तत्परोभूत्वासयातिपरमांगतिं जपेदक्षरलक्षंवैचतुर्गुणितमा
दरात् १७ युक्ताशीयंसमीयःसःपौरश्चरणिकस्मृतः यःपुरश्चरणंकृत्वानित्यजापीभवत्पुनः १८ तस्यनास्तिसमोलोकेसंसिद्धःसिद्धिदोभवेत् स्नानंकृत्वाशु
चौदेशेवध्वारुचिरमासनं १९ त्वांचमांहृदिसंचिंत्यसगुणंस्वगुरुंतथा प्राङ्मुखोदङ्मुखोवापिमौनीचैकाग्रमानसः २० विशोध्यपंचतत्वानिदहनोप्लावनादिभिः
मंत्रन्यासादिकंकृत्वासंकलीकृतविग्रहः २१ आवयोर्विग्रहंध्यायन्प्राणापानौनियम्यच विद्यास्थानंस्वरूपंचऋषिछंदोधिदैवतं २२ वीजंशक्तिंतथावा
च्यंस्मृत्वापंचाक्षरींजपेत् उत्तमंमानसंजप्यंउपांशुंमध्यमंविदुः अधमंवाचिकंप्राहुःआगमार्थविशारदाः उत्तमंशिवदैवत्यंमध्यमंविष्णुदैवतं २४
अधमंब्रह्मदैवत्यंइत्याहुरनुपूर्वशः यदुच्चनीचस्वरितैःशब्दैःस्पष्टपदाक्षरैः २५ मंत्रमुच्चारयेद्वाचावाचिकोयंजपस्मृतः जिह्वामात्रपरिस्पंदादी
षदुच्चारितोपिवा २६ अपरैरश्रुतःकिंचित्श्रुतोपांशुस्सउच्यते धियायदक्षरश्रेण्यावर्णाद्वर्णंपदात्पदं २७ शब्दार्थचिंतनंभूयःकथ्यतेमानसोजपः वाचि
कस्त्वेकएवस्यदुपांशुःशतमुच्यते २८ सहस्रंमानसःप्रोक्तःसगर्भस्तच्छताधिकः प्राणायामसमायुक्तःसगर्भोजपउच्यते आद्यंतयोरगर्भोयःप्राणायामः
प्रशस्यते चत्वारिंशत्समावृत्तिप्राणानायम्यसंस्मरेत् ३० मंत्रमंत्रार्थविद्ध्यानीशक्त्याशक्तेमतोजपेत् अंगुल्याजपसंख्यानमेकमेकमुदाहृतं ३१ पंचकंत्रिक

मेकंवाप्राणायामंसमाचरेत् अगर्भंवासगर्भंवासगर्भःतत्रशस्यते ३२ सगर्भाद्दपिसाहस्रःसध्यानोजपउच्यते एवंपंचविधेष्वेकः कर्त्तव्यःशक्तितोजपः ३३
रेखयाष्टगुणंविद्यात्पुत्रजीवैर्दशाधिकं शतंस्याच्छंखमणिभिःप्रवालैस्तुसहस्रकं ३४ स्फाटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षंतु
सौवर्णैःकोटिरुच्यते ३५ कुशग्रंथ्याचरुद्राक्षैःअनंतगुणितंमुने त्रिंशदक्षैःकृतामालाधनदाजपकर्मणि ३६ सप्तविंशतिसंख्यातैःकृतापुष्टिप्रदाभवेत्
पंचविंशतिसंख्याकैःकृतामुक्तिंप्रयच्छति ३७ अक्षैस्तुपंचदशभिःअभिचारफलप्रदा अंगुष्ठंमोक्षदंविद्यात्तर्जनीशत्रुनाशिनी मध्यमाधनदाशांतिकौ
त्येषाह्यनामिका कनिष्ठाकर्षिणीप्रोक्ताजपकर्मणिशोभना ३९ अंगुष्ठेनजपेज्जप्यंअन्यैरंगुलिभिःसह अंगुष्ठेनविनाजप्यंकृतंतदफलंयतः ३९ गृहेजपंस
मंविद्यात्गोष्ठेशतगुणंविदुः पुण्यारण्येतथारामेसहस्रगुणमुच्यते ४१ अयुतंपर्वतेनतीरेनद्यालक्षमुदाहृतं कोटिदेवालयेप्राहुःपरार्धंविल्वमूलगे शिवलिंगाग्रतो
देविजपस्यानंतमुच्यते सूर्यस्याग्नेःगुरोरिंदोःशंभवानांचसंनिधौ ४३ विप्राणांचगवाम्श्वत्थमूलेवैशस्यतेजपः तत्पूर्वाभिमुखंवश्यंदक्षिणंत्वाभिचारके ४४
पश्चिमंधनदंविद्यादुत्तरंशांतिदंभवेत् अन्यासुचदिशास्वेवंवश्याकर्षणविद्विषि ४५ मारणोच्चाटनेजप्यामन्त्रेषुसमाहितैः उष्णीषीकंचुकीनग्नःमुक्तकेशो
थकच्छकः ४६ अपवित्रकरोऽशुद्धःविलपन्प्रहसंस्तथा क्रोधोमदःक्षुधातंद्रीनिद्रालस्यादिवर्जितः ४७ दर्शनंचश्वनीचानांवर्जयेज्जपकर्मणि आचामेत्तत्स
भवेत्तेषांस्मरेद्वामांत्वयासह ४७ नसूचक्रांकितान्ब्रात्यान्नपश्येत्स्त्रीरजस्वला जपेनसहभाषेत्तमौनीमांध्यायमानवः ४९ नचान्यस्पर्शनंकार्यंजपकर्मणिशोभने
एतेषांसंभवेदेविप्राणायामंसमाचरेत् ५० ज्योतींषिचप्रपश्येद्वाकुर्याद्वासंगमेवहि अनासनःशयानोवागच्छन्नुत्थितएववा ५१ रथ्यायामशिवस्थानेनज
पेत्तिमिरान्तरे प्रसार्यनजपेत्पादौचूर्वन्केशानथाशुचि ५२ यानशय्याधिरूढोवाचिंताव्याकुलितोपिवा शक्तस्सर्वमेवैतत् अशक्तःशक्तितोजपेत् ५३
शावसूतिकरेचापिदशधाप्रजपेन्मंत्रं किमत्रबहुनोक्तेनएषजाप्यविधिःशिवे ५४ ईश्वरउवाच पापानांजपतांप्रभंजनकरींविद्यांचपंचाक्षरीं मत्पादप्रवणां
सदाहितकरींमारच्चमुक्तिकरीं सर्वाघौघविदारिणींममदयापारीणधुर्यारणीं दुःखध्वांतनिवारिणींभवनिधेःपारायसंतारिणीं ५५ अष्टत्रिंशत्कलाभिः
शिवमनुमनिशंन्यस्यसर्वांगसंधौअंतर्भावितशंभुपादकमलध्यानानुरागादरः स्वात्मानंशिवमेवभावयतियोदेहेंद्रियाद्युज्झितंसानंदांबुधिमग्नसर्वहृदयः
पंचाक्षराद्याश्रयः ५६ इतिश्रीशिवरहस्येदशमांशेईशानाख्येएकोनचत्वारिंशोध्यायः ३९ ॥ श्रीईश्वरउवाच सदाचारेजपन्जुह्वन्ध्यायन्भ
द्रंसमश्नुते आचारःप्रभवोधर्मोह्याचारःपरमंधनं १ आचारःपरमाविद्याह्याचारःपरमागतिः आचारहीनःपुरुषोलोकेभवतिनिंदितः २ परत्रचसु
खीनस्यात्तस्मादाचारवान्भवेत् यस्ययद्विहितंकर्मवेदैःशास्त्रेषुकथ्यते तस्यतेनसमाचारःसदाचारोनचेतरः सद्भिराचरितत्वाच्चसदाचारःसउच्यते ४ सदा

ई॰र॰पू॰

शिवरहस्य॰ चारस्यतस्याहुःतस्यमूलस्यकारणं अस्तिकंचेत्प्रमादाद्यैःसदाचारादपिच्युतः ५ नदुष्यतिनरोनित्यंतस्मादास्तिकतांव्रजेत् यथेहास्तिसुखंदुःखंसुकृतैर्दु

अ॰४० ष्कृतैरपि ६ तथापरत्रचास्तीतिमतिरास्तिक्यमुच्यते रहस्यमन्यद्वक्ष्यामिगोपनीयमिदंप्रिये ७ नवाच्यंयस्यकस्येतिनास्तिकस्याथवापशोः सदाचारविहीन

स्यपतितस्यांत्यजस्यच ८ पंचाक्षरात्परंनास्तिपरित्राणंकलौयुगे गच्छतस्तिष्ठतोवापिस्वेच्छयाकर्मकुर्वतः ९ अशुचेर्वाशुचेर्वापिमंत्रोयंनचनिष्फलः अना

३४ चारवतांपुंसांअविशुद्धषडध्वनां १० अनादिष्टोपिगुरुणांमंत्रोयंनचनिष्फलः अंत्यजस्यापिमूढस्यमूर्खस्यपतितस्यवा ११ निर्मर्यादस्यनीचस्यमंत्रोयंनच

निष्फलः सर्वावस्थागतस्यापिमय्यभिभक्तिमतःप्रिये ११ सिध्यत्येवनसंदेहोनापरस्यतुकस्यचित् नलग्नतिथिनक्षत्रवारयोगादयःप्रिये १२ अस्यात्यंतमपेक्ष्या

स्यात्नैवसुप्तःसदोत्थितः नकदाचनकस्यापिरिपुरेषमहामनुः १३ असिद्धोथसुसिद्धोवासाध्योवाथभविष्यति सिद्धेनगुरुणादिष्टःसुसिद्धइतिकथ्यते

१४ असिद्धेनापिवादत्तःसिद्धःसाध्यस्तुकेवलं असाधितःसाधितोवासिद्धत्वेषनसंशयः १५ श्रद्धातिशययुक्तस्यमयिमंत्रेतथागुरौ तस्मान्मंत्रांतरंत्यक्त्वासोप

यानधिकारतः १६ आश्रयेत्परमांविद्यांहृद्यांपंचाक्षरींबुधः मंत्रांतरेषुसिद्धेषुमंत्रएषनसिध्यति १७ असिद्धेसिद्धेमहामंत्रेतेपिसिद्धाभवंत्युत यथादेवेष्वलब्धे

ष्वलब्धेष्वपिमहेश्वरि १८ मयिलब्धेतुतेलब्धामंत्रेप्येषसमोविधिः येदोषाःसर्वमंत्राणांनतेस्मिंत्संभवंत्यपि अस्यमंत्रस्यजात्यादिननपेक्ष्यप्रवर्तनात् तथा

पिनैनंक्षुद्रेषुफलेषुप्रतियोगिषु २० सहसाविनियुंजीतयस्मादेषमहाफलः एवंसाक्षान्महादेव्यैमहादेवेनशूलिना २१ हितायजगतामुक्तःपंचाक्षरवि

धिग्रहः यइदंकीर्तयेद्विद्वान्शृणुयाद्वासमाहितः २२ सर्वपापविनिर्मुक्तःसयातिपरमांगतिं ईश्वरउवाच परीक्ष्यशिष्यंविधिवत्चिरोषितंशांतंदांतंभवत्ता

तमद्रिजे दद्याच्चविद्यांसकलापभेद्यांपंचाक्षरीमेभवरोगवैद्यां २३ गुरुंपरिक्षेतविशिष्यशिष्यःभवैकशोषेपविशोष्यमानसं शांतंचदांतंजितमानमोह

मदाद्यविद्याछिदमीक्षणेन २४ भस्मत्रिपुंड्रपरिमंडितकालदेशं उग्रार्चकानुग्रहनिग्रहेरतं मैत्रंत्रिनेत्रपदपंकजभावपात्रंत्रातारमत्रचपरत्रच

तंप्रपद्येत २५ सएवपशुपाशहृद्भवतिभक्तमुक्तिप्रदोभवेनकिलशक्तितोविमलपातभावाछिवे नतंगुरुजनद्रुहेसकलकापकर्मेंद्रियैःविशिष्यमनसा

पिवाविधिरसुष्यशिष्यस्यहि २६ यस्यस्यात्मयिभक्तिरद्रिवरजेतस्मिन्भवेत्सागुरौतस्यायंमनुरेवमुक्तिपरमानंदंदिशेत्केवलं वेदांतरहस्यमस्यहृदिगं

तस्यास्यपद्मेवसेत्नित्यंयस्यमनोःप्रभावभवनंतस्यार्थएवस्फुरेत २७ नाधन्यःकिलसंश्रयेत्तभुवनेपंचाक्षरंकेवलंमान्यस्त्वन्यमनुविहायजपकृत्तस्यान्यथ

मैश्वकिंकिंवन्याश्रमधर्मसंभवफलैःसन्यासविन्यासतोस्वर्धुन्याप्लुतविग्रहाग्रहपरैःतीर्थाटनेनापिकिं २८ त्यक्त्वापंचाक्षरंमेक्षरमनुविभवंभावयंतोप्यभव्या शिवं॰

आधिमाध्यादिविद्वान्दृढतरनियमैःआम्यधामेष्वसक्ताः उद्वावोद्वालएवक्षितिसुरनिकराभासुराचारचोराः घोरएदुःखादिरूढाक्षितिधरस्मणंयांतितो ३४

धाममीशि २९ जात्मंधोनहिवेनिरल्लविषयंषंडःकृतस्त्रीसुखं कन्यासत्पुरुषेणसोरमपदवींवंध्याप्रसूतिक्रियां काकोहंसगतिंखरोमृदुरवंसोरव्य
दरिद्रोयथाश्वानःसिंहपराक्रमंभुवितथानोज्ञानेनमन्मनु ३० केदारेतुहिमाद्रिशिखरभवासंगेत्तथासागरेवाराणस्यांप्रयागेकुरुवरसदनेपुष्करेनैमिषेवा
ओंकारेभृगुतुंगचामरमहाकालेनथाश्रवके श्रीरुद्रेत्तमकोटिकेममशिवेपंचाक्षरावृत्तिभाक् श्रीकंठेगजकाननेद्रुतिपुरेजप्येचकुंभीश्वरेश्वेतारव्ये
विपिनेत्तथार्जुनवनेनृद्धाचलेगोनगे कांच्यांशोणाचलेवाश्रुतिवनकमलेकालहस्त्यांतथाभ्रेहालास्येवरसिंधुकोणगशिवेरामेश्वरेजाप्यतः ३२ तत्रैवं
यदिचंद्रचूडचरणांभोजार्चकोभस्मधृक् रुद्राक्षामलदेहयुक्तहृदयःपंचाक्षरएष्टशतं जप्त्वादेवमथोप्रदक्षिणनमस्कारैश्चमुक्ताघकः गंगातुंगाचकृष्णाकमल
जवनितानर्मदांबाहुदांताताप्तिंवेणाचनीरंभविभववहिनीगोदकासह्यजातां ३३ पंपांकपांचताम्रांशिवगिरितनयामाम्निकासीगराणांतीर्थस्नानंतथासांतत्य
तशिवहृद्यपंचाक्षरस्यः भवेतभसितांगकोविमलपुण्यरुद्राक्षधृक्कृशनश्रुतिशिरोगतंपरमरुद्रमध्यस्थितं ३४ षडक्षरजपादरोभवतिभाग्यपूर्णोजनःशतंत्रिश
त्तमंविकेजपतिपापतूलानलं द्विजोंत्यजचरोपिवापरमसंकरःस्तःकरोमयस्करयदार्चकोयदिभवेत्सधन्योजनः ३५ जपन्नकंभक्तं फलकुलमथाश्मन्द्विजवरोभजे
छक्तोपिचसमुक्तोपिभवति ममक्षेत्रेष्वीशेचसतिशरदंचैकमधुनामनुंधन्योमान्योभवतिकिलसामान्यजनुभाक् ३६ इतिश्रीशिवरहस्येईशानाख्येदशमांशेचत्वा
रिंशोध्यायः ४० मुनिरुवाच नमस्तेतारकाख्येश्रुतःपंचाक्षरोद्भवः धन्योस्मिकृतकृत्योस्मिशिवविद्याश्रवादहं १ केषुस्थानेषुभगवान्पूजनीयोमहेश्वरः
तत्रसंपूजितोदेवःकथंतुष्यतिमेवद २ सविधानंरहस्यंवैयदिस्यान्मयितेदया सूतउवाच तदामुनेर्वचःश्रुत्वाध्यात्वानत्वामहेश्वरं जैगीषव्यायमुनयेप्राहलिं
गार्चनक्रमं ३ संध्यानंमंत्रयंत्रादिप्रदक्षिणनतेःफलं कालाधिकारभेदंचद्विजाःशंकरसंभवः ४ स्कंदउवाच अथतेसंप्रवक्ष्यामिशिवलिंगसमासतः यस्य
विज्ञानमात्रेणविमुक्तोमानवोभवेत् ५ शिवएवस्वयंलिंगंलिंगंगमनशब्दितं लयनात्सर्वजगतांलिंगमित्युच्यतेमुने ६ शिवश्चेतनरूपोहिजडंजगदितिस्थितं
तेनचैतन्यरूपेणजडमेतद्विभासते ७ शिवोनेवजडःसाक्षात्स्वप्रकाशैकलक्षणः अतःसाक्षीशिवःसाक्षात्स्वेधाम्निसमवस्थितः ८ स्वयंज्योतिर्महादेवःअलिं
गोलिंगसंगतः तस्यभासाजगद्भातिजगज्जडमिदंमुने ९ अलिंगस्यापिदेवस्यलिंगंश्रुतिशिरोगतंयोगीध्येयमिदंलिंगंशंभोर्निगमचोदितं १० आगमोक्तानि
लिंगानिभौतिकानिमुनीश्वर अयोगीभौतिकेलिंगेयोगीसर्वत्रभावयेत् ११ सर्वावभासकोदेवःयथाहृदिविराजते तथासर्वगतःशंभुःदेवादिक्कालवर्जितःलिं
गेसंपूजितोविप्रैःभुक्तिंमुक्तिंप्रयच्छति अलिंगोपिमहादेवःशिवलिंगेसमर्चितः १३ भस्मत्रिपुंड्ररुद्राक्षधारकेणार्चितंयदि लिंगंशंभोर्मुक्तिदायिविल्वपत्राक्षता
र्चितं १४ भौतिकेष्वपिलिंगेषुपूजनीयोमहेश्वरःदेव्याकैलासशिखरेएष्टःतुष्टोमहेश्वरः १५ शिवलिंगार्चनस्यास्यप्रभावंकथयस्वमुने देव्युवाच देवदेवमहा

देवकेषुस्थानेषुपूजितः ददासिभुक्तिंमुक्तिंचशिवज्ञानंचशंकर १६ किंतल्लिंगंकथ्थलिंगीतदर्चनविधिंशिव नैवेद्यमुक्तिंशक्तिंचवदमेकरुणाकर १६ ईश्वरोवाच
लिंगोत्पत्तिंप्रवक्ष्यामिश्रृणुत्वकमलानने यच्छ्रुत्वामनुजःसद्योहृद्यज्ञानंजहातिच १७ पूर्वमेकार्णवेघोरेनष्टेस्थावरजंगमे विवादःसुमहानासीत्ब्रह्मविष्णोः
परस्परं १८ अहंकर्ताह्यहंकर्तानमत्तान्योजगत्प्रभुः एवमाहहरिंब्रह्माब्रह्माणंचहरिस्तथा १९ तयोर्दर्पापहारायप्रबोधार्थंचदेवयोः कंदर्पदर्पहादेवःशर्वः
सर्वाशुकल्पकः २० मध्येप्रादुर्बभौसाक्षाज्ज्योतिर्लिंगाकृतिःशिवः तयोःसमभवल्लिंगंऐश्वरंतेजसंपरं २१ ज्वालामालावृतंदिव्यंअप्रमेयमनूपमं योज
नायतविस्तीर्णज्वालामालाविराजितं २२ ज्वालाभिर्मोहितौतस्यलिंगस्यसुरसत्तमौ तदाविस्मयमापन्नौपश्यतावमरौतदा २३ गतावूर्ध्वमधस्तस्यसं
प्रधार्यपरस्परं अधोद्रष्टुमगाद्विष्णुःऊर्ध्वमस्यपितामहः २४ अदृष्ट्वांतमधःश्चोर्ध्वंतौमिमेत्सपरस्परं कृतांजलिपुटौभूत्वास्तोत्रमेतदगायतां २५ ब्रह्मवि
ष्णूऊचतुः अनादिदेवदेवेशविश्वेश्वरमहेश्वर सर्वज्ञज्ञानविज्ञानप्रज्ञाज्ञाननिवर्तक २६ अनेककांतिसंपन्नअनंतासनसंस्थित अनंतशक्तिसंभोगपर
मेशनमोस्तुते २७ परात्परपरातीतमायातीतविवर्जित स्वभावनिर्मलामेयनिर्गुणाकाशमध्यगा २८ योगसांख्यैःदुरापात्मन्निगमांतैकगोचर निरंजननिरा
धारस्वाधारनिरूपप्लव २९ स्वभावभासकामेयभास्यभासकवर्जित सर्वेंद्रियादिरहितभावाभावविवर्जित ३० नमस्तेशिवलिंगायअलिंगायनमोस्तुते
नमस्तेगुह्यलिंगायपरलिंगायलिंगिने नमस्तेज्योतिर्लिंगायअलिंगायनमोस्तुते नमःपर्वतलिंगायवह्निलिंगायतेनमः ३२ नमःस्तेसूक्ष्मलिंगायभावलिं
गायतेनमः जगत्कारणलिंगायजगतांपतयेनमः ३३ नमोहिरण्यलिंगायदिव्यलिंगायतेनमः नमस्तेरुद्रमन्यवउतोतइषवेनमः ३४ नमस्तेअस्तु
धन्वनेकराभ्यांतेननमोनमः यातेरुद्रशिवाघोरातनूभ्यांतेनमोनमः ३५ नमोस्तुनीलग्रीवायसहस्राक्षायतेनमः सहस्रपाणयेतुभ्यंनमोमीढुष्टमायते ३६
कपर्दिनेनमस्तुभ्यंकालातीतायतेनमः नमस्तेचात्तशल्यायविज्यायधनुषेनमः ३७ हिरण्यबाहवेतुभ्यंहिरण्यपतयेनमः सेनान्येतेनमोदेवदिशांचपतयेनमः
३८ नमस्तेहरिकेशायनमस्तेउपवीतिने नमोभवस्यहेत्यैतेजगतांपतयेनमः ३९ पुष्टानांपतयेशंभोक्षेत्राणांपतयेनमः पशूनांपतयेशंभोपत्तीनांपयेनमः
आततायिन्नमस्तुभ्यंवनानांपतयेनमः नमस्तेरोहितायाथवृक्षाणांपतयेनमः ४१ नमस्तेमंत्रिणेदेवकक्षाणांपतयेनमः ओषधीनांचपतयेनमस्तेस्तुभुवं
तये ४२ उच्चैर्घोषायचनमोपत्तीनांपतयेनमः सत्वनांपतयेतुभ्यंधन्वनांपतयेनमः ४३ सहमानायशांतायशंभवेतेमयोभवे आव्याधीनांपतयेतुभ्यंव्याधीनां
पतयेनमः ४४ भिषजेभवरोगाणांप्रथमायप्रमाथिने ककुभायनमस्तुभ्यंनमस्तेस्तुनिषंगिणे ४५ स्तेनानांपतयेतुभ्यंवनानांपतयेनमः तस्कराणांचपत
येनमस्तुभ्यंपिनाकिने ४६ वंचतेभक्तिहीनानांनमस्तेपरिवंचते स्तायूनांपतयेतुभ्यंनमस्तेस्तुनिचेरवे ४७ अरण्यानांचपतयेनमउष्णीषिणेविभो धावतेभ्र

मतेदेव आसीनायस्थितायस्थितायते ४८ शयानायसुषुप्तायजाग्रतेतेनमोनमः नमः सोमायशांतायभीष्मायाथभवायच ताम्रायअरुणायाथशिवायचनमोनमः
उग्रायशंकरायाथशंभवेतेनमोनमः ५० शर्वायसर्वरूपायनमः सर्वगतायच आवयोःपतयेचैवजगतांपतयेनमः ५१ जिह्वाचापलभावेनयद्दिगंगदितंहिवांत
स्तंतव्यमनोपम्यकस्तेस्तोतिगुणार्णवं ५२ श्रीस्कंदउवाच एवंस्तुत्वातदालिंगंनेमतुःशिरसासुरौ ब्रह्मविष्णुभियाभक्त्यास्थितौतौप्रांजलीमुने ५३ लिंगोत्पत्ति
स्तवंपुण्यंयःशृणोतिनरःसदा नोत्पद्यतेहिसंसारेस्थानमाप्नोतिशांकरं ५४ तस्मात्सर्वप्रयत्नेनशृणुयाद्वाचयेत्तथा पापकंचुकमुत्सृज्यशिवलोकमहीयते ५५
अलिंगलिंगीभगवान्महेशोलिंगोत्तमांगेकिलसंनिविष्टः शांतःप्रशांतःपुरुषःपुराणोअणोरणीयान्महतोमहीयात् ५६ इतिश्रीशिवरहस्येईशानाख्येदश
मांशेलिंगोद्भवोनामएकचत्वारिंशोध्यायः ४१ स्कंदउवाच एवंस्तुत्वामहादेवंप्रणम्यशिरसाविभुं ब्रह्मविष्णुतदाविप्रभक्त्यापरमयायुतौ १ लिंगमध्येपरंलिंगं
स्थितंप्रादेशसंमितं समाधिस्तोत्रसंपन्नौदृष्टवंतौशिवात्मकं २ नैवतत्कांचनंरूप्यंनरत्नस्फटिकोद्भवं ज्योतिर्मात्रंस्थितंशांतंकेवलंतच्छिवात्मकं ३ तयोस्तुष्टोमहा
देवःप्रादुर्भूमतुत्तमं श्रीईश्वरउवाच एतत्ममलिंगस्यभवंतंवासुरोत्तमौ योनिःपीठंकंजभवकंजाक्षोलोकशांतये ४ लिंगस्यपरतोधस्त्वाभवंतंवासुरोत्तमौ भवेत्
मुक्तिसाम्राज्यंलिंगेविल्वार्चनात्सुरौ ५ इत्युक्त्वासहसादेवःतस्मिंल्लिंगेतिरोदधे तदाप्रभृतिब्रह्माद्याविष्णुश्चापिसुरोत्तमः ६ लिंगवेदीलिंगपीठंमुनेह्यभवतांतदा
तल्लिंगसदृशंलिंगंप्रतिष्ठाप्यसुरासुराः ७ गणामहर्षयःसिद्धाःपूजयंतिविमुक्तये रत्नस्फटिकधातुभ्योमृत्सैकतसमुद्भवं ८ कृत्वालिंगाकृतिंसर्वेशांभवाःसु
रसत्तमाः भस्मरुद्राक्षसंपन्नाःरुद्रपंचाक्षरादराः ९ पंचामृतैर्विल्वपत्रैःधूपदीपनिवेदनैः प्रदक्षिणनमस्कारस्तोत्रनर्तनकैस्तथा १० प्रातर्मध्यान्हसायान्हेष्व
दोषपूजयन्सुराः तेषांलिंगार्चनादेवपदप्राप्तिरभून्मुने ११ परंशुद्धंनिर्गुणंतत्लिंगमेतन्नदेश्वरं यदाद्यमैश्वरंतेजःतल्लिंगमितिकीर्त्यते १२ कल्पांतेसंस्थि
तालोकाःलिंगेतस्मिन्चराचराः दक्षिणेलीयतेब्रह्मावामतस्तुजनार्दनः १३ हृदयेचैवगायत्रीछंदांस्यन्यानिपार्वति मूर्ध्निलीयंतिवैवेदाःसषडंगपद
क्रमाः १४ जठरेलीयतेसर्वंजगत्स्थावरजंगमं उत्पद्यतेपुनस्तस्मात्ब्रह्मादिसचराचरं १५ आकाशंलिंगमित्याहुःपृथिवीतस्यपीठिका आलयंसर्व
भूतानांलयनाल्लिंगमुच्यते तस्माल्लिंगंप्रतिष्ठाप्यसर्वदेवोद्भवोद्भवं स्थापितंतेनसर्वस्यात्जगत्सर्वंचराचरं १७ तत्पूजयापूजितंवैजगत्सर्वंनसंशयः पूज
यंतिसदादेवाब्रह्मविष्णुमहेश्वराः १८ एवंलिंगंसमभ्यर्च्यसृष्टिस्थित्यंतकारिणः ब्रह्माशैलमयंलिंगंभक्त्यापूजयतेसदा १९ गंधपुष्पादिभिर्नित्यंत्रिका
लंविल्वपल्लवैः तस्यसंपूजनात्प्राप्तंतेनब्रह्मत्वमुत्तमं २० ससर्जजगदेवंहिससुरासुरमानुषं इंद्रनीलमयंलिंगंविष्णुःपूजयतेसदा २१ विष्णुत्वंतेनसं
प्राप्तंपालकोजगतोभवत् हीरसारमयंलिंगंरुद्रःपूजयतेसदा २२ तेनरुद्रत्वमासाद्यजगन्नाशकरोभवत् शक्रोपिदेवदेवस्यपद्मरागमयंशुभं २३

नित्यमभ्यर्च्यपन् भक्त्यानेनशक्रत्वमाप्तवान् लिंगंहेममयंकांतंधनदोर्चयतेसदा २४ तेनासौधनदोदेवोधनदत्वमवाप्तवान् २५ विश्वेदेवामहात्मानोरौप्यलिं
गसमर्चयेत्त् विश्वेदेवत्वमासाद्यमोदंतेशक्रलोकगाः वायुःपूजयेनित्यंलिंगपित्तलसंभवं २६ वायुत्वंतेनसंप्राप्तमप्रमेयमनोपमं वसवःकांस्यजंलिंगंपूज
यंतिविधानतः २७ वसुत्वंतेनसंप्राप्यमोदंतेसुखिनःसदा अश्विनौपार्थिवंलिंगंपूजयंतौभिषग्वरौ २८ तेनतावश्विनौदेवौदेवानांभिषजांवरौ स्फाटिकं
निर्मलंलिंगंवरुणोर्चयतेसदा २९ तेनतद्वरुणत्वंहिप्राप्तंतत्रबलान्वितं लिंगमन्नमयंनित्यंअग्निःपूजयतेसदा ३० अग्नित्वंप्राप्तवांस्तेनतेजोरूपसमन्वितं
तांम्रलिंगसदाकालंभक्त्यादेवोदिवाकरः ३१ त्रिकालंपूजयत्येवतेनसूर्यत्वमाप्तवान् मुक्ताफलमयंलिंगंसोमःपूजयतेसदा ३२ तेनसोमोपिसंप्राप्यसुधा
रश्मित्वमाप्तवान् शालिपिष्टमयंलिंगंगृह्याःसंपूजयंत्यपि ३३ घनीभूताज्यलिंगानिनक्षत्राण्यर्चयंतिहि कर्पूरखंडजंलिंगंनागाःसंपूजयंतिहि ३४ प्रवाल
कमयंलिंगंमरुतःपूजयंतिहि आदित्याःपूजयंत्येवगोमेदंलिंगमुत्तमं ३५ पुष्परागमयंलिंगंरुद्राःसंपूजयंत्यपि वैडूर्यकमयंलिंगंनिर्ऋतिःपूजयेत्सदा३६
यमःपूजयतेनित्यंलिंगमायसनिर्मितं ईशानःपूजयत्येवलिंगंमरकतोद्भवं ३७ नित्यंदारुमयंलिंगंगुह्यकाःपूजयंत्यपि सदासीसमयंलिंगंनागास्सं
पूजयंत्यपि ३८ असुराःसंपूजयंत्येवलिंगंनगरसंभवं तेनजन्यैवलोपेताभवंतिनियतंमुने ३९ गजदंतमयंलिंगंराक्षसाःपूजयंत्यपिगंधर्वाःकौंकुमंलिंगं
भक्त्यासंपूजयंतिहि ४० गंधलिंगंपूजयंतिनियतंचाप्सरोवराः भस्मलिंगंहिपितरःपूजयंतिसदामुने ४१ हरिद्रानिर्मितंलिंगंमातरःपूजयंतिहि अस्थि
निर्मितलिंगंहिपिशाचाःपूजयंतिहि केशनिर्मितलिंगंहिकिंपूर्षाःपूजयंतिहि मनवःसैकतंलिंगंपूजयंतिसदामुने ४३ रसेंद्रकल्पितंलिंगंमुनयःपू
जयंतिहि एवंदेवाःसगंधर्वाःसयक्षोरगराक्षसाः ४४ पूजयंतिसदालिंगंईशानंदेवनायकं सर्वेलिंगमयोलोकःजगल्लिंगेप्रतिष्ठितः ४५ तस्मात्सं
पूजयेल्लिंगंयदिच्छेत्सिद्धिमात्मनः लिंगेदेवोमहादेवःसहदेव्यामवस्थितः अनुग्रहायलोकानांतस्माल्लिंगंप्रपूजयेत् योनपूजयतेमोहात्लिंग
मीशस्यवैमुने ४७ नासौस्वर्गस्यमोक्षस्यभाजनंनहिसोभवेत् यस्तुपूजयतेलिंगंनित्यंत्रिभुवनेशितुः ४८ सस्वर्गमोक्षराज्यानांक्षिप्रंभवतिभाजनं
तस्मादेकमनाभूत्वायावज्जीवंप्रतिज्ञया ४९ अर्चयीतसदालिंगेआपन्नोपिसदाबुधः वरंप्राणपरित्यागःशिरश्छेदोपिवावरः ५० नत्वनभ्यर्च्य
भुंजीयाल्लिंगेदेवंमहेश्वरं एवंनिर्वहतेयस्तुशर्वलिंगार्चनाविधौ ५१ मनुष्यदेहोपिमुनेसरुद्रगणपोत्तमः नास्तिलिंगार्चनात्पुण्यंनास्तिलिंगार्चना
त्परः ५२ नास्तिलिंगार्चनाद्ध्यानंनास्तिलिंगार्चनाज्जपः नलिंगार्चनतुल्यंहिपुण्यमस्तिजगत्त्रये ५३ यतोत्तरप्रीतिकरंमहेशस्यसदामुने नहोमैर्नम
हादानैःप्रीयतेभगवांच्छिवः ५४ यथालिंगार्चनात्प्रीतोदेवदेवोमहेश्वरः नयज्ञैर्नव्रतैर्विप्रप्रीयते॰ ५५ यथालिंगा॰ नाश्रमाचारधर्मैर्वाप्रीय॰५६

यथालिंगा॰ नाक्रतोयप्रदानैर्वा प्री॰ ५७ यथालिंगा॰ नभूमंडलदानैर्वा प्री॰ ५८ यथालिंगा॰ नतीर्थाटनकैः विप्र प्री॰ ५९ यथालिंगा॰ नध्यानैर्नजपैर्वा विप्र
प्री॰ ६० यथालिंगा॰ नप्राणायामनियमैः प्री॰ ६१ यथालिंगा॰ नशांतिदांत्यादिगुणैः प्री॰ ६२ यथालिंगा॰ नियमासनयोगैर्वा प्री॰ ६३ यथालिंगा॰ नमौ
नैर्नैवकाषायवसनैर्वा जटाजिनैः ६४ प्रीयेतस्समहादेवः यथालिंगार्चनात्सदा नास्तिलिंगार्चनाप्राप्यंपदंवाविप्रसत्तम ६५ लोकेनदृश्यतेसर्वैः श्रेष्ठ
मेतन्नसंशयः सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते इतिविज्ञाययत्नेनलिंगेपूज्योमहेश्वरः अप्यामलकमात्रंवाकृत्वालिंगंप्रपूजयेत् ६७ अमंत्रंवासमंत्रं
वाकुलकोटिंसमुद्धरेत् स्कंदउवाच लिंगेष्वेतेषुयस्मिन्नभिरुचिपरमोभस्मरुद्राक्षधृक्स्यात् अभ्यर्च्यानुदिनंमहेश्वरपदध्यानैकसन्मानसः बिल्वा
नांचदलैःसदंबुजसुमैः यःकोपिरंकोपिवाविप्रोवागिरिकन्यकेसहितदामुक्ताघसंघोभवेत् ६९ भवेत्सोण्पाक्षीणोवरदुरितराशिःकिलशिवेक्षणार्धमपि
शंकरक्षणिकलिंगदक्षयाः अलक्ष्यःपुण्यंपरिलभतिगण्यादिरहितंगणश्रेष्ठोभक्त्याममपदजपुण्येनगतिभाक् ७० इतिश्रीशिवरहस्येईश्वराख्येदशमांशेशिव
लिंगार्चनमहिमानामद्विचत्वारिंशोध्यायः ४२ स्कंदउवाच पुनर्वक्ष्येचमाहात्म्यंशिवलिंगार्चनस्यहि नित्यंनैमित्तिकंकाम्यंलिंगपूजाविनिर्णयं १ लिंगभेदेफलंचापि
देव्यैदेवेनकीर्तितं देव्युवाच देवदेवमहादेवकैलासशिखरप्रिय तवप्रियकराणीहकानिलिंगानिशंकर २ तेषामुत्कर्षतःशंभोपूजाचैवाधिकारितः वदलिंगा
निकानित्युःतवपूजाविधौशिव ३ श्रीईश्वरउवाच शृणुपद्मपलाशाक्षिगिरिजेविरजेमले नित्यनैमित्तिकेकाम्येवक्ष्येलिंगान्यनुक्रमात् ४ तेषांपूजाविधिंचापि
मानंलक्षणमीश्वरि पार्थिवान्तैजसंलिंगंवरिष्ठंपरिकीर्तितं ५ तैजसाद्रत्नलिंगानिवरिष्ठान्यर्चनाविधौ चराचरविभागेनलिंगद्वेधाविनिर्मितंपाषाणंस्थावरं
प्राहुःवाणलिंगविवर्जितं तस्थूलंस्थावरंप्राहुःचरंतुचतुरंगुलं ७ सर्वाण्यपिचलिंगानिस्थूलान्येवचशस्यते रत्नानिसूक्ष्मलिंगानिप्रशस्तानिशुभानने ८ स
त्रासान्यपिदेवेशिशस्तानिममपूजने रत्नलिंगेषुदेवेशिफलंवक्ष्येनुपूर्वशः ९ आयुर्वृद्धिकरंहीरंरोगहृन्मौक्तिकोद्भवं सुखकृत्पुष्परागोत्थंवैडूर्यंशत्रुनाशकं १०
पद्मरागंचलक्ष्मीदंइंद्रनीलंयशःप्रदं वैद्रुमंधनदंनित्यंगोमेदंपुत्रपौत्रदं ११ लिंगंमरकतंपुष्ट्यैस्फाटिकंसर्वकामदंहेमजंमुक्तिदंदेविराजतंज्ञानदंनृणां १२
पूजयेताम्रजंलिंगंपुष्टितुष्टिपशुप्रदं पुत्रदंपैत्तलंलिंगंकांस्यंकीर्तिप्रदंशिवे १३ शत्रुमारणकामस्तुलिंगंलोहमयंयजेत् तथासीसमयंलिंगंआयुष्कामोयजे
त्सदा १४ शिवेरसमयेलिंगेसदासन्निहितोस्म्यहं तत्पूजयाकोटिलिंगपूजामन्हेवलभ्यते १५ नप्रतिष्ठादिसंस्कारस्तल्लिंगस्यमहेश्वरि रत्नधातुजंलिंगेषुशस्तावं
तेप्रतिष्ठितिः १६ प्रतिमायांचित्रपटेतथादर्शेमहेश्वरि अयनेपर्वयोर्देवितत्रकुर्यात्प्रतिष्ठिति १७ पार्थिवादीनिलिंगानिवक्ष्यामिपरमेश्वरि मृद्भवंदारुजंलिंगंसै
कतंपिष्टनिर्मितं १८ गांधंसौभाग्यदंविद्धिमन्नमायुर्विवर्धनं पौष्णंसर्वार्थदंदेविमानदंशृंगनिर्मितं १९ सेनापत्यप्रदंपुंसांनागदंतमयंशिवे शालिपिष्टोद्भवं

लिंगपशुदंयवजंबले २० गोधूमजंवातहरंमोद्गस्त्रीमाषजंसुखं तिलकल्कोद्भवंपुण्यंपसिद्धार्थंभयनाशनं २१ गोडंप्रीतिकरंखंसानवनीतंसुखप्रदं गोमयं
रोगनाशायभस्मोत्थंपापहच्छिवे २२ लवणंमैत्रदंदेविमूलजंशत्रुनाशनं वंशांकुरोत्थंवंशादिवृद्धिप्रदमनुत्तमं २३ पुरक्षोभकरंपौरंएमठंकुष्टनाशनं
अस्थिजंमारणेप्रोक्तंकेशजंभयदंत्वरं २४ कुंकुमंधनदंदेविहारिद्रंमंगलप्रदं सौभाग्यदंचकर्पूरंकस्तूरीसंभवंसुखं २५ यावत्कामंपूजयेतल्लिंगान्येतानि
सुंदरि विधिःपार्थिवलिंगस्यसमासान्नतुविस्तरः २६ मल्लिंगार्च्याविधिंवक्ष्येशृणुदेविमयोदितं मदाहरणसंघट्टप्रतिष्ठाव्हानमीश्वरि २७ स्नपनंपूजनंचैव
विसर्जनमतःपरं हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक् २८ शिवःपशुपतिश्चैवमहादेवइतिप्रिये केचित्पंचोपचाराणिपंचब्रह्मादिभिःशिवे २९ षडक्षरे
णोपचाराःकुर्युर्देविपृथक्पृथक् प्रणवादिचतुर्थ्यंतैर्नमोन्तैर्हरनामभिः ३० सर्वमंत्रमयश्चायंओंकाराद्यःषडक्षरःयंयंकाममभिध्यायन्ततत्तंसंकल्पपूजयेत्
३१ यावत्काममसमाप्तिर्हिकुर्यान्मल्लिंगपूजनं ध्यानंतस्यैवविहितंपूजनेपरमेश्वरि ३२ ध्यायेद्देवंमहेशंरजतगिरिवसंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंप
रशुमृगवराभीतिहस्तंप्रसन्नं पद्मासीनंहिदेमाद्गृतममरवरैःपार्श्वदेस्त्वग्वसानं विश्वाद्यंविश्ववंद्यंनिखिलभयहरंभावयेत्पंचवक्त्रं ३३ पंचोपचारैःसंपूज्य
स्नानादीनिसुरेश्वरि मूर्त्तयोष्टौशिवस्यैताःपूजनीनैवदिक्क्रमात् ३४ शर्वायक्षितिरूपायभवायजलमूर्त्तये रुद्रायवन्हिमूर्त्यैचवायवेचोग्रमूर्त्तये ३५ भीमा
याकाशमूर्त्यैचयजतेपशुपायच महादेवायसोमायसूर्यमूर्त्यात्मनेतिदिक्क् ३६ स्तुत्वाध्यात्वानमस्कृत्यपार्थिवंशिवे लिंगानांमयुतंपूज्यमहाराजभयापहं
३८ सहस्रमेकंलिंगानांपूज्यंरोगभयेशिवे सहस्राणितथापंचपुत्रदंपार्थिवार्चनं ३९ काराग्रहविमुक्त्यर्थंशतमष्टोत्तरंजपेत् लिंगानांपार्थिवानांतुलक्षस्या
न्मोक्षसिद्धिदं ४० कोटिंपार्थिवलिंगानांमुक्तिदंस्यान्नसंशयः सर्वपार्थिवलिंगानांनित्यकाम्येष्वयंविधिः ४१ मृल्लिंगंपार्थिवंलक्षंभुक्तिमुक्तिकरंपरं देशं
कालंवलंज्ञात्वाफलंचैवविशेषतः ४२ विद्यार्थीलिंगसाहस्रंधनार्थीचतदर्धकं पुत्रार्थीचार्धसाहस्रंकन्यार्थीचशतत्रयं ४३ विद्वान्लिंगायुतंकुर्यात्सर्व
पापहरंपरं सुहृत्कामःसहस्रंतुधनार्थीचसहस्रकं ४४ मारणार्थीसप्तशतंमोहनार्थीशतत्राष्टकं उच्चाटनार्थीसाहस्रंवश्यार्थीद्विसहस्रकं ४५ दारिद्र्यनाश
नार्थंतुपंचसाहस्रमीरितं पार्थिवेनतुलिंगेनबहवःसिद्धिमागताः ४६ तत्रापिपार्थिवंलिंगंक्षिप्रंसिद्धिप्रदंशिवे कृतेरत्नमयंलिंगंत्रेतायांहेमसंभवं ४७
द्वापरेपारदंश्रेष्टंपार्थिवंतुकलौशिवे रत्नधातुस्फटिकृतेपार्थिवेनैवचंडभाक् ४८ नैवेद्यंचैवनिर्माल्यग्राह्यमेवनसंशयः लिंगान्यमूनिकिलशैल
सूतेमलानितुगानिपार्थिवसुधातुजनेजसानि संपूजितानिनियमेनफलेछुभिर्वानिष्काममुक्तिपरमाणिसदैवगौरि ४९ इतिश्रीशिवरहस्येदशमां
शेपार्थिवलिंगपूजाकथनंनामत्रिचत्वारिंशोध्यायः ४३ श्रीस्कंदउवाच अथातःसंप्रवक्ष्यामिशिवपूजाविधिक्रमं निगमागमभेदेनपूजाप्रोक्ता

महर्षिभिः १ पूजनंशंकरस्यैवबहुधापरिकीर्तितं श्रुतिस्मृतिसमाचारैःतंत्रैरागमभेदतः २ वृहज्जाबालकाःप्रोचुःकेवलंलिंगपूजनं पंचायतनपू
जाहिस्मृतिप्रोक्तामुनीश्वर तंत्रागमोक्तपूजाहिशिवदीक्षावृतांशिवे निगमागमसंयुक्तापूजयन्कथ्यतेनव ४ शिवप्रधानपूजेयंशिवलिंगैकपूजनं के
वलंतेसमासेनसपंचाक्षरसंयुतं ५ प्रवक्ष्यामियथादेवैप्रोक्तंविश्वेश्वरेणहि कैलासशिखरासीनंदेवंकामेश्वरंविभुं ६ ब्रह्मोपेंद्रमहेंद्राद्यैःगणैर्विद्या
धरैस्तथा दानवैर्मुनिभिस्सिद्धैःयक्षरक्षोगणैःपरैः हेरंवस्कंदपूर्वादिगणैर्भक्त्यासुसेवितं अक्षक्रीडालसास्वादलालसंपरमेश्वरं ८ प्रणम्यनंदीप्रोवाचक्री
डंतंपरमेश्वरं क्रीडतोभुवनेशस्यजगदंबिकयासह ९ अक्षपातनाधिकारेतुपक्षपातधियोझ्झितः क्रीडतोक्रमयोगेनजितंदेवेनशंभुना १० अक्षप्रपातादेवेनप्रो
क्तंनंदिन्जितंमया तदासत्याभियोगेनतुष्टोहंत्वयिभक्तितः ११ वरंमेब्रियतांवत्सयत्तेमनसिवर्तते ददामितंनसंदेहःप्रीतेनमनसातव १२ नंदिकेशउवाच तुष्टो
सियदिदेवेशजगतामीश्वरप्रभो वदपूजाविधानेनशैवान्मंत्रान्सुदुर्लभान् १३ चक्रांगन्याससहितान्पूजाकर्मसमन्वितान् शिवोवाच कथयामिमहाभागत्रैलो
क्येष्वपिदुर्लभान् शैवान्सर्वमनुश्रेष्ठान्सर्वतंत्रेषुगोपितान् १४ भक्तोसितिनमेकिंचित्अवाच्यंत्वयिसुव्रत मूलमंत्रांगविन्यासपूजाकर्मसमन्वितान् १५ दीक्षा
भिषेकसहितानधिकारसमन्वितान् उद्धारक्रमयोगेनसर्वकामफलप्रदान् १६ सुसमेभूप्रदेशेतुगोमयेनोपलेपिते पुष्पप्रकरशोभाढ्येगंधधूपतरंगिते १७
विलिखेन्मातृकांतत्रवर्गाष्टकविभेदतः स्वरैःषोडशभिर्वर्गैःप्रथमःपरिकीर्त्तितः १८ पंचपंचाक्षराश्चान्येद्वावंत्यौचतुरक्षरौ वर्गाष्टकंभवेदेवंततोमंत्रान्स
मुद्धरेत् १९ पंचमस्यतुवर्गस्यपंचमंप्रथमंभवेत् षष्ठवर्गांतिमोवर्णःप्रथमांतसमन्वितः २० द्वितीयंवर्णमाख्यातमष्टमस्याद्यमक्षरं प्रथमस्यद्वितीयार्णस
मेतंतत्रितीयकं २१ चतुर्थसप्तमस्याद्यंद्वितीयाद्यसमन्वितं चतुर्थंवर्णमंत्रस्यसप्तमाद्यंतुपंचमं २२ एषपंचाक्षरोमंत्रःप्रणवाद्यःषडक्षरः यत्साधनात्तु
मनुजाःशिवसायुज्यमाप्नुयुः २३ प्रणवस्तुपरंब्रह्मबोधकस्समुदीरितः पंचाक्षरमयान्यस्युःपंचभूतानिसुव्रत २४ भूतात्मकंजगदिदंतेनास्यजगदात्मना
ऋषिरुक्तोवामदेवःपंक्तिश्छंदउदाहृतः २५ सदाशिवोदेवतास्यमंत्रस्यपरिकीर्तितः षडंगानिमनोर्वर्णैःजातियुक्तानिकल्पयेत् २६ तत्पुरुषाघोरसद्यो
वामदेवेशसंज्ञिताः मूलवर्णादिकान्यस्यत्रिषुस्थानेषुतंद्वितः २७ ततर्जनीमध्यमांत्यानामांगुष्ठेष्वथापरः आस्यहृत्पादगुह्यादिमूर्ध्निहस्तेषुचापरः
प्राग्याम्यवारुणोदीच्यामध्यवक्त्रेषुपंचसु ततःषडंगंविन्यस्यवक्ष्यमाणंयथाविधि २९ सर्वज्ञोनित्यतृप्तश्चबोधातोनादिरेवहि स्वतंत्रशक्तिश्चा
लुप्तःभक्तिश्चानंतशक्तियुक् ३० मूलमंत्रेणसर्वैश्वधाम्नेशब्दांतकैःक्रमात् षडंगानिमनोरस्यजातियुक्तानिमंत्रवित् ३१ कुर्वीतगोलकं
न्यासंरक्षार्थैनंदिकेश्वरं हृदिवक्त्रांसयोरूर्वोःकंचनाभौद्विपार्श्वयोः ३२ पृष्ठेहृदिततोमूर्ध्निवदनेनेत्रयोर्नसोः दोःसंधिषुनखाग्रेषुविन्यसेत्

दनंतरं ३३ शिरोवदनहृत्कक्षोऽरूपादद्वयेपुनः हृदिवक्त्रांबुजे कंठेमृगाभयकरेष्वथ ३४ वक्त्रांसहृत्सुपादोरुजठरेष्वन्यसेदथ मूलमंत्रस्य
षड्वर्गान्यथावद्देशिकोत्तमः ३५ मूर्ध्निपादोदरांगेषुहृदयेतांपुनर्न्यसेत् पश्चादनेनमंत्रेणाकुर्यात्तंव्यापकंसुधीः ३६ नमोस्तुस्थाणुभूताय
ज्योतिर्लिंगात्मनेनमः चतुर्मूर्तिवपुश्छायभासितांगायशंभवे एवंन्यस्ततनुर्नंदिन्ध्यायेद्देवमनन्यधीः गोक्षीरफेनधवलंरजताद्रिसमप्रभं ३८ चा
रुचंद्रकलारंजत्जटामकुटमंडितं पंचवक्त्रंधरंशंभुंशितिकंठंत्रिलोचनं ३९ शार्दूलचर्मवसनंनागाभरणभूषितंदक्षोर्ध्वहस्तपरशुंतदधस्ताद्व
रंकरं ४० वामोर्ध्वहस्तहरिणंदधानमभयंकरं सुप्रसन्नमुखांभोजंनिविष्टंपद्मविस्तरे ४१ ब्रह्मविष्णुमहेंद्राद्यैःस्तुतंभक्त्याशिवायुतं वि
श्वाद्यंविश्ववपुषंभवभीतिहरंशिवं ४२ इतिध्यात्वागणश्रेष्ठमानसैरर्चयेच्छिवं उपचारैःषोडशभिःवाह्यपीठेसमर्चयेत् ४३ पद्मंवसुदलंकृ
त्वाकर्णिकाकेसरोज्वलं वहिरष्टदलंद्वंद्वंचतुरस्रत्रयान्वितं ४४ चतुर्द्वारसमायुक्तेमंडलेस्मिन्प्रपूजयेत् एवंपीठंसमभ्यर्च्यमूर्तिंमूलेनहृद्ग
तां ४५ आवाह्यलिंगेमूलेनसंपुष्प्यगणोत्तम पाद्यार्घ्याचमनैर्नीरैःसपश्चैर्वासितैस्तदा ४६ पंचगंधैःपंचफलैःगव्यपंचामृतैरपि गंधपु
ष्पाक्षतोदैःशुद्धोदैस्सिंचयेच्छंकरं ४७ रुद्रसूक्तेनचमकैःचित्त्यापावनमंत्रकैः संस्थाप्यपीठेसंस्थाप्यवाससावेष्ट्यगंधकैः ४८ साक्षतैर्भस
नाबिल्वैःउत्तमैरुत्तमाग्रकैः अन्यपुष्पैर्यथालाभंमंत्रैरेतैर्गणोत्तम ४९ हरोमहेश्वरःशंभुःउग्रोभीमःशिवस्तथा संसारवैद्यःसर्वज्ञइत्याद्यैश्च
नमोंतकैः ५० धूपंदीपंचनैवेद्यंतांबूलंचततोगण दद्यान्मूलेनदेवायप्रणामप्रक्रमस्तथा ५१ नीराजनंनर्तनंचपुनर्मंत्रजपस्तथा आवाहितस्य
हृदयेपुनरुद्वासनंतदा ५२ संग्रहेविधिरेवायंविस्तरेचेद्यथोच्यते एवंभक्त्यागणोत्तमसदालिंगंत्रिकालंयजन् कालेचैकमथद्वितीयमगजेरुद्रो
भवेन्मेनगे तस्यानुत्तमभोगसंपदखिलाप्राप्नोतिभूमंडलेलिंगाराधनसाधनैकमनसातुष्टोविशिष्टोभवेत् ५३ इतिश्रीशिवरहस्येदक्षमांशे
ईशानाख्येशिवपूजाविधानंनामचतुश्चत्वारिंशोध्यायः ४४ श्रीईश्वरउवाच विस्तरेणप्रवक्ष्यामिशिवलिंगार्चनक्रमं षडक्षरेणन्यासादिकृत्वा
पूर्वोक्तवद्गणः १ लघुन्यासेनवासम्यक्पंचांगेनयथाविधि पीठांतपूजनंकृत्वापूजकोभस्मभूषितः २ भूशुद्धिंभूतशुद्धिंचकृत्वावाथस्वशक्ति
तः स्थावरेचेद्वारचंडेगणेःसंस्कारपूर्वकं ३ अस्त्रेणदिग्बंधनादिकृत्वाहुत्वाचपावके भवाद्यैर्नामभिश्चाष्टाचाहुतीःसमिधश्चरुं ४ स्वसूत्रो
क्तेनमार्गेणस्थाप्यवह्निंपृथक्पजेत् पंचलकृपल्लवोपेतमव्रणंकुंभमेवहि ५ संपूर्यशुद्धैरंभोभिरापूर्यविधिवत्तदा तंडुलेषुनिधायेवपुण्या शिवं·
हवाचयेत्ततः ६ ततोर्घ्यैःप्रोक्ष्यमूलेनशास्त्रेणप्रणवेननहि प्राक्पादाद्वारपालांश्चपूज्यधूपादिभिःक्रमात् ७ अंतर्गृहंप्रविश्यैवंलिंगंसंपूजयेत्ततः(३८)

समुत्तार्यतथावासोनिर्माल्यंतद्बहिस्त्यजेत् ८ चंडशायेतितदनुओंनमत्यादिपूर्वकं तिलतैलेपंचगव्यैःतथापंचफलैरपि ९ शालिपिष्टैस्त-
थाकल्कैःगंधपुष्पोदकैरपि वह्निजप्तेनाम्रकुंभेरुद्रसूक्तोदकैःशिवं १० समभ्युषिंचेल्लिंगंतंयथाविभवमेवहि स्नानकालेप्रकुर्वीतवाद्यान्येवंम
नोहरं ११ ततःशंखोदकेनेशंअभिषिंचेच्चमूलतः वासोभिर्वेष्टइत्वेशंगंधैर्लिप्येतलिंगकं १२ त्रिपुंड्रंदापयेल्लिंगेष्टतदीपावलीमपि विल्वपत्रैस्त
थोत्तानैरुत्तराग्रैरथार्चयेत् १३ शताष्टनामसंख्याभिःकुसुमैर्मालिकादिभिः धूपंदीपंचनैवेद्यंतांबूलमुपचारकं १४ छत्रचामरमायूरमज्जनाद
र्शकैरपि प्रणवाद्येनमंत्रेणतल्लिंगेनापिभक्तितः १५ नीराजनंनृत्यगीतंवाद्यंनत्वाप्रदक्षिणा स्तोत्रंचेतिसमासेनस्थावरेष्वविधिःशिवे १६ त
तोदेवींगणेशंचस्कंदंचंडेश्वरादिकान् तत्तन्मंत्रेणमेधावीतल्लिंगेष्वनमोंतकैः १७ उपचारैश्चशिववत्पूज्यास्तेमीगणेश्वराः मूलबेरेंचसंपूज्यो
प्रोक्षणंधातुबेरके १८ उपचारंयथापूर्वंकुर्यान्नीराजनंपृथक् देव्यैपूर्वंगणेशंचस्कंदंचंडेश्वरंवृषं १९ नृत्तेशंदक्षिणामूर्तिंसोमास्कंदंचरएचरे
शिवस्यसर्पिषाप्रोक्तंस्नानंवापिस्थिरेचरे २० तावतामधुनाचैवदध्नाक्षीरेणतावता सहस्रधाराशतकशंखैर्गोश्रृंगजैर्जलैः २१ पंचविंशतिमूर्ती
नामेवंनोचेत्रिमूर्तिषुभैरवस्यांतिमोपूजाकार्याद्रात्रौदिवापिहि २२ नित्यादपिद्विगुणितांकुर्यात्पूजांतथोत्सवे मासर्क्षायनयोरेवंग्रहणेसोमसूर्य
योः २३ पर्वण्यपिविशेषेणवेरेपूद्वर्तनंचरेत् पंचामृतानास्नपनेचैवमभ्यांगकेशिवे २४ स्नानंपलशतंज्ञेयंअभ्यंगःपंचविंशतिः पलानांद्वेसहस्रेतु
महास्नानंप्रकीर्तितं २५ प्रतिष्ठातुमहास्नानंस्थिरेचाभ्यंगकंचरे शिवस्यसर्पिषाप्रोक्तंस्नानंवापिस्थिरेचरे २६ तावतामधुनाचैवदध्नाक्षीरेणतावता।
सहस्रधाराशतकशंखैर्गोश्रृंगकैर्जलैः २७ प्रदोषेसोमवारेचचतुर्दश्यष्टमीषुच पूजैवंद्विगुणाकार्याशिवरात्र्यांचयामसु २८ त्रिकालेष्वेवमेवंष
ड्कालेकालउच्यते प्रातःसंगवमध्यान्हप्रदोषेथनिशीथके २९ अरुणोदयकालेचषट्कालंस्थावरार्चने प्रातर्मध्यान्हसायान्हेपूजास्याच्चरलिंग
के ३० वर्जयित्वानिशीथंचमाघकृष्णांचतुर्दशीं प्रतिष्ठासुत्रिगुणितंस्थावरेपूजनंभवेत् ३१ दैवेचार्षेस्वयंभूतेभिन्नेभग्नेथसंधिते पूजांमांडलि
कींकुर्यात्त्रिगुणंहोमतर्पणं ३२ द्विजानांभोजनंचैवचतुर्गुणितमाचरेत् स्थावरेजंगमेचैवएषसामान्यतोविधिः ३३ चरेवास्थावरेवापिमूर्तीनां
पूजनंभवेत् सर्वोपचारैराध्यमध्येवत्सततोर्चयेत् ३४ प्रथमेष्टदलेमूर्तिःयजेत्तत्पुरुषादिकाः दिक्पतेषुगणश्रेष्ठाःईशंमध्येसमर्चयेत् ३५
पीतासितश्वेतरक्तयत्राभाश्चतुराननाः वराभयमृगांश्चैवपरशुंबिभ्रतीकरैः ३६ कोणत्रयेषुमध्येचनिवृत्याद्याःकलायजेत् निवृत्तिश्चप्रतिष्ठाच
विद्याशांतिस्तथैवच ३७ शांत्यतीताःकलाप्रोक्तातेजोरूपाःक्रमात्तदा आग्नेयांपूर्ववायव्यमध्येदिक्षुचपूजयेत् ३८ केसरेषुषडंगानिद्वितीयेष्टपे

दलेपुनः अनेनाद्यंतमनुनायजेद्देवान्प्रदक्षिणं ३९ अनंतसूक्ष्मनामानंशिवोत्तममनंतरं एकनेत्रंचतुर्वाहुंत्रिमूर्तितदनंतरं ४० शितिकंठंग
णश्रेष्ठंशिखंडिनमितिक्रमात् श्वेतपीतसितारक्तकृष्णधूसरसांजनाः ४१ किरीटार्पितबालेंदून्पद्मस्थान्नागभूषणान् त्रिनेत्रान्शूलवज्रेषुचाप
हस्तान्मनोहरान् ४२ ततोर्चयेद्गणश्रेष्ठस्तृतीयेष्टदलेपुनः उमांचंडेश्वरंनंदिंमहाकालोगणेश्वरं वृषभोभृंगिरिटिरित्यर्हतान्यथाक्रमं उत्त
रंदलमारभ्यपीतनीलारुणासितान् ४४ उक्तानिवर्णतश्वेतपाटलान्क्रमतःसुधीः चतुरश्रेगणश्रेष्ठदूर्वादिक्रमतोयजेत् ४५ इंद्रंसुराधिपं
पीतंवज्रहस्तंसवाहनं अग्निंतेजोधिपंरक्तंशक्तिहस्तंसुभूषितं ४६ यमंप्रेताधिपंकृष्णंदंडहस्तंसमर्चयेत् रक्षोधिपंचनृपतिंखड्गहस्तंवलोन्नतं
पाशहस्तंसुशुभ्रांगंवरुणंयादसांपतिं वायुंप्राणाधिपंधूम्रंअंकुशांकंकरंयजेत् ४८ यक्षाधिपंकुवेरंचशुक्लवर्णंगदाधरं विद्याधिपंतथेशानंश्वे
तंशूलकरंयजेत् ४९ नागाधिपंतथानंतंगौरंचश्रीगलंयजेत् लोकाधिपंविधातारंरक्तपद्मासनंयजेत् ५० अंकुशंरक्तवर्णंचशुक्लवर्णंगदांय
जेत् त्रिशूलंनीलवर्णंचयजेदग्रेसमाहितः ५१ रथांगंकरुविंदाभंपद्मंरक्तंसमर्चयेत् लोकपालायुधान्येवंकथितानितवानघ ५२ यएवंपूजयेद्दे
वंससद्यःशिवतांव्रजेत् यद्यशक्तःचरेवापिस्थावरेवाणेश्वरं ५३ केवलंपंचमनुभिःपाद्यार्घ्याचमनीयकंमूलेनत्र्यंवकेणापिशिवमावाह्यपूज
येत् ५४ शताष्टोत्तरसंख्याकंजपेत्तत्रषडक्षरं भवायेतितथाष्टोचनामभिःपूजयेत्ततः ५५ मूलेनधूपदीपादिनैवेद्यांतविसर्जनं स्त्रीशूद्राणांनमोंतेन
पूजनंपरिकीर्तितं ५६ प्रणवाद्यंतवर्णेनयतिःपंचाक्षरेणहि पूजयेल्लिंगमीशानंअन्येषांत्तुयथाविधिं ५७ नास्तिलिंगार्चनसमंतपस्त्रिभुवनेश्वरि य
द्यात्त्वरसेवमेवमाप्राणांत्तगणोत्तम ५८ सएवरुद्रगणपःसभक्तःसशांभवः तदेकस्मिन्दिनेत्यक्त्वापंचाब्दंनरकंव्रजेत् ५९ स्कंदउवाच एवंस्थि
रचरमयेपरमेशलिंगेसंपूजयेद्बुविमुनेवरभोगभक्त्यात् पारत्रिकींसचगतिंलभतेनुरूपांमुक्तोथभक्तिपरमोमयिसत्यमेव ५८ ६० इतिश्रीशिव
रहस्येईश्वराख्येदशमांशेपूर्वार्धेचरस्थावरलिंगार्चननामपंचचत्वारिंशोध्यायः ४५ स्कंदउवाच अतःपरंप्रवक्ष्यामिनित्यनैमित्तिकेफलं कालंलिं
गविशेषंचब्रह्मक्षत्रविशांतथा १ आश्रमाणांचसर्वेषांएषलिंगार्चनेविधिः नित्यलिंगार्चनेशस्तंधातुस्फाटिकसंभवं २ वाणलिंगंमारकतंरसेंद्र
कच्छतंशिवे पार्थिवंकामदंज्ञेयंसर्वकर्मसुशोभने ३ नयस्यशिवलिंगार्चागृहेभवतिशंकरि सनित्यसूतकीज्ञेयोब्राह्मणोवांत्यजोपिवा ४ वाणलिंग
नयस्यास्तिगृहेविल्वादिपूजितं तद्गृहेजलमप्यंवानपेयंसर्वदावुधैः ५ एककालंद्विकालंवात्रिकालंनित्यमेववा येर्चयंत्येवनियतंममलिंगंमहेश्वरि
६ तेवैगणेंद्राविज्ञेयाःमसंतोषप्रदाःशिवे प्रदोषेषुविशेषेणयःपूजयतिशंकरं ७ समहापातकैर्मुक्तोभविष्यतिनसंशयः ऋणदारिद्र्यनाशायप्रदोषेपू

जयेच्छिवं ८ घृताभिषेकंकुर्वीतकुर्यात्पलदशेनवै उत्पलैर्बिल्वपत्रैश्चपूजनीयोमहेश्वरः ९ सोमवारेचनैशंभोनक्तमायुष्यवर्धनं क्षीरेणस्नापयेद्देवं
गवांकापिलजेनवा १० कमलैर्बिल्वपत्रैश्चपूजनीयोभवोमुने चतुर्दश्यांनिशीथिन्यांअपामार्गैश्चबिल्वकैः पूजयेल्लिंगमेकाग्रोदध्नासंस्नापयेच्छुचिः
कालाष्टम्यांकालकालमर्चयेन्नियतव्रतः १२ मधुनास्नाप्यदेवेशंबिल्वपत्रैःप्रपूजयेत् बोधायनोक्तविधिनासर्वनक्तव्रतंशिवे १३ तत्रावाहनपूजांचप्रव
क्ष्यामिशिवेतव यथाभिरुचितेलिंगेधातुजेस्फाटिकेपिवा १४ बाणेरसेंद्रकलितेतथामरकतोद्भवे स्थाप्यपीठेरंगवल्लीमंडितेचोपलेपिते १५ भूमौनक्तव्र
तेमौनीस्नातोभस्मत्रिपुंड्रधृक् रुद्राक्षमालाभरणःजपेत्पंचाक्षरंमनुं १६ संपाद्यपूजाद्रव्याणिशतमष्टोत्तरंशिवे जपेत्षडक्षरंमंत्रंसदाजपपरायणः १७
ऋषिंछंदोदेवतादीन्ज्ञात्वान्यस्यततोमुने करेकरतलेचैवहृदयेचन्यसेद्बुधः १८ ध्यायेत्तत्रमहादेवंपूजादौजपकर्मणि मूलेकल्पद्रुमस्यद्रुतकनकनि
भंहेमसिंहासनस्थं वामांकारूढगौरीनिबिडकुचभराभोगगाढोपगूढं सर्वालंकारदीप्तंवरपरशुमृगाभीतिहस्तंत्रिनेत्रंवंदेचंद्रार्धचूडंगुहगणपशिवाश्लि
ष्टपार्श्वंमहेशं २० ध्यात्वैवंमूलमंत्रंतुजपेदष्टोत्तरंशतं सोदकंकलशंपूज्यगंधपुष्पाक्षतैर्युतं २१ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेचा
स्यस्थितोब्रह्मामध्येमातृगणास्थिताः कुक्षौचसागरानद्यःकलशस्यसमाश्रिताः आयांतुशिवपूजार्थंदुरितक्षयकारकाः एवंकलशमभ्यर्च्यपश्चाच्छं
खंसमर्चयेत् त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे २४ पूजितस्त्वंसर्वदेवैःपांचजन्यनमोस्तुते ततःशंखस्थतोयंतुसमंतात्पुरतोक्षिपेत् २५ गंगेच
यमुनेचेतिकलशस्थजलंस्पृशेत् पीठपूजांततःकुर्याद्गुरुंगणपतिंतथा २६ दक्षवामेतथाधारशक्तिंचप्रकृतिंपरां अनंतंपृथिवींचैवकैलासंरत्न
मंडपं २७ कल्पवृक्षंरत्नवरसिंहासनमनुत्तमं श्वेतछत्रंचामरंचप्रागादिक्रमयोगतः २८ धर्मज्ञानादिवैराग्यऐश्वर्यप्राक्समर्च्ययेत् अधर्मंचतथा
ज्ञानंअवैराग्यमनैश्वरं २९ दक्षिणेपूजयेदेतान्सत्वंचैवरजस्तमः मायांविद्यांचवन्हिंचअर्कंसोमंतथैवच ३० आत्मानंनौज्ञानपद्मेप्राणादिदल
केयजेत् वामांज्येष्ठांतथारौद्रींकालींकलविकारिणीं ३१ बलांबलप्रमाथांचसर्वभूतदमन्यकां मनोन्मनींतथैवांस्तांपूजयेत्स्वासनादिभिः ३२ आवा
ह्यक्षणिकेलिंगेपार्थिवेधातुजेतथा बाणवर्जेरसेंद्रेवास्फाटिकेरत्नजेषुवा ३३ साक्षतंचसपुष्पंतुगृह्यस्वहृदयांतरे ध्यायेद्देवंविरूपाक्षंनिमीला
क्षीणिसत्तम ३४ वंदेमहेशंसुरसिद्धसेवितंस्फुरद्रुमैःपूजितपादपद्मं विद्याप्रदंभक्तजनैश्चसेवितंध्यायेत्सदासांबशिवप्रसन्नं ३५ सर्वाघोरधरे
देविपूजार्थंशंकरस्यहि स्थानंदेहिमहादेविपूजिताभवमेसदा ३६ इत्यक्षताभिःसंपूज्यघंटामानाडयेत्ततः आगमार्थंतुदेवानांगमनार्थं

तुरस्रसां ३७ घंटनादंकरोम्यद्यतेनप्रीतोभवेच्छिवः लिंगपीठेचसंस्थाप्यदेव्यासहततोयजेत् ३८ सपुष्पंसाक्षतंगृह्यप्रार्थयेन्महेश्वरं आ
राधितोमनुष्येस्त्वंसिद्धैर्देवासुरादिभिः ३९ आराधयामिशक्त्यात्वामनुगृहाणमहेश्वर आत्वावहंत्वितीशानंसोदकेनाभिषेचयेत् ४० मधुपर्क
ततोदद्यात्मूलेनैवतथामुने आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि ४१ घृतंमिमिक्षेतिघृतंमधुवातेतिवैमधु स्वादुःपवस्वेतिसितांनारि
केलजलंतथा ४२ रंभाफानसजाम्रादिजंवीरैक्षुरसैरपि षडक्षरेणसंस्नाप्यगंधरत्नसुमादिभिः ४३ अभिषिच्यततोन्नस्यअंधसस्पतयेत्यपि
कुर्वीतान्नाभिषेकांततंन्निरुत्यसुशीतलैः ४४ धारापात्रगतांभोभिःअविछिन्नादिधारया गोश्रृंगैरपिवासम्यक्रुद्रावृत्त्याभिषेचयेत् ४५ एक
वारंत्रिवारंवातथैकादशिनीमपि संस्नाप्यासाद्यपीठेचवासश्चैवोपवीतकं ४६ दद्याच्चत्र्यंबकेनैवभूतिगंधाक्षतांस्तथा उत्तानेरुत्तराग्रैश्चबिल्वैः
संक्षालितैर्यजेत् ४७ मालाभिःकुसुमैश्चैवशान्ताष्टोत्तरनामभिः भवायेतितथैवाष्टौनिधनेत्यादिभिस्तथा ४८ धूपंदीपंचनैवेद्यंतांबूलंचवि
शेषतः देवीपार्श्वेयजच्छंभोःवामेदक्षेथवामुने ४९ देवीमंत्रेणाभिषिच्यगंधधूपादिवाससा पूजयेल्लिंगपार्श्वेतुस्कंदंचगणपंतथा ५० नी
राजयत्ततोलिंगंदेवींस्कंदविनायकौ कांस्यवादित्रनिनदैःघोषयेच्छिवमंदिरं ५१ प्रदक्षिणात्रयंकृत्वानमस्कारादिपंचकं षडक्षरेणमंत्रेण
कुर्वीतमुनिसत्तम ५२ छत्रंचचामरेदिव्येव्यजनादर्शकंततः नृत्तंगीतंतथावाद्यंप्रदद्यान्मूलमंत्रतः ५३ स्तोत्रमेतत्पठेद्विद्वान्वेदत्रय
गतंद्विज देवार्णवाजपेद्विद्वान्एतत्स्तोत्रंपठेत्सदा ५४ नमोनादात्मनेतुभ्यंनमोबिंदुकलात्मने अलिंगलिंगरूपायरूपातीतायतेनमः
५५ त्वंमातासर्वलोकानांत्वमेवजगतांपिता त्वंभ्रातात्वंसुहृन्मित्रंत्वमेवप्रपितामहः ५६ नमःसद्यायदेवायनमस्तत्पुरुषायच अघोरायनम
स्तेस्तुवामदेवायतेनमः ५७ ईशानायनमस्तेस्तुदेवदेवायतेनमः सर्वायक्षितिरूपायशुद्धमात्रायतेनमः ५८ नमःपशूनांपतयेयामिकाय
मितौजसे भवायवायुरूपायशब्दरूपायतेनमः ५९ महादेवायसोमायअमृतायनमोनमः उग्राययजमानायनमोस्त्वाकाशमूर्तये ६० त्व
दष्टमूर्त्तिभिर्व्याप्तंजगत्सर्वंचराचरं मयाह्यज्ञानतःशंभोयत्कृतंपूजनंतव ६१ तत्क्षमस्वमहादेवशरणागतवत्सल इतिस्तुत्वाजपेन्मंत्रंषड
क्षरसमन्वितः ६२ न्यासंदिग्मोचनंकृत्वाशंखतोयभ्रमेतच तेनैवप्रोक्षयेद्देहंनिर्माल्यांशुविवेत्त्रिधा ६३ नात्यंततंप्राशयच्चनमूत्रपरिणा शिवं॰
मियत् हृत्पद्मकर्णिकामध्यमुमयासहशंकर ६४ प्रविशत्वंमहादेवसर्वैरावरणैःसह अयंमेहस्तइत्याद्यैःस्पर्शोलिंगेविधीयते ६५ एवं ४०

चतुर्दश्यां तथा नक्तं
चाहरहः पूज्यो लिंगे देवः सनातनः एककालं द्विकालं वा त्रिकालं वा यथाबलं ६६ अष्टम्यां सोमवारे च प्रदोषे दोषवर्जिते
नित्ये नैमित्तिके पि च ६७ ग्रहणे विषुवे चैव पूजेयं कथिता तव नास्ति शंभोः पूजनेन सदृशं न च षं भवेत् ६८ पूजया भोगमोक्षौ च सिद्ध्यतः किं बहू-
क्तितः स्कंद उवाच तुरंगमातंगशतानागसंघा स्याच्छुभलिंगार्चकगेहनिष्ठाः धनं च धान्यं वरवस्त्ररत्नभुक्त्यन्नसिद्धिं गृहसौधपंक्तिं पराक्रमं से-
वं कलासु दाक्ष्यं पुत्रांस्तथा त्र्यक्षसमर्चनाल्लभेत् ७० इति श्रीशिवरहस्ये ईश्वरांशे मदशमांशे षट्चत्वारिंशोऽध्यायः ४६ ॥ श्रीस्कंद उवाच
जैगीषव्य शृणुष्वाद्य संवादं परमेशयोः कदाचिद्विहसंतीसा देव्यपृच्छत शंकरं १ श्रीदेव्युवाच देवदेव महादेव करुणाकर शंकर वेदांते निर्गुणे
देवः कथितस्त्वं महेश्वर २ त्वल्लिंगं निर्गुणं साक्षात्पूजितं मुक्तिदायकं अमूर्तस्यापि मूर्तित्वं कथं देव महेश्वर ३ श्रीस्कंद उवाच इति देव्या पादे
माऽपृष्टस्तु स उवाच तां रहस्यं गोपनीयं तेनाख्येयं यस्य कस्यचित् ४ श्रीशिव उवाच शृणुष्व गिरिजे धन्यं मूर्तीनामुद्भवं मम अमूर्तस्यापि
मे मूर्तिः कल्पिता लोकसेत्तवे लिंगमे निर्गुणं साक्षात् परमानंददायकं सकृत्पूजां कृतां पुंसां उत्तवार्थ शिवागमेः ६ सद्योजातोद्भवाः पंच प-
चतत्पुरुषोद्भवाः अघोरसंभवाः पंच वामदेवभवाः शिवे ७ ईशानसंभवाः पंच तेषां नामानि तेः शृणु महालिंगोद्भवं श्रीमत् दक्षिणामूर्ति मी-
श्वरि ८ एकपादं सुखासीनं विघ्नेशानुग्रहे रतां सद्योद्भवा मूर्तयो मीतत्पुरुषभवा शृणु ९ सोमास्कंदं वृषारूढं पुरत्रयविदारणं चंडीश्वरानु-
ग्रहदं कामभंकालदारणं १० अघोरसंभवं देवी कालदारणतः प्रिये गजसंहरणं वीरभद्रं भिक्षाटनेश्वरं ११ किरातरूपकं कालं कल्याण-
कृति सुंदरं वामदेवभवाः पंच मूर्तयो मी गिरींद्रजे १२ विष्णुचक्रप्रदातारं देवकांतार विग्रहं गौरीसहायं वैकुंठनेत्रार्पं चंद्रशेखरं १३ ईशान-
वक्त्रसंभूता मूर्तयो मी मम वहि जलंधरारकंनाख्यको विदं कालभैरवं १४ शरभं विद्धि गोविंदजनकं नागभूषणं अंधकारिं विरूपाक्षं विराट् रूपं
दिगंबरं १५ कैलासनाथं कल्याणरुद्रं कर्पूरसुंदरं कालाग्निरुद्रं शूलासिधरं व्याघ्राजिनांबरं १६ पंचवक्त्रं कंदवक्त्ररूपिणं मुनिरूपिणं षो-
डशाद्या कृति साक्षात्योगाग्नि विनिवारणं १७ ज्वरार्ति शमनं विष्णुवल्लभं भक्तवत्सलं विधिमस्तकसंहर्तं पार्वती प्रणयात्मकं १८ गंगाधरं
चंद्रधरं मृगहस्तं चतुर्भुजं भूतेश्वरं कोटिरुद्रं मूर्तिशक्तिलसत्करं १९ पंचब्रह्मोद्भवाः सर्वाः कामदाः शांतविग्रहाः एवं ध्यायंति मे मूर्तिस्ते
षां ज्ञानं भवेच्छिवे २० तेभ्यो विशिष्टा देवेशि मूर्तयस्तुः त्रयो मम ज्ञानदा दक्षिणामूर्तिः सच्चिद्रूपा निरामया २१ मुनीनां ज्ञानदात्री च सदैवोपनिषत्स्तुता

ई॰द॰पू॰
शिवरहस॰ केवल्यश्रुतिवोध्यानिश्री मूर्तिर्मम महेश्वरी २२ उमासहायात्मसाचनीलकंठविमुक्तिदा श्रीरुद्रकथितावेयंसभापतिरितिस्थिरा २३ आसांमूर्ति
षवोत्कृष्टा केवल्यश्रुतिदर्शिता मूर्तिःपरतराशंभोःस्तन्मूर्तस्याप्यसंगिनः २४ कल्पयंतियथाज्ञेयांस्वाधिकारानुरूपतः ध्यायीनीशानमित्या
अ॰४७ द्याःश्रुतयोध्यानकर्मणि २५ प्रवृत्तास्तामहादेवीध्यानमीशेविमुक्तिदं विष्णुब्रह्मेंद्ररुद्राणांजननीयापराशिवा २६ सैवोमाप्रोच्यतेवेदैःतया
युक्तोमहेश्वरः असंगोपिपराणेदसच्चिद्धर्मसुखाद्वयः २७ मायासाप्रकृतिर्ज्ञेयासमायीपरमेश्वरः तस्यावयवभूतैस्तुयन्नजगदेतत्प्रकाशते २८ नैव
४१ नानास्तिभूतेभ्योप्यतिरिक्तंजगन्मुने तपसैवमनेज्ञालानिष्क्रियंशांतमव्ययं २९ अगाधरससरूपादिमस्पर्शंतन्मनोतिगं ध्यानध्येयादिरहितं
निष्कलंतत्तुरीयकं ३० मनोधर्मोध्यानविधिःतन्मनोनिगमंमुने तत्तस्मात्सकलंशंभुंनिष्कलंसंप्रपूजयेत् ३१ हृदाकाशंभासमानंनीवारशकणाकृ
ति ज्वलंतमनिशंवन्हितच्छिखायांमहेश्वरं ३२ आकाशेनिर्मलेशुद्धेभासमानसुशीतलं सोममंडलमापूर्णमचलंदृष्टिगोचरं ३३ ध्यात्वातमध्येमहादेवं
उमयासहितंशिवं शुद्धस्फटिकसंकाशंचंद्ररेखावतंसकं त्रिलोचनंचतुर्वाहुंनीलग्रीवंपरात्परं ध्यायेन्नित्यंधारणायाघटिकापंचकंमुने ३४ आदित्य
मंडलेवापिसोहमित्यपिसत्तम हिरण्मयंश्मश्रुकेशंहिरण्मयनखंशिवं ३६ हिरण्यवाहुंवरदंअंविकापतिमीश्वरं ध्यायेनित्यंसदाभ्यस्यसोहमस्मी
तिभावयेत् ३७ स्थानेष्वेतेषुविप्रेंद्रध्यायीतपरमेश्वरं श्रीपर्वतशिरस्थानेकेदारंतुललाटकं ३८ वाराणसीभ्रुवोर्मध्येविज्ञेयाध्यानकर्मणि कुरु
क्षेत्रंकंठमेतत्प्रयागंकुचमुच्यते ३९ चिदंवरंतुहृन्मध्यमाधारःकमलालयः एषुस्थानवरेष्वीशंभावयेदूहृगेषुच ४० हृदयेनृत्यमानंमांध्यायितें
वलयासह आत्मतीर्थोभिनिरतोभौतिकंतीर्थमुत्सृजेत् ४१ अत्यल्पोहियथावन्हिःशुष्कमार्द्रंचनाशयेत् ध्यानाभ्यासःतथाल्पोपिमहत्पापंव्यपोहति
४२ ईश्वरउवाच ध्यानमेतद्द्गजेविमुक्तिदंचंद्रचूडचरणोसकेवलं यस्यनस्यहृदयेवसतीशःयस्यमुक्तिमपितस्यदिशामि ४३ इतिश्रीशिवरहस्येईश्व
राख्येदशमांशेपंचविंशतिमूर्तिकथनंनामसप्तचत्वारिंशोध्यायः ४७ ॥ श्रीईश्वरायनमः पूजाकोटिप्रदंध्यानंध्यानमेवंममप्रियं निर्वातेनिर्भये
शुद्धेसर्वालंकारशोभिते १ गंधपुष्पामोदवरेमृदुतूलोपरिस्थितः ध्यायीनैवंमहादेविमहाकैलासवासिनं २ भस्मत्रिपुंड्ररुद्राक्षमालालंकृतविग्रहः
पंचाक्षरवरासोथनिमील्याक्षियुगंशिवे ३ धारणाभिःसमाहृत्ययोगेनाप्लाव्यवैतनुं सर्वतश्चित्तमाकृष्यहृदयांभोजमध्यमे ४ प्राणायामैःविकसि
तेपरमेश्वरमंदिरे अष्टैश्वर्यदलोपेतेविद्याकेसरसंयुते ५ ज्ञाननालेमहाकंदेप्रणवेनप्रबोधिते मध्येहृदयपाथोजेमहादेवासनोचितं ६ शिवं॰ ४१

महिताकारशोभाढ्यंमंटपंपरिचिंतयेत् अतिचिंतामणिप्ररव्यैःअतिकौस्तुभकांतिभिः ७ रत्नैरप्राकृतैस्त्रैलोक्यंरंजयंतंसमंततः दक्षिणद्वारपार्श्वेस्यसंस्मरेन्नंदिकेश्वरं ८
अनेकरुद्रप्रमथभूतसंघैर्निषेवितं शिवधर्ममहाध्यक्षंशिवानःप्रपालकं ९ चामीकराचलप्रख्यंसर्वाभरणभूषितं वालेंदुमकुटंसौम्यंचतुर्बाहुंत्रिलोचनं दीप्त
शूलमृगटंकंस्वर्णवेत्रधरंप्रभुं चंद्रविंवाभवदनंफालपंड्डजराभरं ११ उत्तरद्वारपार्श्वेतुतत्पत्नींमरुतांसुतं सुयशांसुव्रतामंवापादमंडनतत्परां १२ सहिता
रुद्रकन्याभिःसखीभिश्चाप्यनेकशः मध्येयमंडलस्यास्यवेदिकांविद्रुमप्रभां १३ चतुस्तंभयुतांध्यायेच्चतुरश्रीमनोहरां तस्यांशक्त्यादियुक्तंचतत्त्वान्पर
मानसं १४ आधारशक्तिंश्यामांगींकरैर्धृतवराभयां तस्याःपुरस्तादाकंठंअनंतंकुंडलाकृतिं १५ तस्योपरिप्रभुंध्यायेसिंहासनमुमापतेः धर्मज्ञानंच
वैराग्यंऐश्वर्यंचतद्ध्रयः १६ आग्नेय्यादिस्थिताश्चैतेनतूपीतरक्तहरित्प्रभा सिंहाकारासिंहकोस्याप्रत्येकंपरिवारिताः १७ अधर्मादीनिपूर्वादिफलका
निसमंततः वाणावर्तप्रकाशानिताराकारधराणिच १८ मध्येतत्फलकस्यास्यसाक्षाल्लक्ष्मीपतिस्थितः मध्येप्राकादिमध्यस्थःप्रणवादिस्वराष्ट
कं १९ योगासनंविभोध्यायेत्कूर्माकृत्यनलप्रभं अस्याधःछदनंपद्ममासनंविपुलंस्मरेत् २० शिवधर्ममहाकंदंशिवज्ञानैकनालकं अष्टैश्व
र्यदलोपेतंपूर्वादिक्रमयोगतः २१ अष्टवामादिशक्त्यंगरुद्रकल्पितकेसरं वैराग्यकर्णिकांतस्थंवामादिनवबीजकं २२ वामाज्येष्ठातथारौद्रीका
लीविकरणीतथा वलपूर्वाविकिरिणीवलप्रमथिनीतथा २३ अष्टावेताःसर्वभूताःद्मन्योनवशक्तयः केसरेषुस्थिताध्येयारक्ताभाधृतचामराः
२४ कलाधरकलाद्योतकर्णिकायामनोन्मनीं भर्तुरीशानदिग्भागेपाशांकुशवराभयां २५ पद्मासनस्थितंध्यायेदेवस्यविमलासनं गणांविकां
महादेवींनतोगौरींप्रचोदयात् २६ क्रांतशक्तिभिरन्याभिःसौम्याभिर्विमलासनं तस्योपरिगुणानांचमंडलानांचसाधकः २७ तत्वानामपिमूर्ती
नांत्रितयानांविभावयेत् सर्वासनोपरिचिंतंविचित्रकुसुमासदं २८ परंव्योमावकाशाख्यंआसनंकल्पयेत्प्रभोः तस्मिन्सदाशिवंध्यायेद्हृत्पद्मा
सनस्थितं २९ शुद्धस्फटिकसंकाशंप्रसन्नंशीतलद्युतिं विद्युद्वलयविद्योतिजटामुकुटधारिणं ३० शार्दूलचर्मवसनंमंदस्मितमुखांबुजं
रक्तपद्मदलप्रख्यंपाणिपादतलाधरं ३१ द्वात्रिंशल्लक्षणोपेतंसर्वाभरणभूषितं दिव्यगंधानुलिप्तांगंदिव्यमाल्यैरलंकृतं ३२ पंचवक्त्रंदशभु
जंप्रतिवक्त्रंत्रिलोचनं दक्षिणंशूलवज्रासिपरश्वाभयमुद्रिकं ३३ वामेचदधतंनागंपाशंघंटांतथांकुशं अस्योर्ध्ववक्त्रंविलसद्वालेंदुमकुटोज्वलं
३४ ध्यानस्यमूर्ध्वाभिमुखंगगनच्छाययासितं पूर्ववक्त्रंमहेंद्रस्यच्छाययाकनकप्रभं ३५ वालेंदुमकुटंसौम्यंसंप्राप्तनवयौवनं दक्षिणंवदनंका
लच्छायासत्कांजनप्रभं ३६ भ्रकुटीकुटिलंघोरंरक्तवृत्तत्रयक्षणं दंष्ट्राकरालदुर्द्धर्षंस्फुरिताधरपल्लवं ३७ चंद्रापीडंचलत्केशंकिंचिच्चलि

शिवरहस्य. तयोवक्त्रं उत्तरंयक्षराजस्यछाययाविद्रुमप्रभं ३८ ललाटतिलकोपेतंनीलालकविभूषितं सविलासंत्रिनयनंचंद्राभरणभास्वरं ३९ इच्छाज्ञानक्रियारूपं
अ०४८ विलसल्लोचनत्रयं पश्चिमंपाशहस्तस्यछाययाचंद्रसंनिभं ४० चंद्रोत्तंससिताकारंकृतभस्मत्रिपुंड्रकं इतिध्यात्वापुनरपिध्यायेद्देवंसदाशिवं ४१ सू
र्यचंद्राग्निनयनंनीलकंठंजटाधरं ज्ञानंचंद्रकलाजूटंउद्यद्बाहुचतुष्टयं ४२ त्रैगुण्यामलसंभूतैःदिव्यैर्दशभिरायुधैः सर्वज्ञतादिसंसिद्धिहृदयादिष
४२ डंगकं ४३ पंचब्रह्मात्मवदनंपंचसादाख्यमूर्तिकं श्रीमत्पंचाक्षरमयंप्रणवाकारशालिनं ४४ समस्तवर्णरूपंचपंचब्रह्मकलामयं निवृत्तिज्ञानवैरा
ग्ययोगमोक्षप्रतिष्टया ४५ आकंठविद्ययासिद्धमाललाटंतुशांतया तदूर्ध्वेशांत्यतीतात्मकलयापरिकल्पितं ४६ एवंपंचकलारूपमिदंसदाशिवंवपुः
चतुर्मूर्तिस्तदिद्धूर्णाप्रतिवक्त्रांशुमंडला ४७ एकवक्त्राशशांकाभांप्रतिष्ठापद्मधारिणीं अग्निवर्णात्रिवदनांविद्याशांतिलसत्करां ४८ कृष्णवर्णाच
तुर्वक्त्राशांतिध्वजविराजितां पाशहस्तंचवदनांशांत्यतीतांशशिप्रभां ४९ सर्वाःपद्माक्षमालाढ्याअभयेनविराजिताः चतुर्भुजास्त्रिनयनाःपीनो
न्नतपयोधराः ५० आसांपंचाध्वगर्भीताषडध्वांतासदाशिवः मंत्राध्वाचपदाध्वाचवर्णाध्वाभुवनाध्वकः ५१ तत्वाध्वाचकलाध्वाचषडध्वा
चइतीरिताः चतुर्विंशत्युत्तराणांभुवनानांशतद्वयं ५२ भुवनाध्वाचसंचिंत्यरोमवृंदात्मनाविभोः पंचरुद्रादिरूपेस्तुवर्णैर्वर्णाध्वकल्पना ५३
असौत्वगात्मनाचिंत्योदेवदेवस्यशूलिनः सप्तकोट्यो महामंत्रैः मूलविद्यासमुद्भवैः ५४ मंत्राध्वारुधिरात्मासौविचिंत्यःपार्वतीपतेः अनेकभेद
संभिन्नामंत्राणांपादसंहतिः ५५ पादाध्वासौपशुपतेःसिरामांसतयामतं पृथिव्यादीनिषट्त्रिंशत्तत्वान्यागमवेदिभिः ५६ उक्तान्यमीभिस्तत्वा
ध्वाशुक्लमज्जास्थिरूपभृत् नास्यदेहेस्तिरुधिरंनमांसंनास्तिकिंचन ५७ प्रतिबिंबमिवाकाशेशक्रचापमिवांबरे ज्योतिर्मयतयासिद्धमिदंसदा
शिवंवपुः ५८ तथापिकल्पनामात्रंकालमाप्याध्वनामिदं ब्रह्मस्त्वीशानमूर्धानःपुरुषेणचतुर्मुखः ५९ हृदयादीन्यघोरेणगुह्यादीन्पुनर्वा
मतः सद्योजातेनमंत्रेणपादादीनिजगत्पतेः ६० पंचमंत्रतनुःशंभुरेवंकल्पनयाभवेत् ॐकारबीजप्रभवःकलापंचकसंयुतः ६१ शुद्धस्फ
टिकसंकाशःशुभमेधाविवर्धनः सदाशिवात्माव्योमस्थःईशानःपरिकीर्तितः ६२ गायत्रीप्रभवोमंत्रःस्वर्णवर्णश्चतुष्कलः वश्यकृद्भुजवाहस्थः
ईश्वरःपुरुषःस्मृतः ६३ अथर्वप्रभवोमंत्रःकलाष्टकविभूषितः आभिचारकदुत्पर्थंअंजनाद्रिसमप्रभः ६४ अशेषाघहरःपुंसामघोरोरुद्रविग्र
हः सामवेदभवोमंत्रःत्रयोदशकलान्वितः ६५ वामदेवप्रवालाभोवारितत्वस्थितोहरिः यजुर्वेदोद्भवोमंत्रःकलाष्टकयुतःस्थितः ६६ शांतिकृ शिवं
त्पृथिवीसंस्थःसद्योजातःपितामहः तत्पूर्षःचंद्रबिंबाभोऋग्वेदवदनोशुभत् ६७ कलापंचदशैर्युक्तोमुख्यमंत्रात्मकोहिसःपंचवक्त्राःस्मृताः ४२

सर्वेदशार्द्वेंदुभूषिताः खड्गखेटधनुर्बाणकमंडलस्यधारिणः वराभयोपेतकराः शूलपंकजपाणयः ६८ अघोरेघोरएतेभ्रुतदेन्येसोम्यविग्र
हा एवंध्यात्वासदेशस्यपंचब्रह्मात्मतांविभोः ६९ तत्तद्वस्तुकलाभेदैः विचिंत्यांगानिकल्पयेत् श्रीस्कंदउवाच ध्यायाभिध्यायरुध्वाविषम
विषयजागाधबोधेप्रमुग्धं दुग्धप्रायमदिग्धसर्वविषयाकारौघदग्धाघकं ७२ ध्यायीतत्क्षणमेवशिक्षणचणं त्र्यक्षंमदोक्षस्थितंसर्गापार
विचक्षणोक्षणमुमेविक्षीणचित्ताक्षकः बारंवारमपारसारकरुणावाराशिभाराशिहद्वाराशीविषपानुभूषितभवोभावोप्यभावोज्झितः ७३
योषार्धाकृतिकामकायदहनःसंमोहितामोहनोहेयानामपिहायिनामगसुतेभूमैकसीमाशिवः ७४ इतिश्रीशिवरहस्येईश्वरखंडेदशमांशे
शिवध्याननाम अष्टाचत्वारिंशोध्यायः ४८ श्रीस्कंदउवाच ईशानःसर्वविद्यानामित्येषाशंखपांडरा धूर्जटेरूर्ध्वमूर्धासाशशिनासहिताक
ला १ ईश्वरःसर्वभूतानामित्येषाकुंदसन्निभ शर्वस्यपूर्वमूर्धासौशत्त्यायुक्तांगदारमया २ ब्रह्माधिपतिरित्यग्रेब्रह्मणोधिपतिःसदा ब्रह्मेत्ये
षाशशांकाकासैषामूर्धास्यदक्षिणा ३ शिवोमेअस्त्वितिकलाशुद्धस्फटिकभास्वरा महेशस्योत्तरमूर्धामरीचिरसवोचिका ४ सदाशिवोमिति
कलागोक्षीरधवलाकृतिः शिवस्यपश्चिमोमूर्धाज्वालिनीमेलनोज्वला ५ कलातत्पुरुषायेतिपूर्वविग्रहइत्यसौ शांतियुक्ताजपावर्णापूर्वव
क्त्रंपुरद्विषः ६ महादेवायपूर्वायधीमहीतिकलायुता साविद्यासहिताकृष्णादक्षिणावक्त्रमीशितुः ७ कलाप्रतिष्ठासहितातन्नोरुद्रइ
तियुतावक्त्रमुत्तरईशस्यवर्णेनस्फटिकोपमं ८ प्रचोदयादितिकलाप्रतप्तकनकोपमा शिवस्यपश्चिमंवक्त्रंनिवृत्यानित्यसंहितं ९ अघो
रेभ्यःकलानीलहृदयांतमयायुता अथघोरेभ्यइत्येषारक्तामोघासखीगणा १० पीताघोरकलास्कंधोदक्षिणःस्तुधयायुतः वामानिद्रा
युताघोरतरेभ्यइतिकीरभाः ११ नीलामृत्युयुतानाभिः सर्वतःशर्वरूपिणीकुक्षिःसर्वेभ्यइत्येषाकलासिंदूरसुंदरा १२ रजतासहितायानिमूला
धारधरात्मता लिंगमौलियुतापीताज्येष्ठायनमइत्यसौ १३ सद्योत्तरस्थविराणीलासात्रुद्रायनमःकला पीतासवाल्पवामोरुःकालायनम
इत्यसौ १४ शुक्लाकामकलाकाम्यासहिताजानुदक्षिणा वामाविकरणायाथनमःश्यामासंयमा १५ सक्रियादक्षिणाजंघानीलावल
कलाविभोः वामाविकरणायाथवृद्धिसिद्धियुतारुणा १६ विद्युद्वर्णाबलकलासमस्फिक्कार्ययायुतावामः प्रमथनायाथनमोधात्रीयुता
सिता १७ बलाकामायुतासोम्याबलप्रमथिनीकलामनोन्मनीयुतांध्यायेत्वामपार्श्वंपिनाकिनः १८ सद्योजातंप्रपद्यामीत्येषाबालार्क

संनिभा कलासिद्धसमायुक्ताधूर्जटेर्दक्षिणं पदं सद्योजाताय वै पूर्वो नमद्भुत्यसिता कला ऋद्धिशक्तेः सहचरी वामगौरीपतेः पदं २० नी
लाभवेत्कलायुक्तासुहितोदक्षिणः करः नीलाभवेत्कलान्यान्तु वामो लक्ष्मीयुतः करः २१ मेधासहचरी सीता सापीवातिभवेत्कला भवोद्भ
वेमितिकलासाकांतिरुरुणाशिरः २२ नीलाभवकलाबाहुः दक्षिणस्वधयायुतः उमादर्ककराभासामुद्भवाय नमः कला २३ घ्रतशोभि
युतांध्यायेद्वामबाहुं जगत्पतेः अष्टत्रिंशत्कलादेवाः त्रिनेत्राश्चचतुर्भुजाः २४ वराभयपरश्वेणविलसत्करपंकजाः तत्तद्धस्तसमाकारव
र्णायुधभत्तोथवा २५ एतेषां वामभागे तु विचिंत्याः शक्तयस्त्रिभाः पाशांकुशाभयवरद्योतमानकरांबुजाः २६ श्रीकंठप्रमुखान्रुद्रान्
वर्णरूपान्सशक्तिकान् प्रभोरवयवान्ध्यायेद्वा सूक्ष्मन्यायवर्त्मना २७ स्मरेत्सशक्तिकान्रुद्रान् अर्धनारीश्वराकृतीन् सिंदूरकांचनप्र
ख्यावामदक्षिणपार्श्वगान् पाशांकुशाक्षवलयशूलमुद्राविराजितान् प्रसन्नवक्त्रकमलान्विश्ववांछितदायकान् २९ कामिकं पादकम
लं योगजं गुल्फयोर्युगं चिंत्यपादांगुलीरूपं कारणं प्रसृतान्द्वयं ३० अजितं जानुनी युग्मं दीप्तमूरुद्वयं विभोः गुह्यं वीजात्मकं सूक्ष्मसहस्त
नुकटीतटं ३१ पृष्ठभागोंशुमानस्य नाभिश्री सुप्रभेदकं विजयं जठरं प्राहुः निश्वासं हृदयात्मकं ३२ स्वायंभुवं स्तनद्वंद्वम् अनलं लोचनत्रयं
वीरागमः कंठदेशः रौरवं श्रवणद्वयं ३३ मकुटं मकुटं शंभोः बाहवो विमलागमाः चंद्रज्ञानं मनः शंभोः विंबवदनपंकजं ३४ जिव्हा
प्रोद्गीतमीशस्य ललितं गंडयोर्युगं सिद्धं ललाटफलकं संतानं कुंडलद्वयं ३५ यज्ञोपवीतं शर्वोक्तं हारस्तत्वपारमेश्वरं किरणं रत्नभूषास
वातुलं वसनात्मकं ३६ एवं तंत्रात्मकं रूपं ईश्वरस्य विचिंतयेत् शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकं ३७ प्रणवस्य च मात्राभिः वर्णैः पंचाक्ष
रस्य च वदमासोश्वविकलकल्पयेद्बिंदिकापतेः ३८ विशुद्धं शिवसादाख्यं विद्युद्वृंदसमिवांवरे विभ्रतः स्फुरितज्योतिः विद्यादूर्ध्वमुखं विभोः
३९ अमूर्तमथसादाख्यं मूलस्तंभद्युतिप्रभं ज्योतिस्तंभमयं लिंगं सौरदस्योजरंमुखं ४० ज्योतिर्लिंगैकभागोर्ध्वे एकवक्त्रं त्रिलोचनं मूर्ति
सादाख्यमित्युक्तं ध्यायेत्पश्चिमसाननं ४१ शूलं च परशुं वज्रमभीतिं दक्षिणैः करैः पाशं वह्निं च घंटां च वरं वामैः करैरपि ४२ ध्यानं कर्त
सादाख्यपुरारेः पूर्वमाननं ब्रह्मपंचान्वये पूर्वदक्षिणोत्तरपश्चिमान् ४३ वक्त्रपद्मं विभोर्ध्यायेत् ईशानं ब्रह्मतिक्रमात् सर्वज्ञतातृप्तिरनादि
बोधः स्वतंत्रतानित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाषडाहुरंगानि महेश्वरस्य हृदयं हृदये मुख्यं शिरः शिरसि पिंगलं शिखाशि

खास्यदेरक्तां कवचंपार्श्वयोःस्थितं नेत्रेषुस्यामलं रक्तं करेस्त्रमसितं स्मरेत् ४६ चतुर्भुजास्त्रिनेत्राश्च जयामकुटमंडिताः वराभयेकपालंचशूलं
चदधतः करैः ४७ अंगदेवास्मृतास्सौम्याः नेत्रास्त्रोतग्रहे त्रिसूलंत्रिगुणंप्राहुःपरशुःसत्वनिष्ठितः ४८ खड्गप्रणतोवज्रंशंभोशक्तिरभेध
ता वन्हिःसंहारिणीशक्तिःचक्रंनागोप्यघृष्यता ४९ मलमायाकर्मपाशोघंटानादस्वरूपिणी अभयेमालिनीशक्तिःविवर्णचांकुशंविदुः
५० एवंदशभुजंध्येयंत्वीशःलिंगेर्दशभिरायुधैः जपकालेतुमंत्रस्यध्येयोदेवश्चतुर्भुजः ५१ वराभयपरश्वेणलसत्करसरोरुहः वक्रेष्वीशानवक्र
यऊर्ध्वोशाभिमुखंसदा ५२ पूजाकालेषुतत्पूजाद्वाराभिमुखतांव्रजेत् पुरुषाघोरजाताख्यवामदेवाननानितु ५३ द्वारभेदान्नभिद्यंतेस्वस्वरूपा
नमवस्थया अथवामंडपेद्वारदिग्गादिपरितःक्रमात् ५४ चत्वार्येतानिवक्त्राणिप्रादक्षिण्येनकल्पयेत् एवंसदाशिवंध्यात्वानिश्चलेनांतरात्म
ना ५५ मंत्रन्यासादिकंन्यापिकृत्वास्वस्थांतनौयथा मूर्तित्वेनैवसंकल्प्यशिवस्यपरमात्मनः ५६ अभ्यर्च्यगंधपुष्पाद्यैःमनसैवोपपादितैः
तस्यांमूर्तौमूर्तिमंतंशिवंसदसतःपरं ५७ प्राणस्थानंमहेशस्यचिंतयेदंविकापतेः ब्रह्माविकापतेः ब्रह्माविष्णुश्चरुद्रश्चतथान्येचसुरासुराः
५८ तपोभिरुग्रैरद्यापियस्यदर्शनकांक्षिणः यस्मात्सर्वमिदंब्रह्मविष्णुरुद्रेंद्रपूर्वकं ५९ सहभूतेंद्रियग्रामैःप्रथमंसंप्रसूयते कारणानांचयोध्या
ताध्येयःपरमकारणं ६० नसंप्रसूयतेन्यस्मात्कदाचनकुतश्चन सर्वैश्वर्येणसंपूर्णोनाम्नासर्वेश्वरःस्वयं ६१ सर्वैर्मुमुक्षुभिर्ध्येयःशंभुरा
काशमध्यगः सर्वोपरिकृतावासःसर्वावासश्चशाश्वतः ६२ षड्विधाध्वमयस्यास्यसर्वस्यजगतःपतिःउत्तरोत्तरभूतानांउत्तरश्चनिरुत्तरः
६३ अनंतमहिमांभोधिरपरिच्छिन्नवैभवः अशेषविषयामोघशुद्धबुद्धिविजृंभणः ६४ आत्मशक्त्यमृतास्वादप्रमोदरसलालसःअनंता
नंदसंदोहमकरंदमधुव्रतः ६५ अशेषजगदंडानांपिंडीकरणपंडितः औदार्यवीर्यगांभीर्यमाधुर्यमकरालयः ६६ अतुलःसर्वभूतानांरा
जराजोमहेश्वरः अप्राकृतशरीरंतंअतिमन्मथरूपिणं ६७ घृतरीतिघनीभूतसच्चिदानंदविग्रहं सर्वलक्षणसंपन्नंसर्वावयवशोभितं स
र्वातिशयसंयुक्तंसर्वाभरणभूषितं संरक्तपाणिचरणांकुंदमंदस्मिताननं ६८ शुद्धस्फटिकसंकाशंफुल्लपद्मत्रिलोचनं चतुर्भुजमुदारां
गंचारुचंद्रकलाधरं ७० वरदाभयहस्तंचमृगटंकधरंहरं सर्वकल्याणनिलयंचारुनीलगलांतरं ७१ सर्वोपमानरहितंसर्वात्मानंविचिं
तयेत् ततःसंचिंतयेत्तस्यवामभागेमहेश्वरी ७२ प्रफुल्लोत्पलपत्राभविस्तीर्णायतलोचनां पूर्णचंद्राभवदनांनीलकुंचितमूर्धजां ७३ नी

 लोत्पलदलप्रख्यांचंद्रार्धकृतशेखरां अनवद्यघनोत्तुंगपीनोन्नतपयोधरां ७४ तनुमध्यांपृथुश्रोणींपीनरक्तोत्तरांबरां सर्वाभरणसंपन्नां ल
 लाटतिलकोज्ज्वलां ७५ विचित्रपुष्पसंकीर्णकेशपाशोपशोभितां सर्वातीतगुणाकारां किंचिल्लज्जानताननां ७६ काव्याकारस्फुरद्राजलस
न्मुक्ताफलांचितां हेमारविंदविलसद्दूर्वानादक्षिणेकरे ७७ दंडवज्जापरांहस्तनस्यासीनां सहासनां पाशविच्छेदकांसाक्षात्सच्चिदानंदरूपिणीं
 ७८ सदाशिवेश्वरहरश्रीशद्रुहिणमातरं समस्तगौरीवाण्यादिलक्ष्म्यादिपरिसेवितां ७९ एवंदेवंचदेवींचध्यात्वातरुणविग्रहौ सर्वोपचारवद्भक्त्या
भावपुष्पैस्समर्चयेत् ८० एवंध्यात्वाक्षणमहोअग्निष्टोमायुतफलं उमासहायंविश्वेशंध्यात्वाप्राप्नोतिमानवः ८१ श्रीस्कंदउवाच शंभुश्चिदा
काशगकोशकाशो ध्येयश्चिदानंदघनोव्ययात्मा शाखाशिखाभिर्गदितोहराजमुकुंदशक्रादिसुरप्रसूतिः ८२ हेयादिदुःखमपहायभवोरुमा
यानिर्वापकायहृदिवेचिरभावितायकैवल्यवल्लीगतवैभवोयो ध्येयोविमुक्तौपरमेशसउमासहायः ८३ इतिश्रीशिवरहस्येईशानाख्येदशमांशे
एकोनपंचाशोध्यायः ४९ ईश्वरायनमः ध्यानमेतत्त्वयोक्तंमेमहादेवस्यमुक्तये उमासहायंविश्वेशंध्यात्वामुक्तोभवेद्द्विजः १ श्रुतिप्रकथितेपंते
मूर्तिःपरतरेशितुः कैवल्यश्रुतिनिर्दिष्टासाक्षान्मोक्षप्रदायिनी २ ब्राह्मणक्षत्रियविशांआश्रमाणांचसर्वदा सन्यासिभिर्विशेषेणहृदिन्यस्यैव
केवला ३ भस्मदीप्तत्रिपुंड्रांकैःसदारुद्राक्षधारिभिः रुद्रसूक्तजपासक्तैःसदापंचाक्षरादरैः ४ ध्येयाहृत्पंकजोत्फुल्लकर्णिकायांविमुक्तये
क्षणमेकंकृतूनांचचतुस्सप्ततिजंफलं ५ प्राप्नोतिमनुजःसद्योइत्याहश्रुतिरेवहि ध्यानमेवपरापूजातान्यापूजाक्षहेशितुः ६ ज्ञानध्यानाभि
युक्तस्यशिवशीघ्रंविमोक्षकः भवोरुपाशबंधेभ्योरहस्यंतेमयोदितं ७ सर्वेषामपिपापानांध्यानंशंभोर्विनिष्कृतिः अन्याधिकारिभेदेनपू
जास्थानादिभेदतः ८ शिवोदितोयंचविःश्रुण्वध्यायांतिर्ममुने देवदेवेनकथितंसर्वसंशयनाशनं ९ ईश्वरउवाच अर्केंदुविविधानले
चलिंगेहृद्युत्तमांगेममदेविपूजनं प्रशस्तमाहुःनिगमागमाःशिवेतत्पूजनंसफलमेवभवेद्भवानि १० पुण्यान्यतुल्यगणितानिभवेद्धितस्य प्रा
तर्दर्शनमीश्वरस्याघहरंनेशंविनश्येत्त्वघंघध्यान्हेहयमेधपुण्यदेफलंददायंतनेजन्महत्स्यादर्धेंदुकलावतंसभजनंसंपूजनंलोकनं १०
धन्यानांकिलजायतेत्रिभुवनेपापौघतापौघहृत् अर्वादामलकान्सन्तोलघुतरंलिंगनशस्तंशिवेसर्वद्वयमभवंहिसूक्ष्ममपितद्धत्तो
द्भवंशस्यते नैतत्स्फाटिकधातुमारकतकेसत्रातांकोत्तुंगेनेलिंगेनैवहिदोषभागकलनंतुंगंहिशस्तंतमे ११ सूक्ष्मेस्फाटिकजेतथामर

त्तकेसद्विङ्कुमेकौरितेत्रासस्त्रासकरोभवेत्तगिरिजेतुंगंनलिंगत्वंघं मृत्स्नाचापिचतुष्टयांगुलिहितंअर्वाक्ननोदोषकृत् पाषाणप्रभवंगृहे
ष्वनिहितंहस्तेवपुण्यकृत १२ धातुभ्योप्यधिकंसुरत्ननवकैःस्फटिकंततःपार्थिवंतस्मात्स्वप्नप्रसूतंफलार्थिजनकंस्याद्बाणलिंगंरसं शंभोस्त्वन्
मवीर्यजान्नहिपरंलिंगंतथावैचरेस्थैर्य्यंदैवतमार्षमात्रपकृतंस्वायंभुवंस्यात्फलं १३ पार्थप्रहरांकितंहेमबिंदुचितंभवेन्नार्मदंलिंगमीशे
त्रिपंचवारतुलयानसाम्यंप्रयातिनद्बाणभवंप्रशस्तं १४ श्वेतंभुक्तिदमविकेसिनमहोग्रणाभिर्वृष्म्यर्च्यने रक्तंनार्मदंलिंगमप्यघहरंदारि
द्र्यदंपूजनात् १५ प्रादेशादधिकंचराचेंनविधौनेतश्चतस्थावरं सपीठपीठंवाभवत्तुगिरिजेनार्मदंभवंप्रशस्तं हस्ताभ्यास्पर्शनियदिमुक्तेरूभ
यतः तथैवार्चेबिल्वेयदिपरमुक्तिंकिललभेत्गृहेसंस्थक्षेत्रेप्रभवतिततःक्रोशमगजे १७ चराचरंवाविपिनेनगेवास्थितंचलिंगंयदिपू
ज्यदृष्टचातद्बाणलिंगंपरपूज्यदृष्टं नत्स्थावरेचैक्षणपुण्यभावस्यात् यदुक्तंनियमार्चनायगुरुणालिंगंप्रपूज्यंसदा रत्नस्फाटिकधातुबाणक
लितंतल्लिंगभंगेशिवे १८ प्राणानप्यसमीक्ष्ययःस्वजनितस्याङ्गक्तवर्याविकेतस्याह्नंदितरामिमुक्तिमधिकांतत्तुल्यमेच्चैतत्वा १९ ई
शार्चनाविरहितंयदिभस्यभोज्यमन्नफलंकीटकसंमितंभवेत् सत्कानरोदन्सतुपंचवत्सरमतत्त्रशैलेनिवसेच्छिवार्चना २० नियमाच्छि
वलिंगमर्चयन्मरणेवापित्यजन्सएवपापी यदिसंत्यजप्रमादतोहराच्चींसहिकुर्यात्त्वउपोष्यभक्तियुक्तः २१ नप्राणलिंगनियमः॥
कलिजद्विजानांशस्तःप्रशस्तमगजेकिलहस्तबद्धं लिंगंगलेचहृदयेकिलतत्त्रिकाणांदेवस्यधारणविधिंप्रवदंतिवेदाः २२ नायंवैदिकसं
मतोविधिरयंलिंगार्चनंकेवलंभस्माक्षादिविधारणंचनियतंत्याज्यंनचैतद्द्विजैः सर्वेंद्रियादिरहितोयदिपुत्रकःसंततस्यार्चनंभवतिशैलसु
तेत्रिसत्तं २३ तुंगंयावच्चलिंगंपरिणतिरपिसानावतीयोनिस्तरुक्काशक्काविस्तीर्णवृत्ताभवतिगिरिसुतेगोमुखीपीठतोर्ध्वा पीठंचापिचतुष्कवृत्त
कलितंतल्लिंगमानांगुलंआयामोच्छ्रितवर्त्मभध्यरहितंन्यूनाधिकंदोषकृत् २४ नेदंमानमनोज्ञभवत्तिगिरिसुतेलिंगमात्रेस्वयंभोदेवार्षेपि
वरंदंनिमानुषविधौनस्थावरेवाश्वरे रत्नेधातुविनिर्मितेस्फटिकजेस्यान्मृण्मिकाकलितंसूत्रोपंचकभेनदेवकलितंसाङ्गोगमोक्षप्रदं २५
न्यूनाधिकाभवतिदोषकरंहिलिंगमायुःप्रजांधनपशूंस्त्रविनाशयेत् तस्मात्समांगुलमिदंप्रविचार्यकुर्यात्तल्लिंगमनोज्ञमगजेविधिरेषशु
द्धः २६ शंभोलिंगेस्वयंभौऋषिसुरनिहितेबाणलिंगेचरेवारत्नस्फाटिकधातुसंभवमहालिंगेमृदापारदे ध्यात्वावाहृदयाब्जेद्विजवर

श्चंडेशनिर्माल्यभाङ्नोभूयाद्दिनरेषुवैदिकचरः तंनस्पृशेद्दूषकं २७ एतेषामघहारिनिर्मलतरं निर्माल्यमप्यद्रिजे चंडेशाधिकृतिर्नैत
त्रकलितान्नग्राह्यमेवद्विजैः तंत्रेष्वागमयंत्रमंत्रसहितेस्त्रीशूद्रसंपूजितेनग्राह्यंकिलचंडभक्तमगजेनद्वैदिकैःकेवलं २९ वाणस्फाटि
कधातुलिंगनिवहेपुण्येरसेंद्रोद्भवे स्वायंभोहृदयाब्जकोशकलितेदत्तंपुरस्ताद्धियत् ३० नैवेद्यंचवरान्नभक्ष्यफलजंग्राह्यंतथावैदिकैः
अन्यत्रक्षालमेषांफलरसगणजंस्याज्यमन्नंतथान्ये शैवेचापिचसूतकेपिगिरिजेमल्लिंगसंगाद्भिन्नः दूराद्बिल्वदलंत्यजंतिसुधियः।
नित्यार्चनात्तेनहिस्यादेवनियमोपिजायतेशिवस्तेनैवसंतुष्यति नग्राह्यंजलमन्नभोज्यमपिनोविप्रैःशिवार्चांविनात्यक्त्वाचांत्यजयोनि
मेतिनरकेसंधुक्षितोसौमृतः ३२ यस्त्वेकाहमपिप्रदोषसमयेस्वल्वापइत्वाशिवः पूजांचापिविधायतद्विगुणितांतत्पापमुक्तोभवेत्॥
स्त्रीशूद्रार्चनमेतदेवगिरिजेमद्भूतुलिंगेसदाबिल्वाद्यैःसततंनमोंतविहितैःपंचाक्षरैःकेवलं ३३ अन्येसंकरजातयोप्यगसुतेम
ल्लिंगलोकोत्सवेमद्धामादिविलोकनेननिलयंतेप्राप्नुवंतेमम ३४ चक्रांकग्रावसाम्यार्चनमगतनयेएकपीठेस्थितंमेतत्सेवाशुचि
पूजनंकिलभवेत्पापौघदंकेवलं एकंमेशिवलिंगमेवनियतंसंपूज्यमुक्तोभवेत् बिल्वैकोमलपल्लवैरहरहःभस्माक्षधृक्शांकरः
भस्मत्रिपुंड्ररहितोममलिंगपूजांकृत्वाप्यघोरनरकंसशिवेप्रयाति रुद्राक्षभूषणविवर्जितसर्वकायस्तत्पूजनंममशिवेप्रियकृन्न
चैव ३६ यस्तूर्ध्वपुंड्रकलिताधमफालदेशःसंपूजयन्ममवरंशिवलिंगमीशे सोंधतमोहिनरकंप्रसभंप्रयातितत्पूजनंसुकृतमप्यकृतं
सदास्यात् ३७ यत्रानिदीक्षानियमेषुलिंगसंपूजनंपूर्वनएवकार्यं यावत्सुतत्कालसमाप्तिमानंचाकृष्यकृतंसदास्यापूजांरचयेन्नलिंगे ३८
सत्रेषुलिंगंचसदैवपूजयेदुत्थूलदेहंभसितत्रिपुंड्रैः रुद्राक्षवक्षोपिभवेत्तनित्यंत्वत्राक्षार्चनाक्षपितपातकौघः ३९ नष्टेभिन्नेश्लथेवाम
मजनिमवरंत्यजप्रदग्धंतथाप्युतस्येवाकृतिमाद्दृशीतंनियतंसंधीनचेत्सधिक्कृत् ४० लिंगप्रोक्षणसंस्कृतिंपुनरस्मेकुर्वीतसंपूजयेत् शूद्र
प्रतिष्ठितंशिलाशिवलिंगमीशेदृष्ट्वायदिक्षितिसुरैःकृतपुण्यनाशः ४१ तद्बाणलिंगसहितंयदिशूद्रलिंगंस्यादेवपुण्यफलदंशिवदर्शनेन
पाषंडशूद्रपतिताधमनीचदुष्टचंडालपुल्कसजनैःयदिस्पृष्टलिंगंदैवंतथार्षमनुजैश्चस्वयंभुलिंगंसंप्रोक्षितंभवतिवैस्थिरजंचरंवा
पत्रंत्रिनेत्रप्रियमेवबिल्वमपात्रमप्यद्रिसुतेसुताते ४३ करोतिमेलिंगसमर्चनासुशुष्कंतथापर्युषितंपवित्रं नैनत्त्याज्यमुमेवदंतिनिगमाः

सा छुद्रकेणाहतं विध्यावाप्यविधानतो हतमुमे श्रीपत्रमेवं प्रियं ४४ शुष्कं पर्युषितं चकोरसहितं नन्त्वाज्यमेवं शिवे तत्रालब्धमहो तथा
न्यं कुसुमं बिल्वारव्ययापातयेत् रत्नस्वर्णविनिर्मितोरुकुसुमं साहक्कृत्य संक्षालितं पूर्वेद्युः प्रतिपादितं गिरिसुते सम्यक्स नः पूजयेत् ४५ तद्वत्क्षा
लितमेव बिल्वमगजे संक्षालितं पूजयेत्तत्रालाभविधौ शिवार्चकजनैः निर्माल्यता नोचिता उक्तं गंगाशागलिंगं यदि सितभसितोद्धूलितांगा
श्लसंगं पापापारमहोत्तमोगसुमहाभंगाय तत्पार्वति ४६ दीनेदोषप्रदोषे प्रथितजनुजरानाथसंस्थात्तु शश्वत्सवीक्ष्य नियमेन शांभव
वरो भूयात्तु गणेश्वो मम प्रदोषकाले शशिखंडचूडलिंगं विलोका वृषगे सुविषाणयोगे ४७ तदंडसंस्पृष्टकरो नरो भूयात्तु गणेशो मम प्र
दोषकाले शशिखंडचूडलिंगं विलोक्य वृषगे सुविषाणयोगे ४७ तदंडसंस्पृष्टकरो नरो वरः स सर्वतीर्थाप्लुतविग्रहो भवेत् हीने वी
क्षनकदाचिदीशे प्रदोषकाले यदि दर्शकश्चेत् ४८ प्रज्ञायुरूपाद्विरही भवेत्तु पुण्यस्य नाशः प्रभवेत्तु तस्य मंदप्रदोषेषु विशेषदर्शिनो
विभूतिभूषासहयोषवर्गाः ४९ सानंदमिंदुशकलाभरणोत्तमांगलिंगार्चनेन रसुराश्च नयंति कालं ऋणत्रयापाकरणाय शस्तः प्रदोषका
लीनो शिवार्चने मे ५० तद्दुःखदारिद्र्यविनाशकं शिवे नित्यं च नैमित्तिककामदं च वारव्रते द्विजगणेषु निषद्धितेपि नत्वाज्यमेतद्गजे किल
सोमवारः ५१ सर्वेषु मासगणनासु विशिष्टमासो यच्छ्रावणोर्जपरमोपि स पुण्यभाक्स्यात् सोमामास्वपि नक्तभोजनरतो भक्तोथ मुक्तो भ
वेत् ५२ युक्तो वाप्यघसंचयेन गिरिजे सुव्यक्तमेवोच्यते शक्तश्चेदुपचारसकर्मणि सदा नो चेद्द्विचात्पक्षणे ५३ क्षीणायुः किल शंकरार्चनर
तो भुक्तोप्येव मुक्तो भवेत् कालाष्टम्यां निशीथे शतपथगदिते यामिनीनाथचूडध्यानानंदेन लिंगार्चनविधिचतुरो मूढ एव दृढः सः ५४ तस्यां पंचा
स्यलिंगं हृदि सुविविहितं पूज्य बिल्वैस्तथाज्यैः हुत्वा सामगकल्पके शिवमुखे सायुज्यमाप्नोति मे चतुर्दश्यां मीशे शशिरहिते पक्षांते दिवसे
निशीथश्चापि न्यायदि यजति लिंगं ममपरं ५५ प्रशस्तं हस्ताभ्यां परिदलितबिल्वच्छदवरैः अपामार्गैः मार्गं सकलयति मुक्तेपचेनपुरः क्षीरै
रेव शतापराधमगजे दध्ना सहस्रं घृतैः साहस्रं दशकं तथैव मधुना तत्त्वायुतं वासितं ५६ हत्वा मल्लिंगमौलौ फलकुलजरसैः सर्वमी
शे सहेयं नस्येत द्वितरामिभक्तिपरमानंदं मुक्तः शांभवं शस्तः प्राङ्मुखलिंगतोपि गिरिजे पश्चान्मुखं मोक्षदं वायव्यां किल चंडभागकलितं त
प्राङ्मुखाग्नेयके ५७ तस्यार्चां रचयेत प्राङ्मुखगते पश्चान्मुखं वा शिवे तत्सान्मुख्यमपास्य चोत्तरवदनेनैवार्चयेद्भूगृहे ५८ प्रदक्षिणपदं

यदि क्षिपति पापसंक्षेपदक्षं तु नमन्मयि सदा त्र्यक्षमेहि मलमुक्तिमार्गे शिवे लुठन्यदि पठन्ननु शिवधनं विमुक्त्वा रमके स एव किल लुंठको भवति
नीलकंठालये ५९ सत्यासत्यमनक्षमोचर्णिनावेकर्मदिनासु भयं न तस्य शास्तं साष्टांगा वै प्रणतिः साप्रशस्ता गंभीरे वाप्रक्रिया चैमनोज्ञा ६०
गृहस्थो वृषभो वा प्रकृतिवरदाक्षिण्यभगजे वृषं चंडं स्तंत्र धनरपि वृषाद्यं प्रभवति न शस्तं तल्लेकं शतमवरसाहस्रपरमंत्रयं वानल्लेकं य
दि भक्त्या तिनिर्योजलिपरः ६१ यदि शिववृषभांतराभिगच्छेद् कुरुमी शे प्रणतो हि चंडिकेशं बलमायुः पशवस्त्रियश्च पुत्रा विनशेयुस्त्वर
याशिवे हितस्य ६२ पंचब्रह्मैर्गृहस्थो ममभजनि मवरं त्र्यंबकेब्रह्मचारी वन्यो धन्यश्च रुद्रं जपति मनुवरं पूजयन्लिंगमेशं क्षत्रोपि श्वरलिं
गमगजे संपूजयेत्तावनैः पत्रैर्भूमिनिपातितैः नरूचराच्छ्रीरुद्रपंचाक्षरैः तत्र्यंबकमंत्रितैः सुभसितैः संपूजयन्मुक्तिभाक् भस्माक्षा
दिविधारितो नमतनुः ज्ञानं मम प्राप्नुयात् ६४ नद्यां गोष्ठे गृहे वा शिवशिशिलके मंत्रितैः शुभ्रसीतैः पुण्यदेशे वनेवा विल्वस्याधो गि
वाग्रे ममयदि विमलं लिंगमर्चेत्प्रशस्तः ६५ लक्षेकाधिकमुत्तरोत्तरगुणं प्राहुः शिवार्चाविधौ गंगायां यदि लिंगपूजनविधिस्तात्को
टिगुण्यः शिवे धातुभ्यो रत्नलिंगं किल विमलमहो पूजये द्वाणलिंगे तस्माद् प्यगजे रसेंद्रकक्षते स्यात्कोटि लिंगार्चनं पुण्यं चापि दशेत मु
क्तिमपि वैनातो धिकं कीर्त्यते ६६ शुद्धे चेद्यदि मुक्तिदायकमतो नो चेत्सुखायुः प्रदं सेनपाधमचक्रचिन्हितननुं नैक्षेत पूजाविधौ ॥
स्नानं वा त्यजस्त्वकं मलवतीं दृष्ट्वानुतिष्ठेच्छिवे स्नात्वा चेलयुतं पुनश्च भसितैः उद्धूल्य गात्रं तदा द्विस्त्रं वा शतरुद्रजापनशुचिः देवं यजे
हैतनः ६७ तद्दृष्टिदुष्टं नविशिष्टमीशे नैवेद्यमाहुः फलपुष्पदानं कनिष्ठजन्मापि भवेत्तेन दत्तेव कुष्ठी प्रभवेत्तकष्टी निर्माल्यलंघन
मुमे बलपुष्टि हानिः तीर्थं शिवस्नपनयष्टि नियोजकं स्यात् ६८ दानं च शस्तमगजे किल संभवेषु नानेरशैवजनुभिः विनयोज्यमा
हुः शिवाभिषेकाद्बुपि चैरद्युप्रं विंदुत्रयं वैशिवपूजनाते ६९ नातोधिकं ग्राह्यमुमे मलोदरे स्यान्मूत्ररूपं यदि पापकृद्भवेत् वंध्य
कर्थान्नरिवसमुमे विघ्नगर्वापहं तं ध्येयं यतस्त्वद्वरमहोपूज्यस्य पूर्णकामः ७० लोकानी ष्टमशिवभजनान्भाजनं मुक्तयेसौ स
वैबांचैविधिरयमुमे गोपनीयो मयोक्तः मस्तं यद्वृसितं तपं ड्रकलितं विश्वेश्वरे यन्नतं हस्तौ नौ शिवलिंगपूजनरतौ शक्तौ च विल्वाज्जे
को ७१ नस्तं यच्छिवपादपंकजलसत्पुष्पो ब्रजाघ्रेयकं तन्नेत्रे सफले त्रिनेत्रविलसल्लिंगावलोकेन नो तत्यादे शिवलिंगधाम

गतिदोतमक्रमेषु यतो चिंतंतच्छिवमूर्तिचिंतनरतं वाणीशिवाख्यास्तुतौ ७२ शंस्तंतस्यसमस्तभागपमगजे पापंविशस्तंभवेत् धमा
स्तएवसितभस्मलसत्पुंड्राः मान्यास्तएवशिवलिंगसमर्चकामेअन्येपुनर्भुविभराय भवंतिजन्मावन्या वनीप्रभवलोकरवरोदि
कान्ता ७३ योंस्तुद्भिन्नताहिगिरिजेप्रभवंतिमूत्वाः विहायशिवपूजनंकिमितिकायदुःखाधिकश्रमाश्रमनिषेवणैः नियमयोग
संसेवनैः अपायदमिदंशिवेविमलमुक्तिसंदर्शने उपायमिदमेवयच्छिवकथासुसक्तंमतः ७४ सुगमोयंविधिरेवकेवलेनिग
मांतेषुनितांतशोष्यथोक्तःआगमादधिकपापवर्गहर्ताभगनेत्रघ्नमुदेभवेत्तकर्त्ता ७५ यदायोनिवक्रेभ्रमितोजोवसंघः नदेवाशुका
लासकेसंपतेनतदंतस्यसंयोचचेनेकधर्म्मंमदन्यंनमन्येधराधीशकन्ये ७६ आयुर्वायुभिघट्टितांबुदपतद्धाप्रेत्यवत्साग्रगवा
लोलाधरवक्रपल्लवगलल्लंबांबुवद्भंगुरं तस्मिन्नायुषिशुभांगलिंगभजनंस्याच्चेत्तदायुःशिवेसार्थकंसमुपैतितद्विरहितंव्यर्थं
भवेत्कष्टकृत् ७७ यमभटविकराभटीरवंनिकरेश्रूयतएवतद्ग्रहानांवरघोररविषाणकोटिघृष्टाः परिदृश्यंतइमेकृतांतवक्षाः
वाधागाधभवह्रदांतरगताः तापत्रयार्कांशुभिः संतप्ताजनुनाशसंस्थितिमहादुःखाभिघातोद्धताः ७८ विषयामिषमोजिनो
मनुष्याः रुषजालाद्वकालजालिकाहृताते कालव्यालोरुदंष्ट्रानलकुलतुलनहीनदुःखार्दितांगाः स्तेमीमानवभेकमीलगत
योस्वास्यांतरालागतं कीटंजीवितुमेवभक्षयतिसः तद्बुद्धिमूढानराः कालंचाप्यसमीक्ष्यभोगनिरतास्तेस्थावरत्वंभ्रमैः नित्यानिस
विवेकशून्यमतयोतिष्ठंतिविष्टाशनाः ८१ आयुःप्रयातिगिरिजेतटिनीरयांबुप्राग्भागसंगतमिवप्रसरत्नपश्चात् आध्याधिभि
श्चनिपतंतनरकानराणांतस्यांतरायदिशिवेर्चितएवसाधुः ८२ भवोरुविपिनावनीप्रभवमत्तुसंस्थाह्वदः तरांतविषयावटप्रसक्तका
मषकंटकं ८३ गदाश्चमृगसप्रभाः परिचरंतितस्मिन्छिवेजराव्ककृतषाशिवाव्रजमपारदुःखद्रुमैः ८४ विधिसच्छिगिरींद्रजातधारा
प्रभवासातटिनीभवोरुनीराजनिमत्सुविवर्तिनर्तिफेनाजगदेतन्नयतेयमांबुराशिं ८५ श्रीस्कंदउवाच तदेवंविधिमाकर्णपशि
ववक्राद्गिरींद्रजातुष्टावदेवंहृष्टांतःकरणेनमहेश्वरी ८६ देव्युवाच वसुधाधरहारवासशंभोवसुधाराधिपपूज्यपाददेव॥
सुसुधाधरशेखरत्वमीशोस्यसुनाथोस्यधराश्रितार्धदेहः ८७ नाराकारसुहीरहारकभवत्काकोदराकारधृक्कर्पूराभकले

वराद्दिविलसन्मारांगभस्मास्रधृक् पारावारभवोरुसागरमहावैश्वानरायाद्यतेसारासारविचारकारणविभो पादौभजाम्यवते ८८ भवभव
शंकरहरमृडगरधरकरुणाकरकरुणाशशिमौले शिवनतवबदनांबुजरसमधुनामधुविधुसुरसंविधुनोति ८९ श्रीस्कंदउवाच उ
मापरिवढंद्दृढंनहिभजतिमूढाजनाः विमूढमतयोभ्रंशंपरिविशंतिगाढंतमः असारभवसागरेसुचिरमेवपापादराभ्रमंतिविषयात्
राः शिवपदार्चनावर्जिताः ९० अशोयंदशमः सदाशमधनैः सेव्योयमीशार्चकैः आशापाशविहीनचारुमतिभिः संसेवनीयोविधिः घो
रापारविकारसागरतरिः सम्यक्श्रुतोयंभवेत् चंद्रोत्तंसकिरीटपादभजनेचित्तप्रवृत्तंभवेत् ९१ हत्तापाद्दूरहीभवेत्तनियतंपापैर्विमुक्तो
भवेत् गोभूहिरण्यकलधौतनगप्रभेदानैरनेकजनुभिः यदिपुण्यभाक्स्यात् तस्यायमीक्षणपथेभवतिप्रकाममसांशलेशमहिमा
गदितस्तवाय ९२ इतिश्रीशिवरहस्येदशमांशेईश्वराख्येशिवगौरीसंवादेपूर्वार्धेपंचाशोध्यायः ५० पूर्वार्द्धंसमाप्तम् सं·१९४४ ॥